THE

KĀSHI SANSKRIT SERIES

(*HARIDĀS SANSKRIT GRANTHAMĀLĀ*)

NO. 77.

(Nyaya Section No. 10.)

THE

SAKTIVĀDA

By

S'RI GADADHARA BHATTĀ CHĀRYA

With the Vivriti Commentary

By

PANDIT PRAVARA S'RI HARĪNATHA TARKA -SIDDHĀNTA-BHATTĀCHARYA.

Edited with Critical Notes by

SAHITYADARSANACHĀRYA DARSHANIKASARVABHAUMA TARKARATNA NYAYARATNA GOSWAMI DAMODAR S'ASTRI

JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series office, Vidya Vilas Press,
North of Gopalmandir, Benares City.

1923

Printed Published & sold by
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
North of Gopal Mandir,
BENARES CITY.

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares,

Agents
1 Otto Harrassowitz, Leipzig
GERMANY
2 Arthur Probsthain,
Oriental & Foreign Bookseller
LONDON
3 The Oriental Book-supplying Agency,
POONA.

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरीज़्पुस्तकमालायाः
७७
न्यायविभागे (१०) दशमं पुष्पम्

॥ श्रीः ॥

शक्तिवादः ।

नैयायिकचक्रचूडामणिश्रीगदाधरभट्टाचार्यप्रणीतः

पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्य-
विरचितविवृतिव्याख्यया सहितः ।

स च

श्रीमन्माध्वसम्प्रदायाचार्यदार्शनिकसार्वभौमसाहित्यदर्शना-
द्याचार्यतर्करत्नन्यायरत्नगोस्वामिदामोदरशास्त्रिणा
परिष्कृत्य संशोधितः ।

प्रकाशक—
जयकृष्णदास-हरिदास गुप्त—
चौखम्बा संस्कृत सीरिज़ आफिस,
विद्याविलासप्रेस, गोपालमन्दिरके उत्तर फाटक,
बनारस सिटी ।

१९८६

संपादयितुर्वक्तव्यम्—

श्रीमद्धनुमच्छ्रीमन्मध्वान्तर्यामिरामकृष्णवेदव्यासैरर्वक्सित चिदानन्दविग्रहपूर्णतमाह्लादिनीशक्त्यभिन्नीकृतस्वरूपप्रेमावतारभगवच्छ्रीश्रीगौरकृष्णः शरणम् ।

इह किल प्रतायमाने प्रपञ्चे प्रमाणप्रमेयत्वेन व्यवस्थिते च मानाधीना मेयसिद्धिरिति नयेन प्रमेयमात्रस्यैव प्रमाणायत्तसिद्धिकतयोपजीव्यत्वेनादौ लोकानां प्रमाणबुभुत्साया एवौत्सर्गिकत्वात् तन्निरूपणाय संनद्धवतां प्रामाणिकानां यद्यपि तदीयस्वरूपलक्षणसंख्यासम्बद्धविप्रतिपत्तिसत्त्वादसामञ्जस्यमिवोपस्थितं तदस्थैरभिलषितायास्तपस्विन्याः प्रमेयव्यवस्थापनायास्तथाऽपि प्रमाणत्वेन प्रसिद्धितोऽभ्यर्हितायामान्वीक्षिक्यामेव विद्यायां युक्तायुक्तविवेकालंकर्मीणविपश्चिन्मानसान्यादरसध्रीचीनान्यायतन्तेतमामिति नाव्यक्तं निरपेक्षविदुषाम् ,

एतया चोपदिदिक्षितं प्रमाणमत्रभवदक्षपादमहर्षिपादाः "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी"ति सूत्रेण निरदीधरन् , व्यधातिष्टिषंश्च तद्भाष्यवार्त्तिकप्रणेतृप्रभृतयः, तदन्वेनमेवार्थं महत्याऽऽरभट्याऽदभ्रपराक्रान्त्या प्रसक्तानुप्रसक्तनिरूपणोपबृंहणेन विप्रतिपन्नप्रतिपन्ननिरसनविजृम्भणेन विद्वच्चेतांसि गृहयालुभिरनितरसाधारणीभिर्वाचोयुक्तिभिरुपापीपदन् मुनिकल्पास्तर्काम्बुधिपारगाः श्रीगङ्गेशोपाध्यायमहोदया. समन्वर्थनामकं निबन्धमूर्धन्यं चिन्तामणिं संदृभ्य,

अत्रत्यान्येव प्रत्यक्षादिखण्डानि समष्टिव्यष्टिरूपेणायलम्ब्य सर्वपथीनास्तार्किकाः पारेसहस्रं ग्रन्थान् व्यररचन् ,

तत्र शब्दखण्डे विवेचितेषु बहुष्वेवार्थेषु शब्देनार्थे बोधनीये बोध्यबोधकयोः केनापि सम्बन्धेनावश्यं नान्तरीयकेण भवितव्यमिति कीदृगयमुचित इति विचिकित्सायां प्रत्यासन्नैस्त्रिभिरेव प्राधान्येन स्वस्वसमयमनुसृत्य विचारितः सः,

पदार्थव्युत्पादनाधिकाराद् वैयाकरणैः,वाक्यार्थनिर्णयाधिकारान्मीमांसकैः, तदुभयप्रमापणाधिकारान्नैयायिकैश्च,

तत्र वैयाकरणाभिमतां बोधकतारूपां मीमांसकोपगतां पदार्थान्तरात्मिकां च शक्तिमरोचयमानानां नैयायिकानामनुमोदनीयां भगवदिच्छारूपामिच्छारूपां वा तां निर्विवक्षन्तोऽस्या वादं तत्त्वनिर्णायकं कथाविशेषं निबिभन्त्सवस्तार्किकचक्रचूडामणयः श्रीगदाधरभट्टाचार्याः शक्तिवादनामकं स्वप्रौढिमातिशयेन शक्तिविवेचकनिबन्धान्तराखर्वगर्वसर्वङ्कषं ग्रन्थरत्नं न्यबभन्त्सु,

अत्र च निबन्धा विभक्तेषु त्रिषु काण्डेषु ह्यादिमे सामान्यकाण्डे यावत्प-

दृगतामनुगतां शक्तिं परमतनिरसनपुरःसरमुपपाद्य द्वितीयस्मिन् विशेषकाण्डे विवादास्पदशक्तिककतिपयपदविशेषाणामेना तथैव व्यवस्थाप्य, चरमे परिशिष्टकाण्डे च भट्टपादश्रीमण्डनमिश्रगुरुप्रभाकराणां मीमांसकधुर्याणां शक्तिविषयकान् विचारान् प्रदर्श्य ग्रन्थोऽयमुपसमहारि,

अधुनातनविज्ञजनरुचिकरग्रन्थकृत्सम्बद्धविषयान्तरपरिचयावगमसम्पादनाय प्रवृत्य सायासं प्रयत्नादपि यावदुपलब्धं तावदितिहासमियान् प्रमोदयितुमुपक्रम्यते—

प्रकृतग्रन्थकारा गदाधरभट्टाचार्याः पूर्ववङ्गेषु पाबनेतिप्रसिद्धप्रान्तीय "लक्ष्मीचापरा" ग्राममधिवसति वारेन्द्रश्रेणिमुख्यजिमवंशे लब्धजन्मानः कुतोऽपि हेतो (गोयारी) कृष्णनगरराजधान्यन्तर्गते श्रीनवद्वीपधामन्यागच्छन्, पित्रा समागताश्च तत्रत्यात्तदानींतनविद्वत्समाजन्ययगौरवाद् हरिरामतर्कवागीशभट्टाचार्यात् तार्किकप्रकाण्डान्न्यायशास्त्रमधीयानाः समाप्तकल्पेऽस्मिन् शास्त्रे देवभूयं गतेऽध्यापके गुर्विच्छाऽनुसारिणा गुरुपत्न्यादेशेन गुरोरेवाध्यापनानये सम्प्रदायाविच्छेदरक्षणाधिनियोजितोऽपि तद्देशेऽद्यावधि प्रचरितव्यवहारतोऽध्ययनसमाप्त्यनन्तर प्राप्तव्य शुल्कद्रव्योपाधेरलाभादलब्धप्रतिष्ठाद् गुरोरध्ययने मर्यादाहानितो निश्चितामत एवाध्येतुमनागमनं छात्राणामालोच्याध्यापनोत्साहाच्च चतोष्पाठमार्गमुपगते वसन्नन्तेवासिन इवाध्यापयितुं प्रावर्तिषत,

तदा तु तदायमुदमसुकटमध्यवसायं तत्राध्यापनपाटिमानं तत्रापि विलक्षणविषयाविष्करणक्षमं प्रतिभाविकासमवगम्यैतत्स्थतो गच्छता विज्ञाना गुणेभ्योऽदर्शीयवैदुष्यागाधतामौपकर्णिकी कुर्वाणाः प्रथमगुणाकृष्टास्तत एव छात्रा अस्मदभिकृत्यास्तश्रैवैनानशिश्रयन्,

एवजातीया बहवः कौतुकावहा प्रवृत्तयोऽस्मदीयभट्टाचार्याणाम्, अत कियन्निवेशं दिग्दन्तावलदानमलीमसकरटकूटरीतिमनारविमयशश्चन्द्रदीधितीनामेषाम्,

सर्वमेतदुदन्तजातं तत्र भारतवैव श्रीनवद्वीपे पुरुषानुक्रमाद् वसता वंशधरानां मुखाद् बहुशः श्रुतं मया न्यायानुमानखण्डमध्येतुं गत्वा बहुकालं तत्र स्थितेन,

ग्रन्थस्यास्य पञ्च टीका उपलभ्यन्ते सम्प्रति—

एका विवृतिनामिका हरिनाथतर्कसिद्धान्तकृता,
द्वितीया कृष्णभट्टनिर्मिता मञ्जूषाऽऽख्या,
तृतीया माधवतर्कसिद्धान्तरचिता माधवीति प्रथिता विवृति,
चतुर्थी रघुरामविहिता विनोदिनीनामिका,
पञ्चमी धाम्नः सर्वांशेशनदीयगुरुरत्नशाखिनिर्मिताऽऽदर्शाभिधा,

तत्रान्तिमा मूलेन सह पृथङ्मुद्रिता, द्वितीयातृतीयाचतुर्थ्यश्च समूला अस्मत्संपादिताश्चौखम्भासंस्कृतग्रन्थमालाऽभ्यन्तप्रकाशिताः सममेकत्र सन्ति,

प्रथमा च नवद्वीपस्थहरिनाथतर्कसिद्धान्तेनैव निर्माय कलिकातानगरे संमुद्र्य प्राकाशि सामान्यकाण्डान्ता,

अवशिष्टा च तदीयमध्यात्मजेन सर्वेश्वरभट्टाचार्येण परस्तात् प्रकाशं नीता; किन्तु निखिलाऽप्येषा शोधकमुद्रकाद्यनवधानतोऽत्यशुद्धिभागेव मुद्रिताऽऽसीत्, परन्तु तादृश्यप्येषा दीर्घसमयपूर्वं जातमुद्रणतयाऽवाप्तदौर्लभ्येति—

विविधप्राचीनग्रन्थप्रकाशनबद्धपरिकरेण श्रेष्ठिश्रीजयकृष्णदासगुप्तमहोदयेनास्मन्नेहास्पदेन स्वकीयविद्याविलासनामके मुद्रणालये स्वव्ययेन सोत्साहं समूलाऽसौ प्रकाशिता,

अस्या व्याख्यायाः प्रकाशनाय टीकाकर्तुः कनिष्ठतनयेन श्रीयुतकेदारेश्वरभट्टाचार्येणाधिकारो दत्तो निर्दिष्टकार्यालयाध्यक्षायेति चिरायैतदुपकारेण कृतज्ञतानद्धोऽयमित्यसकृदावेदयति,

एतन्मुद्रणार्थं च पुस्तकं श्रीपण्डितप्रवरसरयूपारीणरामेश्वरशुक्लतनूजन्मा वाराणसेयराजकीयसंस्कृतपाठशालीयपरीक्षासूत्तीर्णव्याकरणोपाध्यायन्यायाचार्यपरीक्षो विहारोत्कलसंस्कृतसमितेर्लब्धव्याकरणतीर्थसाहित्योपाध्यायपदवीकोऽयोध्यास्थविद्वत्समितेर्लब्धमीमांसकशिरोमणिपदवीभूषितः सूर्यनारायणशुक्लो दत्तवानित्येषोऽपि महाभागो धन्यवादार्हः,

टीकाकृद्विषयकमैतिह्यं चानतिचिरस्य संपिपादयिषितव्याया मुक्तिवादेदसीयटीकाया भूमिकायां निर्देक्ष्यते,

अत्र च सौकर्यार्थं विषयानुक्रमोऽपि संन्यवेशि,

एवं बहुश्रमेणावधानपुरस्सरं संपादितेऽप्यस्मिन् कार्ये मानुष्यकनान्तरीयकदोषजातत्रुटीरुपेक्ष्य; कलहंसप्रकृतयो विद्वांसः शक्तिविचारमर्मानुभवरसमास्वादयन्तुतमाम्,

प्रसीदतु चानेन व्यापारेण सर्वान्तर्यामी भगवान् गौरकृष्णतनुः श्रीश्रीराधिकारमण इत्याशासानो विरमति मुधा विस्तरादिति, शम् ।

मार्गसुदि ७
वै० सं० १९८६
काश्याम् ।

श्रीमन्माध्वसम्प्रदायाचार्यदार्शनिकसार्वभौमसाहित्यदर्शनाद्याचार्यतर्करत्नन्यायरत्न—

गोस्वामिदामोदरशास्त्री ।

श्रीश्रीगौरकृष्णः शरणम् ।

शक्तिवादविषयानुक्रमः—

तत्र सामान्यकाण्डे—

विशेषकाण्डे—

परिशिष्टकाण्डे—

विशेषसूचना—

अत्र पृष्ठादिसंख्या मूलस्यैव दर्शिता, टीकायाः क्रमस्तेनैव सुकरदर्शन इति ।

शम् ।

श्रीकृष्णः शरणम् ।
ॐ नमो गणेशाय ।

सविवृतिकः ।

शक्तिवादः ।

सामान्यकाण्डम् ।

सङ्केतो लक्षणा चार्थे पदवृत्तिः ।

ॐ नमः शिवाय ।

विवृतिः ।

शिवोऽप्युद्बुद्धशक्तिश्चेत् समर्थः स्वार्थसाधने ॥
साकाङ्क्षः शब्दवत्तेन वन्दे तं शक्तिभूषितम् ॥ १ ॥
विद्वद्वरोऽभूद् हरचन्द्रनामा तत्पुत्र आसीत् प्रथितातिकीर्त्तिः ॥
गोलोकनाथः शुचि नीरजं सद् वाणी श्रिता यद्रसनं विदित्वा ॥२॥
विचिन्त्य तत्तातपदारविन्दं विभाव्य गाढं हरिनाथनाम्ना ।
विशद्यते दुर्गमशक्तिवादः सतां प्रमोदाय गदाधरोक्तः ॥ ३ ॥

इह खलु सर्वैः शब्दैः श्रूयमाणैरपि सदा सर्वेषां न तदर्थप्रतिपत्तिः; न वा सद्यः; किन्तु कदा चित् शब्दैः केषाञ्चित् स्वल्पचिरेण जन्यते, कल्प्यते च तस्मात् तत्सम्पादिनी पदपदार्थसम्बन्धविशेषधीजनितपदार्थसार्थोपस्थितिरेव, इतरेषामन्वयव्यतिरेकानियमादिदृग्गौरवादिदोषकवलितत्वेन न तत्कल्पनसम्भवः, स च सम्बन्धविशेषः किंस्वरूप इति जिज्ञासूनामन्तेवासिनां तदवधारणार्थं तद्विशेषस्यैव स्वरूपं वाच्यमिति तं विभज्य परीक्षासहितं सामान्यतो विशेषतश्च तत्स्वरूपमाह--सङ्केतो लक्षणा चेत्यादि ।

चकारार्थः समुच्चयः, तच्च धीविशेषविषयत्वं द्वित्वं पर्यवसितं,- वृत्तिः शाब्दबोधौपयिकः सम्बन्धः, तथा चार्थप्रतियोगिकः पदानुयोगिकः, अर्थानुयोगिकः पदप्रतियोगिको वा तादृशः सम्बन्धः सङ्केतलक्षणाद्वयमित्यर्थः ।

के चित्तु-अयं ग्रन्थो न विभागपरो वृत्तित्वसामान्यधर्मस्य पूर्वाकथनेन तद्विशेषजिज्ञासाऽनुदयात्, तत्परत्वे लक्षणाया अप्यवश्यनिरूपणीयत्वेन तदनिरूपणाद् न्यूनत्वाच्च, किन्तु शाब्दबोधौपयिकसम्बन्धस्य पदार्थान्तरत्वनिराकरणकृतपदार्थस्वरूपत्वप्रदर्शनपर, लक्षणा चेत्यशस्तु दृष्टान्तार्थमित्याहु ।

तन्न शोभन-शाब्दबोधौपयिकसम्बन्धत्वरूपसामान्यधर्मस्योक्तरीत्या मनसैव सुग्रहत्वाद् विभाग उद्दिष्टधर्मस्य शब्दजन्यज्ञानमात्रानपेक्षणाच्च,

लक्षणायास्तु ग्रन्थान्तरे निरूपितत्वात् सङ्केते निरूपिते तत्सम्बन्धरूप लक्षणाया अपि स्फुटतयैव लाभादनिरूपणेऽपि न्यूनत्वाभावात् शक्तेरज्ञातत्वे शक्यसम्बन्धरूपलक्षणाया अप्यज्ञातत्वेन दृष्टान्तत्वायोगाच्चेति ।

अथ विशेषविधिनिषेधयो शेषनिषेधाभ्यनुज्ञाफलकत्वस्येवावगतसामान्यधर्मावच्छिन्नाना किञ्चित्सख्यकविशेषधर्मेणाभिधानस्याधिकसख्याऽवच्छिन्नव्यवच्छेदकतयाऽपि व्युत्पत्तिसिद्धत्वेन विभाजकधर्मे त्रित्वादिसख्याव्यवच्छेदो लभ्यते, स च न सम्भवति व्यञ्जनाया अपि वृत्तित्वावश्यकत्वाद्, अन्यथा—

"मुख विकसितस्मित वशितवक्रिम प्रेक्षितम्'

इत्यादौ परस्परविभागजनकक्रियारूपविकासस्य मुख बाधाल्लक्षितार्थस्य विस्तृतस्यान्वयबोधानन्तर मुख कुसुमतुल्यसौरभवत्ताया चमत्कृतिरमणीयताया वा बोधस्यानुभवसिद्धस्यापलापापत्तेरिति चेद् ? न—

मनसैव तत्तत्पदार्थस्य स्मृतिसहकारेण बोधनिर्वाहात् तदर्थ व्यञ्जनाया वृत्ते कल्पनानावश्यकत्वाद

न चैवं गामानयेत्यादिवाक्यानन्तर तत्तत्पदार्थोपस्थितिसहकृत मनसैव विशिष्टबोध सम्पाद्यता किं शक्त्यादि वृत्तित्वकल्पनयेति वाच्यम् ?

यत पदजन्यपदार्थोपस्थितिर्यत्र सम्बन्धान्तरज्ञानजन्यपदार्थान्तरोपस्थितिरूपा तत्र विशिष्टबोधे तादृशपदार्थान्तराभानाद् वाक्यजन्यबोधस्य नियन्त्रितविषयकत्वस्यावश्यकत्वेन तादृशबोधस्य मानसत्वायोग ,

यद्य व्यञ्जना स्वरूपसती ज्ञाता वा कारण ? तत्र नाद्य -तथा सति विकसितादिपदेन सर्वदा सर्वस्यैव व्युत्पन्नस्य तादृशबोधापत्ते, न

मु सहृदयमात्रस्य; व्यञ्जनाया अविशेषात्, इष्टापत्तावनुभवविरोधः सहृदयप्रतीयमानरूपगूढत्वस्य तादृशव्यङ्ग्येऽनुपपत्तिश्च स्यात्, नापि द्वितीयः—शक्तिग्राहकव्याकरणकोषादिवल्लक्षणाग्राहकप्रत्यक्षादिवच्च तद्ग्राहकस्य वक्तव्यत्वापातात्, ज्ञानसामान्यसामग्री तद्ग्राहिका चेत् पूर्वोक्तदोषस्य जागरूकत्वाच्चेत्यादिकं द्रष्टव्यम् ।

अर्थ इत्यनुक्तौ वृत्तित्वं शाब्दबोधानुकूलज्ञानविषयसम्बन्धत्वं; तच्च सङ्केताद्याविवाकाङ्क्षाऽऽदिज्ञानविषये तत्तत्पदाव्यवहितोत्तरत्वरूपसम्बन्धादावप्यस्ति; अतस्तत्रापत्तिवारणायार्थ इति, तथा चाव्यवहितोत्तरत्वादेरर्थप्रतियोगिकत्वाभावान्न तदापत्तिः, पचतीत्यादौ योग्यताज्ञानविषये पाकादिप्रतियोगिकानुकूलत्वादौ वृत्तित्ववारणाय पदेति, तथा च तादृशानुकूलत्वादेः पदानुयोगिकत्वाभावान्न तदापत्तिः ।

ननु वृत्तित्वं शाब्दबोधजनकोपस्थितिजनकज्ञानविषयसम्बन्धत्वमेव वक्तव्यम्; अत एव वृत्तिः शाब्दबोधौपयिकोपस्थितिजनकः पदपदार्थयोः सम्बन्धः कथ्यत इति शब्दमण्यालोके मिश्रैरभिहितम्, एवञ्च तादृशाव्यवहितोत्तरत्वादेः शाब्दबोधजनकोपस्थितिजनकज्ञानविषयत्वाभावेन न तदापत्तिरिति चेत्? न—

तथाऽप्युपस्थित्यात्मकाकाङ्क्षाऽऽदिज्ञानजनकवाक्यविषयकानुभवविषयेऽव्यवहितोत्तरत्वादौ तदापत्तिसम्भवात्,

अथ शाब्दबोधनिरूपिता या स्मृतित्वावच्छिन्नजनकता तन्निरूपिताव्यवहितोत्तरत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितावच्छेदकतावत्सांसर्गिकविषयतावत्त्वं वृत्तित्वमुच्यते ? आकाङ्क्षाज्ञानादेः शाब्दं प्रति निश्चयत्वेनैव कारणत्वं न तूपस्थितित्वेन नातः पूर्वोक्तदोष इति चेत् ?

एवमपि, वर्णाश्रितविषयकशाब्दबोधनिरूपितवर्णविषयकोपस्थितित्वावच्छिन्नजनकतानिरूपितावच्छेदकतानिरूपितावच्छेदकतावती या वर्णपदं शक्तिसम्बन्धेन वर्णवदित्यादिज्ञानीयवर्णवर्णत्वयोः सम्बन्धनिष्ठा सांसर्गिकविषयता तदाश्रयसमवायादौ वृत्तित्वापत्तिवारणायार्थ इति,

न च वर्णत्वस्यार्थपदार्थतया समवायस्यानर्थत्वमतोऽपि तन्निवेशो नापि न तद्वारणमिति वाच्यम् ?

अर्थ इत्यस्य प्रकारताऽवच्छेदकताऽवच्छेदकत्वानवच्छिन्नत्वादृशसांसर्गिकविषयत्वस्य वृत्तिघटके तात्पर्यात्,

एवञ्च तादृशज्ञानीया याऽऽनुपूर्वीपदयोः सम्बन्धनिष्ठा विषयता

तामादाय तादृशसम्बन्धे वृत्तित्वापत्तिवारणाय पदेति, अस्य च तादृशसांसर्गिकविषयतया विशेष्यताऽवच्छेदकताऽवच्छेदकताऽनात्मकत्वे तात्पर्य्येण तद्वारणं प्रतिभाति, तथा चार्थत्वादेरवच्छेदकताऽवच्छेदकत्वानवच्छिन्नतादृशसांसर्गिकविषयत्वं पर्य्यवसितार्थः ।

केचित्तु–शाब्दबोधानुकूलोऽर्थे पदस्य सम्बन्धः कीदृश ? इति जिज्ञासया तन्निरूपणं तादृशजिज्ञासानिवृत्तिस्त्वर्थपदघटितोद्देश्यबोधकपदसवलितोत्तरवाक्यं विना न भवत्यतोऽर्थ इत्यादिप्रयोजनान्तरानुसन्धानं विफलमिति प्राहुः ।

ननु सङ्केतो लक्षणा चेति विभजनं न युज्यते ? यस्मात् शाब्दबोधनियामको ज्ञातः पदपदार्थयोः सम्बन्ध इति प्राचैर्गीयते, तेन पदस्यार्थोऽभिधेयः पदार्थ इति व्युत्पत्त्या पदशक्य एव पदार्थो वक्तव्यः, अन्यथा घटादेरपि पटादिपदार्थत्वापत्तिरेवञ्च पदलक्ष्यार्थयोः सम्बन्धे वृत्तित्वं न वक्तुमर्हतीत्यत आह—वृत्त्येत्यादि ।

वृत्त्येत्यादिग्रन्थस्य पदार्थपदव्यवहारविषयनिर्वचनपरत्वमिति केषाञ्चिद्व्याख्यानं न सम्यक्,

तादृशग्रन्थस्य सामान्यतः पदार्थपदव्यवहारविषयनिर्वचनपरत्वे वस्तुमात्र एव तात्पर्येनाव्यावर्त्तकतया वृत्त्येत्यस्य व्यर्थत्वापत्तेः, गगनकुसुमादेश्चालीकत्वेन धर्मिणोऽलाभे तादृशव्यवहारविषयत्वासम्भवाच्च पदपदार्थविशेषघटितपदार्थपदव्यवहारविषयनिर्वचनपरत्वे शक्या जलप्रवाहादेरिव लक्षणया तीरादेरिव च पदार्थमात्रस्यैव जलप्रवाहकालिकादिसम्बन्धरूपलक्षणया नद्यादिपदप्रतिपाद्यत्वेन नद्यादिपदघटितपदार्थपदव्यवहारविषयत्वसम्भवेन तद्वापतादवस्थ्यात्,

यदि च यत्र यत्रार्थे आधुनिकद्वन्दादिपदानां कस्यापि पुंसस्तात्पर्यादिकं न ज्ञायते तत्र तत्रार्थे तत्तत्पदप्रतिपाद्यत्वसम्भवेन तत्तत्पदघटितपदार्थपदव्यवहारवारणाय वृत्त्येति, इत्यपि न शङ्कनीयम्,

तत्र तत्र तत्तत्पदानां तात्पर्य्यादिविरहेणैव शाब्दबोधाजननेन तदापत्त्यसम्भवेन वृत्त्येत्यस्यानावश्यकत्वात्, वृत्तिस्वरूपादिनिरूपणे पदार्थपदव्यवहारविषयनिर्वचनस्यानाकाङ्क्षितत्वेनार्थान्तरापत्तेश्च,

एतेन 'घटादिपदे गगनादेः समवेतत्वादिसम्बन्धे ज्ञानात् गगनादीपस्थितेः गगनादेः शाब्दबोधवारणाय वृत्त्येति' इति केषाञ्चित्प्रलापोऽनादेयः ।

तत्रान्यच्छाब्दबोधं प्रति वृत्त्येत्यादिवाक्यस्याप्रतियन्धकत्वाद्ध्येयमलं विस्तरेण ।

वृत्त्या पदप्रतिपाद्य एव पदार्थ इत्यभिधीयते । इदम्पदमिममर्थं बोधयत्वितिः अस्माच्छब्दादयमर्थो बोद्धव्य इति वेच्छा; सङ्केतरूपा वृत्तिः ।

तत्राधुनिकसङ्केतः परिभाषा; तया चार्थबोधकं पदं पारिभाषिकं यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदम् ।

वृत्त्येति । संकेतलक्षणाऽन्यतरसम्बन्धेनेत्यर्थः ।

अभिधीयते; इत्यनन्तरं प्राचीनैरिति शेषः अतो लक्षणा चेत्यस्य न तादृशगाथया विरोध इति भावः ।

ननु सङ्केतस्येच्छारूपस्य संसर्गत्वं कुतः तस्य निष्प्रतियोगिकत्वात् कुतो वा घटपदस्य सङ्केतो घटे न तु पटादाविरयादि नियमोपपत्तिरीश्वरेच्छायाः सर्व्वं प्रति तुल्यत्वाद् ? इत्यतस्तस्य विषयविशेषघटितत्वेन सप्रतियोगिकत्वं नियामकत्वञ्चोपपादयन्नाह–इद पदमिति ।

बोधयत्वित्यत्र णिजर्थो बोधान्वयिजनकत्वं, तथा चैतत्पदविशेष्यकैतत्पदार्थविषयकबोधजनकत्वप्रकारकेच्छा तद्वाक्याभिलाप्या, विनिगमनाविरहेणार्थविशेष्यकेच्छाया अपि तथात्वमाह— अस्माच्छब्देति ।

शब्दादित्यत्र पञ्चम्यर्थो जन्यत्वं, तस्य च बोद्धव्येत्यत्र बुधधात्वर्थेऽन्वयः, तव्यप्रत्ययार्थो विषयरूपकर्म्म तथा चैतच्छब्दजन्यबोधविषयत्वप्रकारकार्थविशेष्यकेच्छालाभः ।

इदमत्रावधातव्यं–यत्र विनिगमनाऽस्ति तत्रैकविध एव सङ्केतः प्रयोजकः, यथा पुष्पवन्तपदादौ पदविशेष्यक एव, एतस्योपलक्षणत्वेन च यत्रोभयविधसङ्केतेन न निर्वाहः तत्र बोधादिविशेष्यक एव प्रयोजकः यथा तदादिपदादौ ।

सङ्केतं विभजते–तत्रेति । सङ्केतमध्य इत्यर्थकम् ।

आधुनिकेति । जन्येत्यर्थः ।

परिभाषा=परिभाषापदार्थः ।

एतेन सङ्केतमात्रं शक्तिः, परिभाषा तूभयावृत्तिधर्म्मावच्छिन्नसङ्केतरूपशक्तिविशेष एवेति मतं नाभिप्रेतमिति सूचितम् ।

नन्वाधुनिकसङ्केतः परिभाषापदार्थो न वक्तुं शक्यते ? उभयावृत्तिधर्म्मावच्छिन्नसङ्केतवत्पदस्य पारिभाषिकत्वेन तत्पदसङ्केतस्यैव परिभाषात्वादित्याशङ्कयाह—तया चेति ।

ईश्वरसङ्केतः शक्तिः; तया चार्थबोधकं पदं वाचकं; यथा गोत्वादिविशिष्टबोधकं गवादिपदं तद्बोध्योऽर्थो गवादिर्वाच्यः स एव मुख्यार्थ इत्युच्यते ।

वाच्यवाचकादिपद ईश्वरेच्छाया बोधजनकत्वेन या विषयता सैव धात्वर्थः; तस्या आश्रयत्वरूपं कर्तृत्वं पदे कर्तृप्रत्ययेन बोध्यते, पदं गां वक्ति गां ब्रूते गोर्वाचकमित्यादौ कर्मप्रत्ययान्तेनार्थवाचकपदेन तत्तदर्थविषयकत्वरूपतत्तत्कर्मकत्वं धात्वर्थैकदेशे बोधे बोध्यते; पदेन गौरुच्यते पदस्य गौर्वाच्य इत्यादौ पदनिष्ठात्वर्थीभूततादृशविषयतायाः परम्परया निरूपकत्वं, तच्च धात्वर्थीभूततादृशविषयतानिरूपकबोधजनकत्वप्रकारतान्तःपातिबोधनिष्ठविषयतानिरूपकविषयितासम्बन्धावच्छिन्नप्रकारताऽऽश्रयत्वरूपं तादृशक्रियाकर्मत्वं गवादौ कर्मप्रत्ययेन बोध्यते ।

तथा च तस्य मतविशेषसिद्धत्वेन नैतन्मते दोष इति भाव. । परिभाषया बोध्योऽर्थः परिभाषित. परिभाष्यो वेति ।

शक्तिं निर्वक्ति-ईश्वरसङ्केतइति ।

अत्रेश्वरपदस्य नित्यत्वपरिचायकतया नित्यसकेत. शक्तिरित्येवार्थो-बोध्यः ।

एतेनेश्वरस्य नित्यज्ञानवत्त्व जगत्कर्तृत्व चेति वक्तव्यम् , अतस्तद्घटितसङ्केतत्वस्य महागौरवेण वच्यादिधातो. शक्यताऽवच्छेदकत्वासम्भवेन नित्यसङ्केतः शक्तिरित्येव वक्तुमुचित स्यादित्यपि परास्तम् ।

न चेश्वरीयत्वमनुपादेयमेवेत्यग्रिमग्रन्थविरोध इति वाच्यम् ?

तत्रापीश्वरीयत्वपदस्य नित्यत्वपरत्वादिति ।

गवादिशब्दानां वाचकपदप्रतिपाद्यत्वं गवादेर्वाच्यशब्दप्रतिपाद्यत्वञ्च योगेन समर्थयते-वाच्यवाचकादिति ।

पदे इत्यत्र सप्तम्यर्थो घटकत्वं, तस्य च धात्वर्थ इत्यस्य घटकधातावन्वय, ईश्वरेच्छाया इत्यत्र षष्ठ्यर्थो निरूपितत्वं बोधजनकत्वेनेत्यत्र तृतीयाया प्रकारतानिरूपितत्वरूपवैशिष्ट्यमर्थः, उभयञ्च विषयतेत्यत्रान्वेति, तथा चेश्वरेच्छानिरूपिता या बोधजनकत्वप्रकारतानिरूपितविषयता सैव वाच्यवाचकादिघटकीभूतधा-

त्वर्थ इत्यन्वयबोधः,

तस्या इति । बुधधात्वर्थतादृशविषयताया इत्यर्थः ।

कर्तृत्वं=कर्तृविहितप्रत्ययेन विवक्षितम् ।

पद इत्यत्र बुधधात्वर्थबोधान्वयिविशेष्यत्वं सप्तम्यर्थः, तस्य च पारतन्त्र्येणाख्यातार्थप्रकारतायामन्वयः कर्माख्यातार्थप्रकारत्वं कर्तृत्वमन्वेति, एवञ्च तादृशविषयतानिरूपिताश्रयत्वस्वरूपं कर्तृप्रत्ययेन विवक्षितं, पदनिष्ठविशेष्यतानिरूपितकर्तृप्रत्ययजन्यबोधीयप्रकारत्वाश्रय इति शाब्दधीरिति ।

आश्रयत्वरूपमित्याद्युपलक्षणं तेन कर्तृविहितकृताऽऽश्रयरूपकर्तृबोधनेऽपि न क्षतिः ।

कर्मप्रत्ययान्तेन=गामित्यादिना ।

बोध इत्यत्र सप्तम्यर्थो विशेष्यत्वं; तस्य च बोध्यत इत्यत्र धात्वर्थेऽन्वयः; तथा च पदं गां वक्तीत्यादिवाक्यतो गोविषयकबोधजनकत्वप्रकारतानिरूपितेश्वरेच्छीयविषयताऽऽश्रयत्ववत् पदमित्याद्यन्वयबोधः, तच्च=तादृशविषयतायाः परम्परया निरूपकत्वञ्च ।

तादृशेति । बोधजनकत्वनिष्ठप्रकारतानिरूपितेश्वरेच्छीयेत्यर्थः ।

बोधजनकत्वप्रकारेति । बोधजनकतात्वावच्छिन्नप्रकारेत्यर्थः ।

ननु जनकत्वप्रकारेत्यनेनैव चरितार्थत्वे बोधेति व्यर्थमिति चेद्?

अत्र केचिद्-बोधेति सम्पातायातमिति प्राहुः ।

परे तु-जनकत्वं नियताव्यवहितपूर्ववर्त्तित्वं, तच्च सामान्यतोऽप्रसिद्धमतो बोधेत्यावश्यकमिति व्याचक्षते ।

तादृशप्रकारताऽन्तःपातित्वं=तादृशप्रकारत्वावच्छिन्नविशेष्यतानिरूपकत्वम्,

परे तु-तादृशाऽन्तःपातित्वं=तादृशप्रकारताव्यापकत्वं बोधाव्यवहितपूर्ववर्त्तित्वप्रकारताव्यापकत्वं बोधविषयताया अक्षतमित्याहुः ।

बोध्यत इति । तथा च पदेनेत्यादौ तृतीयाऽऽद्यर्थो धात्वर्थतादृशविषयताऽन्वयि वृत्तित्वं, एवञ्च पदनिष्ठं यद् बोधजनकत्वप्रकारतानिरूपितेश्वरेच्छीयविशेष्यत्वं तन्निरूपकं जनकत्वनिष्ठप्रकारतान्तःपातिबोधनिष्ठविषयतानिरूपकविषयत्वसम्बन्धावच्छिन्नं यद्विषयत्वं तदाश्रयो गौरित्यन्वयबोधः ।

परस्य गौरित्यादिवाक्यवस्तु-पदनिष्ठा या बोधजनकत्वप्रकारताकेश्वरेच्छीयविशेष्यता तन्निरूपकजनकत्वनिष्ठविषयत्वावच्छिन्नविषयतानिरूपकबोधनिष्ठविषयतानिरूपकविषयत्वसम्बन्धावच्छिन्नविषयताऽऽ—

द्वितीयेच्छायाः सङ्केतरूपत्वे वैपरीत्यमूह्यमिति न्यायसिद्धान्तः ।

अत्र मीमांसकानुयायिनः—अपभ्रंशादपि शक्तिभ्रमेणार्थमत्यवात् सन्मात्रविषयके भगवत्सङ्केते तस्यापि बोधकत्वेन विषयत्वमिति नैयायिकैरभ्युपगमात्तस्यापि वाचकत्वं साधुत्वञ्च स्याद् ?

एवं लाक्षणिकगङ्गाऽऽदिपदस्योक्तयुक्त्या तीरादिवाचकत्वापत्तिः?

श्यामिन्नो गौरित्यन्वयधीरिति ।

द्वितीयेच्छाया इति ।

अत्र जन्यबोधविषयत्वनिष्ठप्रकारताकेश्वरेच्छीया विशेष्यता सैव घच्यादिवाच्यत्वार्थः ।

वैपरीत्यमिति । तादृशविशेष्यतायाः परम्परया निरूपकत्वं कर्तृत्वं, तच्च=तादृशविशेष्यतानिरूपकविषयत्वनिष्ठप्रकारत्वावच्छिन्नविशेष्यताकबोधनिष्ठप्रकारत्वावच्छिन्नविशेष्यतानिरूपकजन्यतासम्बन्धावच्छिन्नप्रकारताऽऽश्रयत्वं कर्तृप्रत्ययेन बोध्यते, तादृशविशेष्यताऽऽश्रयत्वं कर्मत्वं कर्मप्रत्ययबोध्यमिति भावः ।

न्यायसिद्धान्त इति । न्यायग्रन्थकर्तृभिरभ्युपगतोऽर्थ इत्यर्थकम् ।

अत्रेति । शक्तिपदार्थजिज्ञासायामित्यर्थः ।

मीमांसकानुयायिन इति । अस्यागामिना वदन्तीत्यनेनान्वयः ।

शक्तिपदार्थं पदपदार्थयोरतिरिक्तसम्बन्धरूपं साधयितुमादौ न्यायमतं दूषयति—अपभ्रंशादपीत्यादि ।

अपभ्रंशात्=शक्तिशून्यत्वे सति व्यवहाराधीनगृहीतशक्तिकाद् गाच माच इत्यादिशब्दात् ।

सन्मात्रविषयक इति । अत्र मात्रपदं कार्त्स्न्यार्थकं, तेन वस्तुत्वव्यापकविषयताक इत्यर्थः । सङ्केत इत्यत्र सप्तम्यर्थो विषयत्वान्वयित्वनिरूपितत्वम् ।

अभ्युपगमादिति । अवश्य स्वीकरणीयत्वादित्यर्थः, अशक्यापह्नवत्वेनेति भावः ।

नन्वपभ्रंशशब्दस्य वाचकत्वाङ्गीकारे का क्षतिरित्यत आह—

साधुत्वञ्चेति । तच्च=शक्तिभ्रमानधीनशाब्दबोधजनकत्वं, व्याकरणनिष्पादितत्वमिति केचित्, एवञ्च साधुभिर्भाषितव्यमित्यादिविधिविरोधेन यज्ञादौ तत्प्रयोगेऽनिष्टं न स्यात् प्रायश्चित्तविधेश्च वैयर्थ्यं न स्यादिति भावः ।

यत्तु—तादृशेच्छया भगवदुच्चरितत्वं वाचकत्वम्, अपभ्रंशादयश्च नार्थमत्यायनेच्छया भगवदुच्चरिता इति नातिप्रसङ्ग इति,

तन्न—अस्मदाद्युच्चरितपदेष्वव्याप्तेः तज्जातीयत्वनिवेशेऽपि वेदस्थ-

---

दोषान्तरमाह—

एवमिति । गङ्गाऽऽदिपदानां तीरादिमुख्यार्थकत्वापत्त्या लक्षणामात्रोच्छेदापत्त्या च तस्य स्वीकर्तुमशक्यत्वादिति भावः ।

मिश्रमतं दूषयितुमुपन्यस्यति—

यत्त्विति । तादृशेच्छयेति । अस्माच्छब्दादित्याद्याकारकेच्छयेत्यर्थः । एवञ्च यादृशशब्दजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितयदर्थनिष्ठविशेष्यताकेच्छया भगवदुच्चरितत्वं यस्य यस्य तत्तत्पदस्य तत्तदर्थवाचकत्वं, तेन घटादिशब्दस्य न पटादिवाचकत्वापत्तिर्न वा गाव्यादिशब्दादेर्गमञ्जतीति किपि निष्पन्नस्य गणपतिप्रापकाद्यर्थस्य वृक्षार्थे तदापत्तिः, उच्चरितत्वञ्च=कण्ठताल्वाद्यभिघातजन्यत्वम्, ईश्वरस्तु सर्गादौ नियोज्यनियोजकशरीरे परिगृह्य लोकानां शब्दसङ्केतज्ञापनार्थं तादृशेच्छया साधुशब्दानेव प्रयुक्तवानिति न्यायसिद्धान्तादिति भावः ।

अपभ्रंशादयश्चेति । आदिना लाक्षणिकादिपरिग्रहः ।

तज्जातीयत्वेति । यादृशशब्दजन्यबोधविषयत्वप्रकारताकयदर्थनिष्ठविशेष्यताकेच्छया भगवदुच्चरिता यादृशानुपूर्वीमच्छब्दाः तादृशानुपूर्वीमत्त्वं तज्जातीयत्वं तदेव तदर्थवाचकत्वमिति तु फलितार्थः, तादृशानुपूर्वी चाव्यवहितोत्तरत्वसम्बन्धेन घविशिष्टाकारविशिष्टटविशिष्टाकारत्वादिरूपा घटादिपदनिष्ठा भगवदुच्चरितपद इवास्मदाद्युच्चरितपदेऽप्यस्ति,

नन्वेतादृशानुपूर्व्या अपि पूर्वपूर्ववर्णघटितत्वेनेश्वरोच्चरितानुपूर्व्या अस्मदुच्चरितपदे सत्त्वं न सम्भवतीति चेद् ?

न—अव्यवहितोत्तरत्वसम्बन्धेन घत्वावच्छिन्नविशिष्टत्वावच्छिन्नविशिष्टत्वावच्छिन्नविशिष्टत्वादिरूपायास्तस्या भगवदुच्चरितपद इवास्मदाद्युच्चरितपदेऽपि सत्त्वे बाधकाभावात्, तस्याः स्वाश्रयाव्यवहितोत्तरवृत्तिवृत्तित्वसम्बन्धेन घत्वादिविशिष्टत्वादिरूपत्वाद्वा,

ननु तादृशानुपूर्व्याः चरमवर्ण एवातः पूर्ववर्णे तद्वाचकत्वानुपपत्तिरिति चेद् ?

न—तादृशतादृशोत्तरवर्णस्यैव वाचकत्वस्वीकाराद्, उत्तरोत्तरवर्णविशिष्टपूर्वपूर्ववर्णत्वस्याप्यानुपूर्वीत्वसत्त्वाच्चेति,

लाक्षणिकेष्वतिव्याप्तेः सादिदेवदत्तादिपदेऽव्याप्तेश्च द्वादशेऽह्नि पिता नाम कुर्य्यादिति वेदे नामपदस्य देवदत्तादिपदपरत्वेऽपि देवदत्तादिस्वरूपाणां भगवदनुच्चरितत्वात् ।

नन्वु तथाऽपि तादृशानुपूर्व्या एकवर्ण एव सत्त्वेन दशाब्दो घटवाचक इतिव्यवहारापत्तिरिति चेत् ?
मैवं-वाचकपदार्थतावच्छेदकरूपायास्तादृशानुपूर्व्याः पारतन्त्र्येणाभेदेनोद्देश्यतावच्छेदके मानोपगमाद्, एवं च शुद्धत्वे तादृशानुपूर्व्या अभेदबाधान्न तादृशव्यवहारापत्तिः, स्वावच्छिन्नप्रकारतावच्छेदकत्व सम्बन्धेन मानोपगमाद्वा, सूक्ष्मदोषाश्च पर्य्याप्तिनिवेशेनैव वारणीया इति ध्येयम् ।

वेदस्थलाक्षणिकेष्विति । आयुर्घृतम आदित्यो यूप इत्यादावायुरादित्यादिपदेष्वित्यर्थः । अतिव्याप्तेरिति । आयुर्जनकादित्यसदृशप्रत्यायनेच्छया तत्तत्पदानां भगवदुच्चरितत्वेन तत्तदर्थे वाचकत्वापत्तेरित्यर्थः ।

नन्वु तादृशेच्छया भगवदुच्चरितत्वमित्यत्रेच्छांशे विषयतया विशेषणताऽऽपन्नपदनिष्ठजनकत्वमुपस्थितिरूपव्यापारद्वारा वाच्यम्; अन्यथाऽऽकाङ्क्षाज्ञानविषया वाक्यनिष्ठजनकतामादाय सिद्धान्तेऽपि वाक्येऽतिव्याप्त्यापत्तिरेतच्चाग्रे स्फुटीभविष्यति,

एवञ्च तदुपस्थितिमूलोपस्थितौ शक्यविषयतानिरूपितसम्बन्धविषयत्वाप्रयोज्यत्वनिवेशे लाक्षणिकपदेषु नातिव्याप्तिरिति यदि विभाव्यते? तदाऽप्याह—

सादीति ।

सादित्वञ्च=तत्तदर्थकतत्पदजातीयस्वसमानकालीनप्रागभावप्रतियोगित्वम् ।

अव्याप्तेरिति । देवदत्तादिपदानां पुत्रादिबोधजननेच्छया पित्रादिनोच्चारणाद् न त्वीश्वरेणेति भावः ।

नन्वु द्वादशेऽहनि पिता नाम कुर्य्यादिति नामकरणविधायकश्रुतौ नामपदस्य देवदत्तादिपदपरत्वं वाच्यम् ? अन्यथा तेषामलक्ष्यतयैवाव्याप्तिशङ्का न स्यादेवञ्च तेषु कुतो नेश्वरोच्चारितत्वमित्यत आह— द्वादश इत्यादि ।

तच्छ्रुतिकदेवदत्तादिपदानामिदं पदमिममर्थं बोधयत्वित्याका-

एवमीश्वरसङ्केतस्य शक्तित्वे ईश्वरानङ्गीकर्तृमते शाब्दबोधानुपपत्तिः,

---

वस्तुतस्तु-नामपदम् इच्छाविशिष्टपदत्वसमानाधिकरणधर्मावच्छिन्नपरम्, अध्याहार्यञ्च पुत्रस्येति, तत्र पुत्रपदं पुत्रत्वसमानाधिकरणधर्मावच्छिन्नपरं, षष्ठ्यर्थश्च बोधजनकत्वरूपसम्बन्धः तथा चेष्टसाधनीभूता या पुत्रत्वसमानाधिकरणधर्मवद्बोधजनकतावदिच्छावत्पदत्वसमानाधिकरणधर्मावच्छिन्नविषयिणी कृतिः तद्वान् पितेत्यन्वबोध, इच्छावत्ता च स्वसमानाधिकरणकृतिप्रयोज्योच्चारणकत्वस्वसमानाधिकरणपितृत्वनिरूपितपुत्रत्वसमानाधिकरणधर्मावच्छिन्नविषयित्वसम्बन्धावच्छिन्नप्रकारतानिरूपितबोधत्वावच्छिन्नविषयताकजनकत्वस्वावच्छिन्नविषयताकपदत्वसमानाधिकरणधर्मावच्छिन्नविशेष्यतात्वस्वोभयसम्बन्धेन, स्वद्वयमिच्छापरम्,

अथ वा-इच्छावत्ता च स्वसमानाधिकरणकृतिजन्योच्चारणकत्वस्वावच्छेदकशरीरावच्छिन्नपितृत्वनिरूपितजन्यतावच्छरीरत्वस्वोभयसम्बन्धेन, स्वद्वयमिच्छापरं, शरीरवत्त्वञ्च स्वोत्पत्त्यधिकरणदिनाधिकद्वादशादिनाधिकरणकत्व—स्ववृत्तिपृथिवीत्वव्याप्यजात्यवच्छिन्नविषयित्वसम्बन्धावच्छिन्नप्रकारत्वं यत् तन्निरूपितबोधत्वावच्छिन्नविषयताकजनकत्वविषयताकताद्दशविशेष्यतात्वस्वोभयसम्बन्धेन, स्वद्वयं शरीरपरम्,

एवञ्चेच्छाविशिष्टनाम्नो विधेयत्वेन पितुरपि ताद्दशसङ्केतआवश्यकः,

एतेन पितृत्वपुत्रत्वयोरननुगतत्वे वाक्यभेदापत्तिः, अनुगतत्वेऽन्यदीयपुत्रस्यान्येन नामकरणेऽपि न वेदार्थबाध इत्यपि निरस्तम्, भगवतो बुबोधयिषया पुत्रत्वसमानाधिकरणधर्मावच्छिन्नविषयकबोधजनकत्वस्य ताद्दशनामत्वसमानाधिकरणधर्मावच्छिन्नांशेऽवगाहनात् तेषां वाच्यवाचकभावसिद्धिश्चेति द्रष्टव्यम्।

विधिवाक्ये द्वादश इत्यत्रैकादश इति पाठ इति केचित्।

ईश्वरसङ्केतस्य शक्तित्वे दोषान्तरमाह-एवमिति।

ईश्वरानङ्गीकर्तृमत इति। तन्मते ज्ञाने नित्यत्वस्य कर्तृत्वे जगज्जनकत्वस्य वा बाधेन नित्यज्ञानादिमदात्मरूपेश्वरत्वघटितज्ञानस्येच्छायां विषयत्वबाधेन वा नित्यसङ्केतज्ञानस्यासम्भवात् व्युत्पन्नानां शाब्दबोधानुपपत्तिरिति भावः।

अथ शाब्दबोधोपयोगितायामीश्वरीयत्वमनुपादेयमेव,

एवञ्चाधुनिकसङ्केतज्ञानादपि शाब्दबोधस्तादृशसङ्केतस्य वृत्तित्वञ्च निर्व्वहति,

न चाधुनिकसङ्केतस्य वृत्तित्वे तात्पर्य्यस्यापि तथात्वप्रसङ्गः; तस्यापि बोधकत्वेन पदविषयकतया सङ्केतरूपत्वात्, न चेष्टापत्तिः; तथा सति लक्षणास्थलेऽपि तात्पर्य्यस्य वृत्तितया लक्षणाया वृत्तित्वोच्छेदप्रसङ्गादिति वाच्यम् ?

यतः पदार्थोपस्थितिव्यापारकः सङ्केतो वृत्तिः, तात्पर्य्यज्ञानञ्च

नन्वीश्वरसङ्केतस्य शक्तित्वेऽपि शाब्दबोधं प्रति सङ्केतज्ञानत्वेन कारणत्वं वाच्यं न तु तत्रेश्वरीयत्वं प्रवेश्यते गौरवात्प्रयोजनविरहाच्च कुतस्तदनुपपत्तिरित्याशङ्कते ?

अथेति ।

एतच्च वदतो व्याघातशङ्कामात्रं, तेन पूर्व्वदोषान्तरसत्त्वेऽपि न क्षतिः ।

शाब्दबोधोपयोगितायामिति । शाब्दबोधकारणतावच्छेदककोटावित्यर्थः । एवञ्च=कारणतावच्छेदकतयेश्वरीयत्वस्याप्रवेशे चेत्यर्थः ।

आधुनिकसङ्केतज्ञानादपीति । तादृशसङ्केतज्ञानस्यार्थविषयकबोधजनकत्वप्रकारताकेच्छीयविशेष्यताप्रकारकपदनिष्ठविशेष्यताशालिनिश्चयत्वरूपकारणतावच्छेदकाक्रान्तत्वादिति भावः । वृत्तित्वं=शाब्दबोधौपयिकसम्बन्धत्वम् । निर्व्वहतीति । तथा च परिभाषात्वेन सङ्केतविभजनमपि नासङ्गतमिति । तात्पर्य्यस्यापि=तात्पर्य्यसमुदायस्यापि, तेन शक्तिज्ञानत्वेन कारणत्वपक्षेऽपीश्वरतात्पर्य्यस्य वृत्तित्वप्रसङ्गेऽपि न क्षतिः, तथा सति=तात्पर्य्यस्य वृत्तित्वस्वीकारे सति, वृत्तित्वोच्छेदेति । गङ्गायां घोष इत्यादौ गङ्गापदं तीरं बोधयत्वित्याद्याकारकवक्तृतात्पर्य्यस्य वृत्तिरूपतया तज्ज्ञानोपस्थापितस्य तीरादेः शाब्दबोधनिर्व्वाहेण किमर्थं लक्षणाया वृत्तित्वं कल्पनीयमिति, तथा च लक्षणोच्छेदरूपानिष्टापत्तेः तादृशापत्तेरयोगादिति भावः ।

तात्पर्य्यज्ञानस्य सङ्केतरूपवृत्तिज्ञानरूपत्वेऽपि तस्याव्यवधानेन शाब्दबोधजनकतया पदार्थोपस्थितिद्वारा जनकस्य वृत्तिज्ञानस्य कारणत्वस्याचरितार्थत्वेन स्वतन्त्रकारणत्वमावश्यकमिति समाधत्ते—यत इति । वृत्तिरिति । शाब्दबोधजनक इत्यर्थः । तथा चादौ पदपदार्थयोः

साक्षादेव शाब्दबोधोपयोगि, न तु पदार्थोपस्थितिद्वारा, इत्युपस्थापितपदार्थ एव प्रकरणादिना वक्तृतात्पर्य्यावधारणात्, तथा च लक्षणाया वृत्तित्वानभ्युपगमे गङ्गादिपदात्तीराद्यनुपस्थितौ, तत्र तत्पदव्यक्तेस्तात्पर्य्यग्रहाच्छाब्दबोधानुपपत्तिरिति तस्या वृत्तित्वमावश्यकम्,

न च तात्पर्य्यग्रहार्थं लक्षणाऽधीनोपस्थितेरपेक्षितत्वेऽपि तदधीनोपस्थितित्वेन शाब्दबोधहेतुत्वे मानाभावात् तस्या वृत्तित्वासिद्धिः, लक्षणास्थले तात्पर्य्यात्मकसङ्केताधीनोपस्थितित एव शाब्दबोधनिर्व्वाहादाधुनिकसङ्केतस्थले तात्पर्य्याधीनोपस्थितेः शाब्दबोधप्रयो-

---

सम्बन्धरूपसङ्केतज्ञानं ततस्तज्जन्यपदार्थस्मरणं ततश्च शाब्दबोधः फलम्।

ननु तात्पर्य्यज्ञानस्य पदार्थोपस्थितिद्वारा कुतो न कारणत्वं, येन लाघवं स्यात्, क्षणविलम्बस्य शपथमात्रनिर्णेतव्यत्वात्? इत्यत आह—

इत्युपस्थापितेति।

एवकारेण सम्बन्धान्तरज्ञानोपस्थापितव्यवच्छेदः, एवञ्च तात्पर्य्यज्ञानात् पूर्व्वं वृत्तिज्ञानजन्योपस्थितेरावश्यकत्वेन न तद्द्वारा तस्य जनकत्वसम्भव इति भावः।

प्रकरणादिनेति। प्रकरणं=भोजनपरिधानादिव्यापारविशेषः, तथा च घटमानयेत्यादौ शकपटादिसाहचर्य्यादिसम्बन्धरूपलक्षणाग्रहात्पटाद्युपस्थितौ घटपदमिदं वक्तुः पटविषयकबोधजनकतयेच्छाविषयतावत् पटानयननिर्व्वाहपरिधानादिव्यवहारप्रवृत्तिप्रयोजकोच्चारणकत्वादिसाध्यनुमानादिरित्यर्थः, आदिना मुखव्यापाराद्युपरिग्रहः।

ननु सङ्केतलक्षणाऽन्यतरसम्बन्धज्ञानाधीनोपस्थितपदार्थविषयकतात्पर्य्यज्ञानस्य शाब्दबोधहेतुत्वे विशिष्टबुद्ध्यात्मकतात्पर्य्यज्ञानस्य सम्पादकतया विशेषणस्य पदार्थस्य लक्षणाऽधीनोपस्थितेरपेक्षणेऽपि शाब्दबोधं प्रति लक्षणाऽधीनोपस्थितित्वेन कारणत्वाकल्पनात्, लक्षणायाः शाब्दबोधजनकोपस्थितिप्रयोजकसम्बन्धरूपवृत्तित्वं न सम्भवति, सम्भवेत् वा तात्पर्य्यज्ञानानन्तरं तद्रूपसङ्केतग्रहाधीनोपस्थितितः शाब्दबोध इत्याशङ्कते?

न चेति।

जकतायाः क्लृप्तत्वादिति वाच्यम् ?

लक्षणाधीनपदार्थोपस्थितस्थले मुख्यार्थबाधादिना तत्तदर्थे तत्तत्पदव्यक्तेस्तात्पर्य्यग्रहउपस्थित्यन्तरमन्तरेणैव तत्तदर्थानुभवस्य सर्व्वानुभवसिद्धत्वात्, आधुनिकसङ्केतस्थले पूर्व्वसङ्केतकर्तृपुरुषवाक्यतोऽर्थविशेषे डित्थादिपदस्य सङ्केतग्रहात्तत्तत्पदेनार्थविशेषोपस्थितौ प्रकरणादिना तत्तत्पदव्यक्तेस्तत्र तात्पर्य्यग्रहे सति शाब्दबोधस्य वृत्त्यन्तराधीनोपस्थितिमन्तरेणैवोत्पत्त्या आधुनिकसङ्केतस्य वृत्तित्वमिति चेद् ?

एवमपि सङ्केतस्य सम्बन्धत्वे मानाभावेन निष्प्रतियोगिकतया

ननु तात्पर्य्यज्ञानाधीनोपस्थितितः शाब्दबोधस्य क्वचिदभ्युदये-नानुभवविरोधात् कुतस्तत्कल्पनम् ? इत्यत आह—

आधुनिकेति । सर्व्वानुभवसिद्धत्वादिति ।

तात्पर्यज्ञानाव्यवहितोत्तरशाब्दबोधजननस्य सर्व्वानुभवविषयत्वेन गङ्गायां घोष इत्यादौ तात्पर्यज्ञानानन्तरं तीराद्युपस्थितिं प्रकल्प्य शाब्दबोधकल्पने सर्व्वानुभवविरोध स्याद्, यत्र न सर्व्वानुभवविरोधस्तत्र क्षणविलम्बस्य स्वीकारे न दोष, लाघवमपि साधकं तत्रैव, तथा च तदुपपत्त्यर्थं लक्षणाया वृत्तित्वमावश्यकमिति भावः ।

ननु तात्पर्यस्यावृत्तित्वे आधुनिकसङ्केतस्य कथं वृत्तित्वम् ? इत्यत-आह—

आधुनिकेति । वाक्यत इति ।

"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृग" इति वाक्याद्, "यूरुद्याख्यो नदी" त्यादिवाक्याच्चेत्यर्थः । अर्थविशेषे=काष्ठमयहस्त्यादौ ।

ननु शाब्दबोधकारणतायामीश्वरीयत्वानुपादान ईश्वरानङ्गीकर्तृमते सङ्केतकर्तृपुरुषवाक्यतो डित्थादिपदानां सङ्केतग्रहात् शाब्दबोधो जायतां, गवादिपदानां वेदस्थापरपदानाञ्च सङ्केतकर्तृपुरुषाभावात् तेभ्यः कुतः शाब्दबोध इति चेद् ?

न-पूर्व्वाचार्यकपिलकमलासनादीनां तत्तत्सङ्केतकर्तॄणां वाक्यतस्तेषां सङ्केतग्रहेण वा तेभ्यः शाब्दबोधजननादिति हृदयम् ।

एवमपीति । शाब्दबोधोपयोगितायामीश्वरीयत्वानुपादानेन ईश्वरानङ्गीकर्तृमते शाब्दबोधसम्भवेऽपीत्यर्थः ।

तदसम्भवेन च पदार्थोपस्थापकत्वासम्भवेन वृत्तित्वानिर्व्वाहाद्

एतेन शाब्दबोधौपयिकसम्बन्धत्वेनेश्वरसंकेतज्ञानं हेतुः, तच्च मीमांसकानामपि सम्भवति तादृशज्ञानविरोधिविपरीतज्ञानाभावादित्यपि निरस्तम् ।

यत्तु—स्वजन्यज्ञानविषयत्वप्रकारकेच्छाविशेष्यत्वमर्थे पदसम्बन्धः; पदे चार्थस्य विपरीतः, अस्य सम्बन्धत्वमन्यथाऽनुपपत्त्या क-

---

ननु शाब्दबोधस्य पूर्वोक्तकादाचित्कत्वान्यथाऽनुपपत्त्या फलतस्य तस्य तत्प्रयोजकसम्बन्धत्वकल्पनमावश्यकं तस्यातिरिक्तत्वकल्पने धर्मिकल्पनातो हि वरं धर्मकल्पनमित्यादिन्यायेन गौरवमापद्यते, ज्ञानादेश्च तथात्वेऽतिप्रसङ्गः स्यादतो लाघवज्ञानादिसहकृततादृशान्यथाऽनुपपत्तिरेव तस्य सम्बन्धत्वकल्पने मानम् ? इत्यत आह—

निष्प्रतियोगिकत्वेति ।

तथा च सम्बन्धत्वकल्पने सम्बन्धत्वाभावव्याप्यतया निष्प्रतियोगिकत्वज्ञानमेव बाधकमिति भावः ।

निष्प्रतियोगिकत्व=प्रतियोगित्वनिरूपकत्वाभाव, प्रतियोगित्वञ्चानुभवसिद्धः स्वरूपसम्बन्धविशेष, घटादाविव सङ्केतेऽपि सप्रतियोगिकत्वं नानुभवसिद्धमिति । एतेनेति । सङ्केतस्य सम्बन्धत्वाभावेनेत्यर्थः । अस्य च निरस्तमित्यनेनान्वयः । तच्चेति । शाब्दबोधौपयिकसम्बन्धत्वेन ज्ञानञ्चेत्यर्थः । मीमांसकानामिति । न्यायमते धर्मिणीश्वरसङ्केते, तन्मते पदपदार्थयोरतिरिक्तसम्बन्धे, तथा च धर्मिणि विवादेऽपि तादृशधर्मे विवादाभावेन तन्मतसाधारण्यादित्याशयः । तत्र बाधकाभावरूपहेतुमाह,—तादृशज्ञानेति । शाब्दबोधौपयिकसम्बन्धत्वज्ञाने इत्यर्थः । स्वजन्येति । स्व पदघटक, तथा च जन्यत्वनिष्ठविषयताकबोधनिष्ठविषयताकविषयत्वनिष्ठप्रकारतानिरूपितस्वेच्छीयविशेष्यत्व पदप्रतियोगिकोऽर्थानुयोगिकः सम्बन्धः ।

विपरीत इति । स्वनिष्ठेच्छीयविशेष्यतानिरूपितविषयत्वनिष्ठप्रकारताकबोधनिष्ठप्रकारताकजन्यत्वनिष्ठप्रकारताकनिरूपितत्वसम्बन्धावच्छिन्नप्रकारत्वम्, यद्वा स्वविषयकबोधजनकत्वप्रकारतापेच्छाविशेष्यत्वं सम्बन्धः; अर्थप्रतियोगिकः पदानुयोगिक इत्यर्थः ।

अन्यथाऽनुपपत्त्या=शाब्दबोधान्यथाऽनुपपत्त्या ।

रूप्यते, एतादृशपरम्परायाः अपभ्रंशादिस्थले सम्बन्धत्वं न स्वीक्रियत इति तत्र तत्सम्बन्धावगाहिज्ञानं भ्रम एवेति;

तदपि तुच्छम्—अक्लृप्तस्य तादृशेच्छाविषयत्वस्य सम्बन्धतोपगमे तादृशज्ञानविषयत्वस्वसमानकालीनविषयत्वादिपरम्पराया अपि विनिगमनाविरहेण सम्बन्धतापत्तेः, तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव वाच्यवाचकभाव इति वदन्ति ।

यस्तु ज्ञाने पदानां शक्तिः; न त्वर्थे, तथा च तज्ज्ञानशक्तत्वं तद्वाचकत्वं, तच्च तद्विषयकशाब्दधीजनकताऽवच्छेदकधर्मवत्त्वं, स च धर्मो वह्न्यादिनिष्ठदाहानुकूलशक्तिरिव पदार्थान्तरमेव, लाक्षणिक-

---

न स्वीक्रियत इति । अपभ्रंशादिस्थले ईश्वरेच्छीयतादृशविषयतायाः सत्त्वेऽपि तस्याः संसर्गत्वं नाङ्गीक्रियते कल्पकाभावादित्यर्थः ।

भ्रम एवेति । अन्यानिष्ठतादृशविषयतायाः संसर्गतया भानादिति भावः ।

तादृशज्ञानविषयत्वेति । स्वजन्यबोधीयविषयत्वप्रकारताकज्ञानीयविषयत्वेत्यर्थः, तादृशज्ञानविषयत्वसंसर्गत्वस्य कथञ्चिदिष्टापत्तौ समानकालीनविषयत्वस्य विभिन्नकालीनपदपदार्थयोः संसर्गत्वासम्भवादाह–आदीति । आदिना स्वप्रयुक्तभावकालीनविषयत्वादेः परिग्रहः ।

एतेन पूर्वस्मिन् लाघवरूपविनिगमनासत्त्वेऽपि न क्षतिः ।

यद्यपि तादृशविषयत्वमवाचकेऽप्यस्ति तथाऽपि तन्निष्ठविषयताया अपभ्रंशनिष्ठाया इव संसर्गत्वास्वीकारान्नातिप्रसङ्ग इति ।

मतान्तरमुपपादयति–यस्त्विति । ज्ञाने=अर्थज्ञाने, अर्थविषयकशाब्दबोध इति तु यावत्, तत्सम्पर्थोऽनुकूलत्वं तस्य च शक्त्यन्वयः । न त्वर्थे इति । न त्वर्थानुकूलेत्यर्थः ।

ननु तद्विषयकज्ञानानुकूलशक्तिमत्त्वं यदि तद्वाचकत्वं, तदा चक्षुरादेरपि घटादिवाचकत्वापत्तिः ? अत आह–तच्चेति ।–तद्विषयकेति । तद्विषयकत्वशाब्दत्वोभयधर्मावच्छिन्नजन्यतानिरूपितजनकताऽवच्छेदकधर्मवत्त्वमर्थः ।

एतच्च पटविषयकसमूहालम्बनघटविषयकशाब्दानुकूलशक्तिमादाय न घटादिपदानां पटादिवाचकत्वापत्तिः । वह्न्यादिनिष्ठदाहानुकूलेति । तैः सर्वत्रैव कारणे कार्यानुकूला सामर्थ्यरूपशक्तिः पदार्था

च नानुभावकमेवेति न तत्र शक्तिः, घटादिपदस्य मितिमातृविषयकधीजनकत्वेऽपि न तद्वाचकत्वं, तद्विषयकत्वावच्छिन्नज्ञानशाब्दपदस्यैव तद्वाचकत्वाद्, मितिमातृविषयकत्वेन च ज्ञानस्य न किञ्चित्पदशक्यता; ज्ञानसामान्यसामग्र्या एव मितिमातृभासकतया पदान्तरस्य च तदर्थभासकतया तद्विषयकत्वस्य तत्पदजन्यताऽवच्छेदकत्वे मानाभावात्,

<u>कार्यान्वितस्वार्थे पदानां शक्तिरिति वादिनां गुरूणां</u> साक्षात्

न्तर स्वीक्रियमाणाऽपि वह्न्यादौ प्रसिद्धतया दृष्टान्ततयोक्ता, कार्यकारणभावश्च दाहादिकं प्रति तत्तदनुकूलशक्तिमत्त्वेन, तत्र कार्यताऽवच्छेदकं दाहत्वादिकं कारणताऽवच्छेदकञ्च तत्तच्छक्तिरेव, तत्तत्कार्यानुकूलत्वञ्च परिचायकं बोध्यम्।

ननु गङ्गायां घोष इत्यादौ गङ्गाऽऽदिपदानां तीरादिप्रतिपादकतया तत्र तीरादिबोधाद्यनुकूलशक्तेरावश्यकत्वेन तीरादिवाचकत्वापत्तिः ? अतआह—लाक्षणिकमेवेति। नानुभावकमेवेति। गङ्गाऽऽदिपदं न तीराद्यनुभवजनकमेवेत्यर्थः, अपि तु तत्स्मारकमेवेति, एतच्चाग्रे स्फुटीभविष्यति। मितिमातृविषयकेति। तन्मते ज्ञानमात्र एव मितिमातारौ भासेते, मितिर्ज्ञानं, माता चात्मा, तथा च घटोऽस्तीत्यादिवाक्याद् अस्तितावान् घटः, अस्तित्वेन घटमहं जानामीत्याकारकं समूहालम्बनरूपं ज्ञानं जायते, तत्र मितेः प्रकारतयाऽऽत्मनो विशेष्यतया भानमिति। तद्विषयकत्वावच्छिन्नेति। तद्विषयकत्वावच्छिन्नजन्यतानिरूपितजनकताऽवच्छेदकशक्तिमत्पदस्यैवेत्यर्थः। तद्वाचकत्वादिति। तद्वाचकत्वेन विवक्षितत्वादित्यर्थः।

ननु घटादिपदजन्यज्ञानस्य मितिमातृनियतविषयकत्वेन तादृशजन्यताया मितिमातृविषयकत्वावच्छिन्नत्वं न कुतः ? अन्यथा घटादिविषयकत्वावच्छिन्नत्वमपि माऽस्त्वित्यत आह—ज्ञानसामान्येति। ज्ञानमात्र एव तज्ज्ञानाव्यभिचारादिदोषेण विशेषसामग्र्यास्तज्ज्ञानप्रयोजकत्वाकल्पनादिति भावः। पदान्तरस्य=घटादिपदान्तरस्य, तदर्थभासकतया=मितिमातृभानप्रयोजकत्वाप्यतया, एतेन घटादिपदस्य मितिमातृज्ञानजनकत्वे पटादिपदान्तरमादाय व्यभिचारः स्यात् प्रकारान्तरेण व्यभिचारवारणे महागौरवं स्यादिति सूचितम्।

गुरुमतमुपन्यस्यति—कार्यान्वितेति। तेषामयमाशयः—सामान्य

परम्परासाधारणकार्य्यत्वविषयतानिरूपितत्वेन घटादिविषयताया घटादिपदजन्यताऽवच्छेदकत्वेऽपि न घटादिपदस्य कार्य्यतावाचकत्वम्; अपि तु लिङादिपदस्यैव, तद्विषयकत्वावच्छिन्नेत्यत्र साक्षात्परम्परासाधारणनिरूपितत्वांशेऽविशेषणतयाऽवच्छेदकत्वस्यैव निवेशात्,

---

गां बधानेत्यादिवृद्धव्यवहारप्रयोजकवाक्यानि सर्व्वाणि प्रवर्त्तकत्वेन लिङादिपदघटितानि ततश्च तद्व्यवहारदर्शिनः शिशवोऽपि कार्य्यविषयकगवाद्यर्थबोधं प्रत्येव गवादिपदानां सामर्थ्यमवधारयन्तः तस्मादुत्तरमपि कार्य्यान्वितगवादौ शक्तिज्ञानेनैव तादृशगवादिकं प्रतिपद्यन्त इति । साक्षात्परम्परासाधारणेति । तन्मते सर्व्वत्रैव शाब्दबोधे कार्य्यत्वभानोपपत्तये कार्य्यत्वविषयतानिरूपितघटाद्यर्थनिष्ठविषयताशालिशाब्दत्वावच्छिन्नं प्रति ज्ञायमानघटादिपदत्वेन कारणत्वमिति भावः । घटमानयेत्यादावानयनादिनिष्ठविषयतायां कार्य्यत्वविषयतायाः साक्षान्निरूपितत्वेन साक्षादिति, घटादिविषयतायां कार्य्यत्वविषयतायाः परम्परानिरूपितत्वेन परम्परेति । निरूपितत्वेनेति । अत्र तृतीयाऽर्थो घटादिविषयताऽन्वितवैशिष्ट्यं, तथा च कार्य्यताविषयतानिरूपितत्वस्य घटादिविषयताविशेषणस्य घटादिपदजन्यताऽवच्छेदकत्वावच्छेदकत्वेन तदवच्छेदकत्वं कार्य्यत्वविषयताया आवश्यकम्, एवञ्च तद्विषयत्वनिष्ठावच्छेदकताकशाब्दबोधनिष्ठजन्यताकजनकत्वं तद्वाचकत्वमिति सामान्यलक्षणे सति घटादिपदानां कार्य्यतावाचकत्वापत्तिरिति भावः ।

कार्य्यत्वविषयतानिष्ठावच्छेदकतावारणाय—साक्षादिति, कार्य्यत्वविषयतानिष्ठावच्छेदकतावारणाय—परम्परेति केचित् ।

अपि तु लिङादिपदस्यैवेति । आदिना लोट्तव्यादिपरिग्रहः । लिङादिपदस्य तु कार्य्यतानिष्ठविषयताशालिशाब्दं प्रति हेतुतया तादृशविषयतानिष्ठावच्छेदकतायां तादृशावच्छेदकताभिन्नत्वस्य निरूपकत्वनिष्ठावच्छेदकत्वानिरूपकत्वस्य च सत्त्वाद्व्याप्तिरिति ।

निरूपितत्वांशेऽविशेषणतयेति । तथा च निरूपितत्वनिष्ठावच्छेदकत्वानिरूपकत्वं तल्लक्षणघटकतानिष्ठावच्छेदकतायां विशेषणीयमिति ।

न चैवं घटादिविषयतानिष्ठावच्छेदकतायामपि कार्य्यताविषयतानिष्ठावच्छेदकतानिरूपकत्वसत्त्वाद् घटादिपदानां घटादिवाचकत्वानुपपत्तिरिति वाच्यम् ?

विशेष्यनिष्ठावच्छेदकत्वादौ विशेषणनिष्ठावच्छेदकत्वादिनिरूपि-

तत्त्वस्यैव स्वीकाराद्, न तु तन्निरूपकत्वस्य, विशेषणनिष्ठावच्छेदकत्वादौ तु विशेष्यनिष्ठावच्छेदकत्वादिनिरूपकत्वस्यैव,

न च विनिगमनाविरहेणोभयोः परस्परं निरूप्यनिरूपकभाव आवश्यक इति वाच्यम् ?

तत्स्वीकारे प्रकारताऽवच्छेदकत्वादेर्निरवच्छिन्नत्वस्य दुर्वचत्वापत्ते, तस्य दुर्वचत्वे तु भूतलं न दण्डिमदित्यादिबुद्धिं प्रति भूतलं दण्डिमदित्यादिनिर्णयानां दण्डत्वनिष्ठनिरवच्छिन्नावच्छेदकताकप्रकारताकत्वादिनैव प्रतिबन्धकत्वेन तदनुपपत्तेः, अन्यथा भूतलं दण्डत्वजातिमत्त्ववदित्यादिनिश्चयानामपि प्रतिबन्धकत्वापत्तेः, विशेष्यत्वानवच्छिन्नत्वस्य निरवच्छिन्नत्वपक्षेत् ? कारणताऽवच्छेदकत्वादौ स्वत एव तत्सत्त्वेनावच्छिन्नावच्छेदकत्वस्य निरवच्छिन्नत्वापत्तेरित्यलं विस्तरेण ।

यदि च लाघवाद् निरूपितत्वसम्बन्धेन कार्यताविषयताविशिष्टघटत्वावच्छिन्नविषयताशालिशाब्दत्वावच्छिन्नं प्रति घटादिपदत्वेन कारणत्वं कल्प्यते ? तदा निरूपितत्वसम्बन्धनिष्ठसांसर्गिकावच्छेदकतानिरूपितावच्छेदकत्वानिरूपिका या तद्विषयत्वनिष्ठाऽवच्छेदकता तन्निरूपितशाब्दत्वावच्छिन्नजन्यताकजनकत्वं तद्वाचकत्वमिति,

न चात्र यथा कार्यत्वविषयतानिरूपितघटादिनिष्ठविषयताशालिशाब्दत्वेन कार्यत्वं, तथा विनिगमनाविरहेण घटनिष्ठविषयतानिरूपितकार्यतानिष्ठविषयताशालिशाब्दत्वेन कार्यत्वं निर्वक्तुं शक्यते; एवञ्च कार्यत्वविषयतानिष्ठावच्छेदकताया निरूपकत्वनिष्ठावच्छेदकत्वानिरूपकत्वेन घटादिपदानां कार्यतावाचकत्वापत्तिर्दुर्वारेति वाच्यम् ?

विषयतात्वावच्छिन्नावच्छेदकतानिरूपितनिरूपितत्वनिष्ठावच्छेदकतानिरूपितकार्यताविषयतात्वावच्छिन्नावच्छेदकताभिन्नत्वे सति निरूपितत्वनिष्ठावच्छेदकत्वानिरूपिका या यन्निष्ठविषयतात्वावच्छिन्नावच्छेदकता तन्निरूपितशाब्दत्वावच्छिन्नजन्यताकजनकत्वं तद्वाचकत्वमिति विवक्षणे, घटविषयतानिरूपितकार्यतानिष्ठविषयताशालिशाब्दत्वावच्छिन्ना या जन्यता तन्निरूपितकार्यताविषयतानिष्ठावच्छेदकतायां तादृशभेदासत्त्वात्; तद्रूपविरहात्, पशुपदादीनाञ्च लाङ्गूलत्वावच्छिन्नावच्छेदकताकविषयताशालिशाब्दं प्रति हेतुत्वेन न तत्र पशुत्वादिवाचकत्वापत्ति ।

नव्यास्तु—घटादिपदानां कार्यतावाचकताऽऽपत्तिरूपविनिगमनासत्त्वेन घटादिपदानां घटविषयतानिरूपितकार्यताविषयतात्वेन कार्यतान्वयनायोगान्न तदापत्तिरित्याहुः ।

न च कार्य्यानुकूलशक्तेः स्वरूपसत्या एव कार्य्यानुकूलतया पदार्थोपस्थितौ शाब्दबोधे च ज्ञातोपयोगिनोऽर्थे पदस्य वृत्तिरूपशक्त्यन्तरस्य स्वीकार आवश्यक इति वाच्यम् ?

दाहादिकार्य्ये वन्ह्यादिनिष्ठशक्तेः स्वरूपसत्या एवोपयोगित्वेऽपि शाब्दबोधानुकूलशक्तेः शाब्दबोधे पदार्थोपस्थितौ च ज्ञातोपयोगित्वोपगमे बाधकाभावात्, अतीतानागतपदज्ञानादपि शाब्दबोधोत्पत्त्या पदानामहेतुत्वेन तत्र हेतुताऽवच्छेदकशक्त्यसम्भव इति तु न शङ्क्यम्, तन्मते पदानां नित्यत्वात्,

---

परे तु—कार्यताविषयताऽन्तःपातिविषयतानिरूपितत्वातिरिक्तनिरूपितत्वानवच्छिन्नत्वमधिकं जन्यताऽवच्छेदकतायां निवेशनीयं, नातो घटविषयतानिष्ठावच्छेदकताकनिरूपितत्वनिष्ठावच्छेदकताककार्यतात्वावच्छिन्नविषयतानिष्ठावच्छेदकताकजन्यतानिरूपितजनकत्वमादाय घटादिपदानां कार्यतावाचकत्वापत्तिः, एवं पदार्थताऽवच्छेदकविषयताऽन्तःपातिविषयतानिरूपितत्वातिरिक्तनिरूपितत्वानवच्छिन्नत्वं देयं; तेन घटपश्वादिपदनिरूपितजन्यतानिरूपितघटपदनादिविषयतानिष्ठावच्छेदकतायां घटत्वलाङ्गूलादिविषयतानिष्ठावच्छेदकतानिरूपितत्वनिष्ठावच्छेदकताकत्वेन तद्वाचकत्वानुपपत्तिरिति वदन्ति ।

स्वरूपसत्या इति । ज्ञानाविषयतापन्नया इत्यर्थः । ज्ञातोपयोगिन इति ज्ञातानुकूलस्य । ज्ञातोपयोगित्वेति । शक्तिप्रकारकज्ञानविषयतावत्पदत्वेन स्वाश्रयजन्यस्वप्रकारकज्ञानविषयत्वोभयसम्बन्धेन; अस्तित्वमात्रसम्बन्धेन वा शक्तिमत्त्वेन पदानां कारणत्वमिति भावः ।

बाधकेति । फलानुरोधेन कल्पितस्य दृष्टान्तवैषम्यमपि न क्षतिकरमिति भावः । नित्यत्वादिति । तथा च पदानां सर्वदैव सत्त्वेन न व्यभिचारः, तन्मते पदानां नित्यत्वेऽपि कण्ठताल्वाद्यभिघातव्यङ्ग्यत्वेन न सदा प्रत्यक्षमिति ।

अथ ताल्वाद्यभिघातानां व्यञ्जकत्वञ्च न प्रत्यक्षप्रतिबन्धकापसारकत्वं तत्प्रतिबन्धकस्य निर्वक्तुमशक्यत्वात्, नापि तत्प्रत्यक्षे सहकारिकारणत्वं शब्दश्रोत्रादु तदभिघातविरहात् तथात्वेऽपि शब्दश्रवणदर्शनाच्च ? इत्यादिदोषेण तत्र बहवो मेनिरे,

अस्तु वा तज्ज्ञानशक्त्या तस्य वाचकत्वमिति मीमांसकमतविशेषः,

अतस्तदनङ्गीकर्तृमीमांसकमतविशेषमाह-अस्तु वेति। तज्ज्ञानशक्त्येति। तत्तदर्थविषयकशाब्दं प्रति तदनुकूलशक्तिप्रकारकपदविशेष्यकज्ञानत्वेन हेतुत्वं बोध्यं, प्रकारता चात्र स्वाश्रयविषयत्वसम्बन्धावच्छिन्ना,

एतन्मते घटादिवाचकत्वं हि घटादिशाब्दबोधजनकताऽवच्छेदकीभूतशक्तिप्रकारतानिरूपकज्ञानीयविशेष्यताश्रयपदत्वं न तु तादृशशक्तिमज्ज्ञानविषयत्वं; येन समूहालम्बनज्ञानमादायोदासीनेऽतिव्याप्तिः स्यात्, तन्निवेशे चोदासीने तादृशज्ञानीयविशेष्यत्वाभावान्न तदापत्तिः,

अथ वा-यद्विषयकशाब्दानुकूलशक्तिमत्त्वं यादृशानुपूर्व्यवच्छिन्नविशेष्यताकत्वव्यापकं तादृशानुपूर्वीमत्त्वं, यादृशानुपूर्व्यवच्छिन्नविशेष्यताकत्वव्यापकत्वनिवेशाद् न समूहालम्बनज्ञानमादायोदासीनेऽतिव्याप्तिः।

ननु कादिशब्दघटितवकादिशब्दानां ज्ञाने प्रजापत्यादिशाब्दबोधानुकूलशक्तिसत्त्वेन प्रजापत्यादिवाचकत्वापत्तिर्दुर्वारैवेति यदि विभाव्यते ?

तदा तादृशशक्तौ यादृशानुपूर्वीघटकविशिष्टान्तररूपावच्छिन्नविशेष्यताकत्वाव्यापकत्वमपि निवेशनीयम्; एवञ्च प्रजापत्यादिबोधानुकूलशक्तौ वकारत्वरूपानुपूर्वीघटकविशिष्टान्तरं यत् कत्वादिरूप तद्रूपावच्छिन्नविशेष्यकत्वाव्यापकत्वविरहात्, यत्रैकमेव रूपं वाचकताऽवच्छेदकं तत्रान्त्यं विशेषणं न देयम्, अवच्छेदकभेदे लक्षणस्य भिन्नत्वात्, पूर्वोक्तस्यानुगमेनैव वारणीयं वा,

यत्तु-तादृशशक्तिमज्ज्ञाने शक्तिविशिष्टशक्तिमदन्यत्वं निवेशनीयं,-शक्तिवैशिष्ट्यञ्च-स्वसामानाधिकरण्यस्वभिन्नत्वस्वव्यापकत्वैतत्त्रितयसम्बन्धेन, सर्वत्र स्वं शक्तिरेव, तत्र ज्ञानान्तरनिष्ठशक्तिवैशिष्ट्यस्य शक्तिमात्रे सत्त्वादसम्भवः शक्तिमात्रे स्वात्मकशक्तिवैशिष्ट्यस्य सत्त्वात्तद्दोषश्च स्यादतः प्रथमद्वितीयसम्बन्धौ; घटादिपदज्ञानस्य तद्घटकवायुदेव्यादिवाचककाकारादिपदविषयकतयाऽव्याप्तिः स्याद्; अतस्तृतीयसम्बन्धस्य प्रवेशः; घटपटादिपदविषयकसमूहालम्बनज्ञानस्य शक्तिविशिष्टशक्तिमत्त्वान्न घटादिपदस्य घटादिवाचकत्वापत्तिरिति;

तदसद्-घटादिविषयकशाब्दबोधानुकूलशक्तेर्घटकलसादिपदज्ञानसाधारणतयोक्तत्रितयसम्बन्धेन पितामहादिविषयकशाब्दानुकूलक-

न चासौ विचारसहः; यतस्तन्मते लाक्षणिकस्याननुभावकत्वं दुर्घटं; पदार्थोपस्थितिद्वारा शक्यार्थानुभवे शक्तस्येव लक्ष्यार्थबोधे लाक्षणिकस्यापि हेतुताया दुर्वारत्वात् तत्रापि शक्तेरावश्यकतया वाचकताऽऽपत्तेः पदार्थोपस्थित्याऽन्यथासिद्धत्वे शक्तस्यापि तथात्वापाताद्,

न चानुभावकताऽवच्छेदकशक्त्यभावान् लाक्षणिकस्य नानुभावकत्वसम्भवः तर्हि वाक्यार्थघटकार्थान्तरवाचकमेव पदं स्वार्थस्येव तदन्वयप्रतियोगिलक्ष्यार्थस्याप्यनुभावकमुपेयत इति वाच्यम् ?

एवं सति गङ्गायां घोष इत्यादौ घोषादिपदस्यापि गङ्गातीरादिरूपार्थानुभावकताऽवच्छेदकशक्तिमत्त्वेन तद्वाचकत्वापत्तेः; लाक्षणिकस्याननुभावकत्वे शक्तपदाघटितधूमादित्यादिहेतुवाक्यादन्वयानुपपत्तेश्च, तत्र धूमादिपदस्य ज्ञाने विभक्तेश्च ज्ञाप्यत्वे लाक्षणिकत्वाद्,

---

लत्वादिपदघटककाकारादिपदज्ञाननिष्ठशक्तिवैशिष्ट्येनाव्याप्तेर्दुर्वारत्वाद्, ज्ञानभेदेन शक्तेर्भेदस्वीकारे तत्तदनुकूलशक्तित्वस्याखण्डस्यावश्यकतया गौरवापत्तेरतिव्याप्तितादवस्थ्याच्चेति ।

तन्मतं दूषयितुमारभते—न चासाविति । विचारसह इति । विचारसिद्ध इत्यर्थः । तत्रापीति । लाक्षणिकगङ्गाऽऽदिपदेऽपीत्यर्थः । पदार्थोपस्थित्येति । शाब्दबोधात् पूर्वं पदार्थोपस्थितेरावश्यकत्वेन चरितार्थतया तज्जनकजनकतया शाब्दं प्रति पदज्ञानमन्यथासिद्धमिति भावः । वाक्यार्थेति । वाक्यार्थघटकीभूते यदर्थान्तरं तद्वाचकं घोषादिपदमित्यर्थः । स्वार्थस्येवेति । तथा च तीरान्वितघोषविषयकशाब्दं प्रति वृत्तिज्ञानजन्यतीरोपस्थितिसहकारेण ज्ञायमानघोषपदत्वेन तज्ज्ञानत्वेन वा कारणत्वं कल्पनीयमिति भावः । तद्वाचकत्वापत्तेरिति । तीरान्वितघोषवाचकत्वापत्तेरित्यर्थः ।

ननु पदान्तरजन्योपस्थितिप्रयोज्यतदर्थनिष्ठविषयताशालिशाब्दजनकताऽवच्छेदकशक्तिमत्त्वं तद्वाचकत्वं वक्तव्यं, तथा च तीरनिष्ठविषयताया गङ्गाऽऽदिपदान्तरजन्योपस्थितिप्रयोज्यतया न तद्वाचकत्वापत्तिः ? इत्यत आह—लाक्षणिकस्येति । ज्ञायमानलिङ्गस्य करणत्वमते पञ्चम्या वा ज्ञानजन्यज्ञानविषयत्वार्थकत्वे धूमपदस्य लक्षणाऽऽवश्यकीत्यत आह—चेति । आदिना गुणिपरानुक्तादित्यादिहेतुवाक्यपरिग्रहः । ज्ञाप्यत्वे लाक्षणिकत्वादिति । पञ्चम्या अन्यत्वेऽवधित्वेऽवधिमत्त्वे वा,

अथ लक्ष्यार्थस्य न शाब्दबोधे प्रवेशः; अपि तु स्मृतस्य तस्य समभिव्याहृतपदार्थसंसर्गाग्रहमात्रं, तथा च नानुपपत्तिः,

न च लक्ष्यार्थस्य शाब्दबोधविषयत्वानुपगमे तदुपरागेण शृणोमीत्यनुव्यवसायानुपपत्तिरिति वाच्यम् ?

इष्टत्वाद्, विधेयोपरागेणैव तथा प्रत्ययात् लक्ष्यार्थस्य शाब्दबोधविषयत्वेऽपि तस्य विधेयतया भानानभ्युपगमाद् "विधौ न परः शब्दार्थः" इति सिद्धान्तादिति चेद् ?

न-प्रश्नाः क्रोशन्तीत्यादौ लक्ष्यार्थप्रश्नस्थपुरुषादेः शाब्दबोधविषयताया आवश्यकत्वाद्, अन्यथा पूर्वाननुभूतस्य पुरु-

---

गुरुणि तत्र लक्षणैवेति भावः। प्रवेश इत्यस्य विषयत्वमर्थः, तथा च लक्ष्यार्थस्य शाब्दबोध एव न जायते कुतो गङ्गाऽऽदिपदानां तीरादिवाचकत्वापत्तिरिति भावः।

ननु लक्ष्यार्थस्य यदि शाब्दबोधो न भवति तदा शुक्लं घटमानयेत्यादिवाक्यात् कथं शुक्लघटानयनादौ प्रवृत्तिः ? इत्यत आह—स्मृतस्येति। समभिव्याहृतेति। घटघोषादावित्यर्थः। असंसर्गाग्रहमात्रं=बाधनिश्चयाभावमात्रं, मात्रपदेन घटतीरादिविषयतायां शुक्लादिविषयतानिरूपितत्वव्यवच्छेदः, तथा च तत्तत्पदार्थस्मृतिबाधनिश्चयाभावादिसहकृतस्येतरांशाविशिष्टबोधस्यैव स्वातन्त्र्येण प्रवृत्त्यादिहेतुत्वाद्, उत्तरकालमानसतादृशविशिष्टबोधेनैव वा तत्र तत्र प्रवृत्त्यादिर्जायत इति भावः।

ननूक्तरीत्या भवतु तत्र तत्र प्रवृत्तिः; किन्तु गङ्गायां घोष इत्यादिवाक्यश्रवणानन्तरं तीरादिकं शाब्दयामीत्याद्यनुव्यवसायो जायते स चानुपपन्नः ? इत्याशङ्कते-न चेति। उत्तरयति-इष्टत्वादिति। इष्टापत्तौ युक्तिमाह—विधेय इत्यादि। उपरागेण=प्रकारत्वेन, तथा च विधेयताऽऽत्मप्रकारत्वेनेति यावद्, लक्ष्यार्थस्य विधेयत्वेनाभाने जैमिनिसूत्रे प्रमाणमाह—"विधौ ने"ति। अत्र भावसाधितेन विधिशब्देन विधेयित्वं बोध्यते, सप्तम्यर्थो निरूपकत्वं, परः=शक्यभिन्नः; लक्ष्यार्थ इति यावद्, तथा च लक्ष्यार्थो न विधेयितानिरूपकः न विधेयो भवतीति तु यावद्। अन्यथेति। लक्ष्यार्थस्य शाब्दबोधाविषयत्व इत्यर्थः। प्रतीत-

पादेः प्रतीत्यनिर्व्वाहाद्; अननुभूतस्य स्मरणासम्भवात् समानप्रकारकत्वमात्रेण शाब्दबोधपदार्थोपस्थित्यादेः कार्य्यकारणभावमभ्युपगच्छतां मीमांसकानां शाब्दबोधे योग्यतावलादपूर्व्वपदार्थस्य भानेन लक्ष्यार्थस्य शाब्दाभ्युपगमेऽपूर्व्वस्यापि तस्य प्रतीत्युपपत्तिरिति तद्विषयकशाब्दत्वावच्छिन्नं प्रति शक्तिविशेषपुरस्कारेण तद्वाचकपदस्य तज्ज्ञानस्य वा न हेतुतासम्भवः, विशिष्य तत्तत्पदार्थान्विततत्तदर्थबोधे तत्तत्पदसाकाङ्क्षतत्तत्पदज्ञानत्वेनावश्यक्लृप्तकारणतयैवोपपत्तावीदृशकार्य्यकारणभावस्य निर्युक्तिकत्वाद् ।

इदन्तु तत्त्वं-तीरादौ गङ्गाऽऽदिपदजन्यबोधविषयत्वसत्त्वेऽपि तदंशे

निर्व्वाहादिति । लक्ष्यार्थस्य सामान्यप्रतीतिस्तु भवताऽपि स्वीकारादिति,

ननु तस्य स्मरणात्मकप्रतीतिरेव कुतो न भवेदिति ? अत आह, अननुभूतस्येति ।

ननु मञ्चस्थपुरुषस्य पूर्व्वाननुभूतत्वेन स्मरणासम्भवे शाब्दबोधस्वीकारे तत्र तस्य कुतो भानं वृत्त्यनुपस्थितत्वादिति ? अतस्तस्य शाब्दबोधे भानं तन्मते सम्पादयति-समानप्रकारकत्वेति । तथा च तद्धर्म्मप्रकारकशाब्दं प्रति वृत्तिज्ञानजन्यतद्धर्म्मप्रकारकोपस्थितित्वेन कारणत्वं कल्प्यते; न तत्र धर्म्मिविषयताप्रवेश इति, योग्यतावशात्—तद्न्वयीतरपदार्थसम्बन्धाबाधवशात् । अपूर्व्वस्यापि=पूर्व्वाननुभूतस्यापि । तस्येति । मञ्चस्थपुरुषादेरित्यर्थः । प्रतीत्युपपत्तिरिति । तथा च लाक्षणिकगङ्गाऽऽदिपदस्य वाचकत्वापत्तेर्दुर्व्वारत्वमिति भावः । शाब्दबोधप्रति ज्ञायमानपदस्य तज्ज्ञानस्य वा स्वातन्त्र्येण कारणतावलम्बनेन पदानां तज्ज्ञानानां सामर्थ्यरूपां शक्तिं निरासयति-तद्विषयकेति । निर्युक्तिकत्वादिति । अयं भावः-निराकाङ्क्षपदजन्यशाब्दबोधानुत्पत्त्या तद्वारणाय साकाङ्क्षपदसमूहरूपवाक्यज्ञानत्वेन साक्षात्कारणत्वं तन्मतेऽप्यावश्यकम्, एवञ्च वृत्तिज्ञानजन्योपस्थितेरेव तत्सहकारिकारणत्वेनोपपत्तौ शक्तिमत्पदज्ञानत्वेन कारणत्वान्तरं न कल्पनीयं प्रयोजनविरहादिति कुतस्तदनुकूला शक्तिः पदे तज्ज्ञाने चेति, एवञ्च सङ्केतोऽपीदं पदमेतदर्थबोधकोपस्थितिं जनयत्वित्याकारकः, अयमर्थ एतच्छब्दजन्योपस्थितेर्विषय इत्याकारको वा बोध्य इति ।

ईश्वरसङ्केतस्य शक्तित्वपक्ष आपभ्रंशशब्दानां वाचकतां गङ्गाऽऽदिपदानां लक्ष्यतीरादिवाचकताञ्च परिहरति-इदन्त्विति । तीरादाविति ।

शुद्धबोधविषयतात्वादिनैव तादृशविषयत्वादिप्रकारकत्वमीश्वरेच्छायामुपगम्यते; न तु गङ्गाऽऽदिपदजन्यबोधविषयतात्वादिनाऽपि तत्प्रकारकत्वे मानाभावात्, तदनभ्युपगमेऽपि तस्याः सर्वविषयकत्वव्याघाताभावाद्,

न च तथा सति बोधांशे गङ्गापदजन्यत्वानवगाहितया सर्वविषयकत्वानुपपत्तिरिति वाच्यम्?

तीरादिनिष्ठविशेष्यतानिरूपितप्रकारताऽवच्छेदकघटकतया तदनवगाहित्वेऽपि बोधांशे स्वातन्त्र्येण तदवगाहित्वोपगमात्, तथा च तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छावत्त्वस्येश्वरेच्छानिरूपिततादृशविशेष्यतावत्त्वस्य वा तत्पदशक्यतारूपतया नातिप्रसङ्गः, उक्तरीत्यैव च घटादिपदजन्यबोध

आदिना गोसदृशवृक्षादिपरिग्रहः। गङ्गाऽऽदिपदेति। आदिना गोशब्दगाच्छब्दादिपरिग्रहः। शुद्धबोधविषयतात्वादिनेति। तथा च तीरं बोधविषयता
वद्भवत्वित्याद्याकार एवेश्वरेच्छाया स्वीक्रियत इति भावः। तत्प्रकारकत्वञ्च गङ्गाऽऽदिपदजन्यबोधविषयत्वप्रकारतानिरूपकत्वम्, अस्य चोपगम्यत इत्यनेनान्वयः। मानाभावादिति। तस्यातीन्द्रियत्वेन प्रत्यक्षस्याग्राहकत्वात्, तादृशशब्दस्य चासत्त्वात्, प्रत्युतानिष्टापत्तिभिया तत्कल्पनासम्भवाच्चेति भावः, तेन चेश्वरेच्छाया नित्यैकतया विनिगमनाविरहेण च सर्वविषयकत्वमवश्यमङ्गीकार्यमिति न्यायसिद्धान्तोऽपि न व्याहन्यत इत्याह—तदनभ्युपगम इति। तथा सतीति। शुद्धबोधविषयतात्वादिनेश्वरेच्छाया तादृशविषयत्वावगाहनमात्रस्वीकारे सतीति। स्वातन्त्र्येणेति। विशेषणताऽनवच्छेदकतयेत्यर्थः। तदवगाहित्व इति गङ्गाऽऽदिपदजन्यत्व इत्यर्थः। तथा च बोधो गङ्गाऽऽदिपदजन्यो भवत्वित्याकारकोऽपीश्वरेच्छाया स्वीक्रियत इति भावः, तथा च शक्यशक्तरूपत्वमात्र एव तादृशविशिष्टविषयतात्वेनावगाहनस्वीकारश्च।

ननु तादृशसम्बन्धेनेश्वरेच्छाया शक्यतात्वे घटपदशक्यता घटे न तु पटे इत्यादिव्यवहारानुपपत्तिः, वृत्त्यनियामकतादृशसम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः सम्बन्धान्तरावच्छिन्नतादृशशक्यत्वाभावस्य तु घटेऽपि सत्त्वेन, घटे न घटपदशक्यत्वमित्यादिव्यवहारापत्तिरिति? अत आह—इच्छानिरूपणरयादि। नातिप्रसङ्ग इति। पटादौ

विषयस्य घटान्वितकर्मत्वान्वितानयनादेर्घटादिसंसर्गस्य च तादृशबोधविषयत्वप्रकारकेश्वरेच्छाविषयत्वेऽपि घटादिपदवाच्यत्वमुपपादनीयम् ।

घटादिपदशक्यत्वप्रसङ्गो नेत्यर्थः ।

नन्वेतावता माऽस्तु गङ्गाऽऽदिपदानां तीरादिवाचकत्वापत्तिः; किन्तु घटमानयेत्यादिवाक्यजन्यबोधस्यापि घटादिपदजन्यतया कर्मत्वाद्यंशे घटादिपदजन्यबोधविषयत्वेनेश्वरेच्छाया अवगाहनाद्, घटादिपदानां कर्मत्वादिवाचकत्वापत्तिर्दुर्वारैवेति ? अत आह—उक्तरीत्यैव चेति । कर्मत्वाद्यंशे शुद्धविषयतात्वादिना तादृशेच्छीयप्रकारत्वस्योपगमेन; न तु घटपदजन्यबोधीयविषयतात्वेनेत्यर्थः ।

ननु तीराद्यंशे बोधविषयतात्वेन बोधाद्यंशे च गङ्गाऽऽदिपदजन्यतात्वेनेश्वरेच्छाया नानाविषयकत्वकल्पनापेक्षया पदपदार्थयोरतिरिक्तसम्बन्धकल्पने लाघवं, तथा च मीमांसका एव विजयेरन्निति चेद् ?

न—तीराद्यंशे गङ्गाऽऽदिपदजन्यबोधविषयतात्वेन तदिच्छीयविषयत्वकल्पने बोधाद्यंशे विशेष्यत्वप्रकारताऽवच्छेदकताऽऽत्मकविषयताद्वयसत्त्वा महागौरवाद्, मीमांसकमतापेक्षयेश्वरस्येच्छायास्तद्विषयत्वादेश्च कल्पनन्तु युक्त्यन्तरेणैव न त्वेतदनुरोधेनेति ।

अथ तथाऽपि विनिगमनाविरहेण तत्तत्पदजन्यबोधविषयतात्वेनेश्वरेच्छीयविषयतावदीश्वरज्ञानीयतादृशविषयता तत्तत्पदशक्यत्वमस्तु,

न च भगवद्भिर्मीमांसकानामपि शाब्दबोधोत्पत्तिनिर्वाहाय शाब्दबोधकारणताऽवच्छेदककोटावीश्वरीयत्वमनुपादायाधुनिकसङ्केतज्ञानसाधारणकारणत्वस्याभ्युपगमेन तादृशज्ञानस्य शक्यत्वे तदनुपपत्तिरिति वाच्यम् ?

आधुनिकतादृशज्ञानस्यापि शाब्दबोधोपयोगित्वस्वीकारे क्षतिविरहाद् आधुनिकसङ्केतस्य परिभाषात्ववदाधुनिकतादृशज्ञानस्य परिभाषात्वाङ्गीकाराच्चेति चेद् ?

न—आधुनिकतादृशज्ञानस्य परिभाषात्वस्वीकारे गङ्गाऽऽदिवाचकपदानां नदीवृक्षादिपदानाञ्च सर्वपुरुषान्तर्भावेण पारिभाषिकत्वापत्तेः; भ्रमतादृशज्ञानमादायान्यार्थेऽपि पारिभाषिकत्वापत्तेश्चेति,

नन्वेवमपि वेदस्थलाक्षणिकायुःपदादेरायुर्जनकादिवाचकत्वापत्तिर्दुर्वारा; आयुःपदादेरायुर्जनकबोधकत्वेन भगवतो बुबोधयिषयाऽवगाहनादिति चेद् ?

अन्विताभिधानवादिनस्तु—पदार्थसंसर्गस्यापि वाच्यतां स्वीकुर्वन्ति; तन्मते इतरान्वितघटो घटपदशक्य इत्येतादृशमेव शक्तिज्ञानं शाब्दबोधप्रयोजकं घटो घटपदवाच्य इत्याकारकस्यान्वयांशानन्तर्भावेण शक्तिग्रहस्य तथात्वे च वृत्तिग्रहाविषयतया पदार्थसंसर्गस्य शाब्दबोधविषयताऽनुपपत्तेः,

न चेतरान्वितघटस्य वाक्यप्रतिपाद्यतया शाब्दबोधात् प्राक् शक्तिग्रह एव दुर्घटोऽनुपस्थितत्वादिति वाच्यम् ?

न—आयु पदमिदमायुर्जनकं बोधयत्वित्याकारकभगवदिच्छया ऽऽयुपदादेरिदन्त्वेनावगाहनेन शक्यताघटकपदनिष्ठविषयताया इदन्त्वावच्छिन्नत्वेन विशेषणात्, वाचकगकारादिपदशक्यताघटकविषयता तु गकारोत्तरौकारादिरूपानुपूर्व्यवच्छिन्नैवातो नासम्भवः,

अथ वा—भगवद्बुबोधयिषयाऽऽयुर्जनकत्वत्वावच्छिन्नविषयताकत्वेन बोधस्यावगाहनस्यावगमात्, न तु बोधजनकविषयकत्वेनेत्यास्तां विस्तरः ।

वृत्त्युपस्थापिता एव पदार्थाः शाब्दबोधे भासन्त इति नियमेन संसर्गांशेऽपि वाच्यतां स्वीकुर्वतां भट्टानां मतं रूपयितुमुपन्यस्यति—अन्विताभिधानवादि । एतन्मते इतरान्वितघटादिविषयकशाब्दबोधानुकूलशक्तिमत्तया घटादिपदानामितरान्वितघटादिवाचकत्वम्, इतरान्वितघटादीनामपि घटादिपदनिष्ठशक्तिनिरूपितजन्यताऽवच्छेदकविषयतावत्त्वेन तद्वाच्यत्वम्, कार्यकारणभावश्च—इतरत्वोपलक्षितनिष्ठविषयतानिरूपितान्वयनिष्ठविषयतानिरूपितघटत्वावच्छिन्नविषयताकशाब्दं प्रत्यनुकूलशक्तिमत्त्वेन चेति ।

ननु शक्तिज्ञाने यद्यन्वयांशो नावगाह्यते तदा तस्य कुत उपस्थितिः शाब्दबोधे प्रवेशश्चेत्यतोऽन्वयांशं शक्तिज्ञानेऽन्तर्भावयन् ज्ञानाकारं दर्शयति—इतरान्वितेति । इतरान्वयविशिष्टस्य, तथा च वैशिष्ट्यमर्यादया तादृशज्ञानस्यापरान्वयांशेऽपि पदनिष्ठशक्तिनिरूपितजन्यताऽवच्छेदकशाब्दबोधीयसांसर्गिकविषयतारूपशक्यत्वावगाहनमिति

नन्वितरपदनाम घट इत्यादिवाक्यार्थघटकं तद्देशवृत्तित्वादिकं वाच्यं, तथा च तादृशेतरान्वितघटादेर्वाक्यादेव प्रतिपत्तिरिन्द्रियाद्यसन्निकृष्टत्वादेवञ्च कुत इतरान्वितघटादेः शाब्दबोधात् पूर्वं ग्रहः अग्रहे च कुतस्तादृशशक्तिग्रहः, धर्मिग्रहाभावात् ? इत्याशङ्कते न चेत्यादि ।

विशेषतः पदार्थान्तरघटितस्य तदन्वितघटादिरूपवाक्यार्थस्य प्रागनुपस्थितावपीतरपदार्थत्वादिना सामान्यधर्मप्रकारेण तद्घटितस्य तदन्वितघटादेः प्रागुपस्थितिसम्भवेन तत्र शक्तिग्रहस्य सुघटत्वात्,

वस्तुतस्तु-पदार्थान्तरमनन्तर्भाव्य केवलान्वयांशान्तर्भावेण शक्तिग्रहस्य शाब्दधीप्रयोजकतोपेयते, पदार्थान्तरस्य पदान्तरलभ्यतया तदंशान्तर्भावेण शक्तिग्रहस्यानुपयुक्तत्वात्,

न चान्वयस्य पदवाच्यत्वे तदंशे शक्तिग्रहस्य शाब्दबोधोपयोगित्वे च मानाभाव इति वाच्यम् ?

दुर्घट इति । असम्भवीत्यर्थः । एतद्दशावृत्तित्वान्वितघटादेः प्रागननुभवात् सम्भवेऽपि किञ्चित्पदार्थान्वितघटादेर्वृद्धव्यवहारादितः प्रागनुभूतत्वेनेतरत्वादिसामान्यधर्मेणेतरान्वितघटादेर्मनसैव सुग्रहसम्भवादिति समाधत्ते—विशेषत इत्यादि ।

इतरपदार्थस्य पदान्तरलभ्यतया तदन्तर्भावेण शक्तिकल्पने प्रयोजनाविरहो गौरवञ्चेत्यतस्तदंशं परित्यजन्नाह-वस्तुतस्त्विति । केवलान्वयांशेति । तथा चान्वितघटो घटपदशक्य इत्याद्याकारकशक्तिज्ञानमेव घटादिपदमन्वितघटादिबोधशक्तमित्याद्याकारकं वा ज्ञानं हेतुरिति ।

ननु तादृशज्ञानेऽन्वयस्य सम्बन्धस्य केन रूपेण भानं ? सम्बन्धत्वेन; संयोगत्वसमवायत्वादिविशेषधर्मेण वा, तत्र नाद्यः—सम्बन्धत्वस्याभावात्; संयोगादेः शक्तिज्ञाने संयोगाद्यन्यतमत्वरूपसम्बन्धत्वेन मानोपगमे वा तेनैव प्रकारेण तज्जन्योपस्थित्या तेनैव रूपेण शाब्दबोधे भानापत्तेः संयोगत्वादिना भानानुपपत्तेश्च, नाप्यन्त्यः-पटपङ्कतले पचति चैत्र इत्यादौ सर्वत्र संयोगत्वानुकूलत्वत्वादिधर्मेण सम्बन्धानां शाब्दबोधात् प्रागुपस्थित्यसम्भवतादवस्थ्यादिति चेद् ?

न-घटवद्गृहे गां नयेत्यादिवृद्धव्यवहारतः संयुक्तघटाद्यनुकूलकार्यादौ च शक्तिग्रहोदयेन पश्चादपि तथैवोपस्थितिसम्भवात्,

नन्वेवमपि संयोगत्वादिभेदेन घटादिपदानामपि शक्त्यानन्त्यप्रसङ्ग इति चेद् ?

नैवं-बुद्धिस्थतावच्छेदकत्वोपलक्षणवत् संसर्गतावच्छेदकत्वोपलक्षणेन तेषामनुगमात्,

मन्वयांशे शक्तेः तादृशशक्तिग्रहे शाब्दबोधकारणत्वस्य चाभ्युपगमे

तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितिहेतुतायाः सामान्यत एव क्लृप्ततया वृत्तिज्ञानादन्यथानुपस्थितौ तस्य शाब्दबोधविषयत्वासम्भवात्, अन्यथा शक्तिग्रहस्य शाब्दबोधेऽनपेक्षणीयत्वात्, संसर्गताभिन्नविषयतायास्तादृशोपस्थितिजन्यतावच्छेदकत्वे गौरवात्।

अत्र वदन्ति सामान्यतस्तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतदुपस्थितित्वेन न हेतुता स्वतन्त्रवृत्तिज्ञानाद्विशृङ्खलभावेनैकपदोपस्थितयोः पदार्थतत्त्वावच्छेदकयोर्विशेष्यविशेषणभावक्रमेण शाब्दबो

युक्तिं प्रदर्शयन्नु शङ्कते न चेति। तद्विषयकेति। हरेण सगुणक्ति पदसमवेतो रक्त इत्यादिना वृत्त्या सयोगादेरुपस्थितिकाले शाब्दबोधवारणाय सयोगादिविषयकशाब्दं प्रति वृत्तिज्ञानजन्यसयोगादिविषयकोपस्थितित्वेनापि हेतुत्वं वाच्यमिति भावः।

ननु भट्टमते सामान्यलक्षणाविरहेण वृत्तिज्ञानजन्योपस्थितौ पूर्वानुभूता व्यक्तिरेव भासते शाब्दबोधे त्वपूर्वं व्यक्तिरेवातो नोक्तकार्यकारणभावकल्पनसम्भव इति चेत् ?

सामान्यतो विषयतासम्बन्धेन तत्तत्पुरुषीयशाब्दबोधं प्रति विषयत्वप्रकाराद्यन्यतमसम्बन्धेन तत्पुरुषीयवृत्तिज्ञानजन्योपस्थितित्वेन कार्यत्वं कारणत्वञ्च कल्पनीयमित्यनैवोक्तग्रन्थतात्पर्यात् गोत्वघटत्वादौ व्यभिचारवारकं प्रथमदलं सम्बन्धे स्वीयप्रकाराश्रयत्वनिषेधादपूर्वव्यक्तिसङ्ग्रहः,

न चैवमपि विषयतासम्बन्धेन कार्यकारणभावकल्पने पुरुषभेदेन तस्यानन्त्यापत्तिरतः समवायसम्बन्धेन तद्धर्मप्रकारकशाब्दबोधं प्रति तद्धर्मप्रकारकोपस्थितित्वेन तत्कल्पनमुचितमिति वाच्यम् ?

एतन्मतेऽपि धर्मधर्मिभेदेन कार्यकारणभावभेदाद् महागौरवापत्तेः,

एतेनानन्तधर्मव्यक्तिभेदेनानन्तकार्यकारणभावापत्त्या गोत्वादिप्रकारकशाब्दबोधं गोत्वादिप्रकारकोपस्थितिहेतुत्वापक्षयाऽतीव गौरवभिया यथाश्रुतन्तु न सम्यगित्यपि निरस्तम्।

स्वतन्त्रेति। धेनुपदं शक्तिः शक्तं लाङ्गूलवति च शक्तमिति धेनुपदभावकर्मणि शक्तं गवि च शक्तमित्यादि पृथग्वृत्तिज्ञानादित्यर्थः, विशृङ्खलभावेन, विशेष्यविशेषणभावानापन्नत्वेन, विशृङ्खलेति। पदार्थता

धापत्तेः; किन्तु तद्धर्म्मप्रकारेण तद्विषयकशाब्दबोधे वृत्तिज्ञानजन्यतद्धर्म्मावच्छिन्नविषयकोपस्थितित्वेनैव हेतुता वाच्या;

एवञ्च तत्संसर्गकबोधस्य किञ्चिद्धर्म्मप्रकारेण तद्विषयकत्वाभावाद् वृत्तिज्ञानात्तदनुपस्थितावपि तत्संसर्गकशाब्दबोधः सम्भवत्येव ।

ऽवच्छेदकप्रकारताकपदार्थनिष्ठविशेष्यताकत्वेनेत्यर्थः; वाक्यार्थमव्यावयेति भावः, तथा च तादृशोपस्थितिकाले विशिष्टबोधस्य कैरप्यस्वीकारेणेष्टापत्तेरयोग इति ।

ननु पार्थ एवेत्यादावेवशब्दात् खण्डश उपस्थितानामितरसम्बन्धाभावादीनां कथं विशिष्टबोध इति चेद् ?

न-अगत्या तत्र तत्र तादृशबोधस्येष्टत्वाद्, एवादिपदानां वा पार्थोऽन्ययोगव्यवच्छेदार्थकत्वमत एतस्योक्तत्वादिति । तद्विषयकेति । एतच्चापातत उक्तं न तु कार्य्यकारणभावे प्रविष्टमिति ध्येयम् ।

ननु दण्डमानयेत्यादित आधेयत्वादौ निरूपितत्वसम्बन्धेन दण्डप्रकारकबोधो जायते; स च न सम्भवति तत्र दण्डादिप्रकारकोपस्थितिविरहाद्,

न च तादृशकार्य्यकारणभावस्य विशिष्यवक्तव्यतया तत्राकल्पनेन न तदनुपपत्तिरिति वाच्यम् ?

यो दण्डी पुरुषस्तमानयेत्यादौ दण्डादेः पृथगुपस्थितिकाले तद्वत्त्वेन दण्डप्रकारेण पुरुषस्य शाब्दबोधवारणाय दण्डप्रकारकशाब्दं प्रति दण्डप्रकारकोपस्थितित्वेन कारणत्वस्यावश्यकतया दण्डी पुरुष इत्यादितः शाब्दबोधानुपपत्तेर्दुर्व्वारत्वादिति चेद् ?

न-एतद्दोषेणैव वस्तुतस्त्वित्यादिकल्पस्य वक्ष्यमाणत्वाद्,

अथ वा—तत्र पृथगुपस्थितयोरपि दण्डपुरुषयोः शाब्दस्येष्टत्वात्तद्वकल्पनादिति ।

तत्संसर्गकबोधस्येति । तथा च संसर्गे संसर्गताऽवच्छेदके च प्रकारताऽऽख्यविषयत्वं न स्वीक्रियते; अपि तु विशेषणताऽऽत्मकविषयतेति भावः ।

केचित्तु-तन्मते संसर्गस्य स्वरूपतो भानेन न तादृशकार्य्यकारणभावाक्रान्ततेत्याहु,

तच्चिन्त्यं—संयोगादेः स्वरूपतो भानस्यानुभवविरुद्धत्वादुक्तरीत्या परीहारसम्भवाद्, भूतलं द्रव्यवदित्यादिभूतलावच्छेदस्यावगाहि प्रतीतेर्भ्रमत्वापाताच्च, यावन्तः संयोगाः सन्ति तेषां प्रत्येकं संयोगत्वकत्या निखिलभूतले सर्व्वेषामेव द्रव्यस्यैव बाधादिति ।

ननूक्तदोषवारणार्थं विशेषरूपेण तादृशकार्यकारणभाव आवश्यकश्चेदस्तु; तथाऽपि सामान्यतो विषयतासम्बन्धेन शाब्दबोधं प्रति विषयतासम्बन्धेन वृत्तिज्ञानजन्योपस्थितित्वेन हेतुत्वस्यान्वयव्यतिरेकसिद्धस्य सत्त्वेन संसर्गांशेऽपि वृत्तिरावश्यकी, एवकारादाविव तत्र तत्र पृथगुपस्थितयोरपि तयोर्विशेषणविशेष्यभावेन शाब्दबोधे मानत्वाकाङ्क्षाज्ञाननियम्यं विशेषकार्यकारणभावेनैव वा वारणीयमिति वा यदि कथ्यते ? तदाऽप्याह-(१)वस्तुनस्त्विति ।

एतत्पाठस्य (२)पूर्वं क्रोडपत्रम् ।

---

(१) क्रोडपत्रानन्तरमारभ्यमाणमूलस्य प्रतीकग्रहणमेतद् ।
(२) स्वामिमतकम एव टीकाकृता स्वाक्षररमूचि,
एतत्पाठस्येयादिना, एतच्छन्देन "वस्तुनस्त्वि"त्यादिनाऽऽगामिग्रन्थोऽवधेयः ।

क्रोड़पत्रम् ।

([एवं तद्विषयकशाब्दबोधे तच्छक्तपदज्ञानजन्यतदुपस्थितितल्लाक्षणिकपदज्ञानजन्यतदुपस्थित्योर्द्वयोरेव हेतुतया तयोः परस्परजन्यबोधे व्यभिचारस्य वारणाय तत्तत्कारणानन्तर्य्यस्य तत्तत्कारणजन्यताऽवच्छेदकप्रवेशप्रौव्येण पदार्थद्वयसंसर्गावगाहिबोधं वृत्तिज्ञानजन्यतदुपस्थितेर्व्यभिचारासत्त्वात्याऽन्वयस्य पदवाच्यत्वमप्रामाणिकम्]

न च शक्तिलक्षणयोर्वृत्तित्वेनानुगमसम्भवात्तदुभयविषयकज्ञानजन्योपस्थित्योरेकरूपेणैव हेतुतया नोक्तव्यभिचारप्रसक्तिरिति वाच्यम्?

उभयसाधारणवृत्तित्वस्यानुगतस्य दुर्व्वचत्वात् ।)

यत्तु–शक्तिविषयकज्ञानजन्यतदुपस्थितित्वेनैव शक्तिलक्षणाऽधीनपदार्थोपस्थित्योरनुगमसम्भवः; घटशक्तं घटपदमित्येतादृशशक्तिज्ञानजन्योपस्थितेरिव घटसम्बन्धिशक्तं घटपदमित्यादिलक्षणाज्ञानजन्योपस्थितेरपि घटादिसम्बन्धिपदादिनिरूपितशक्तिविषयकज्ञानजन्यत्वादिति नोक्तव्यभिचारप्रसक्तिः,

न च घटशक्तं घटपदमित्यादिज्ञानजन्यघटाद्युपस्थितौ पत्रोद्बो-

अथ क्रोडपत्रस्य टीका ।

व्यभिचारप्रसक्त्येति । शरेण संयुनक्तीत्यादितः संयोगादिविषयकशाब्दस्य संयोगांशे शक्तिग्रहाधीनोपस्थित्यव्यवहितोत्तरत्वरूपकार्य्यतावच्छेदकाक्रान्तस्य पूर्वं संयोगांशे शक्तिज्ञानसत्त्वाद् दण्डवानित्यादितः संयोगादिविषयकशाब्दे शक्तिज्ञानस्य लक्षणाग्रहस्य वाऽव्यवहितोत्तरत्वविरहेण तत्पूर्वं तादृशज्ञानजन्योपस्थित्यसत्त्वेऽपि न व्यभिचारसम्भव इति भावः ।

वृत्तित्वेति–अनुगमसम्भव इति । तथा च तत्तदर्थविषयकशाब्दं प्रति शक्तिविषयकज्ञानजन्यतदर्थविषयकोपस्थितित्वेनोभयसाधारणैककारणत्वं कल्प्यमिति भावः । उद्बोधकान्तरादिति । साहचर्य्यादिरूपसम्बन्ध-

---

( ) एतच्चिन्हान्तर्गतः पाठः प्राचीनपुस्तकेषु नोपलभ्यते ।

[ ] अनयोरन्तर्गतः पाठस्तु टीकाकृता पौनरुक्त्या नानुसन्धत इति क्रोडपत्रटीकाप्रातिलेखात्सुव्यक्तम् ।

धकान्तरात्पटादिभानं तादृशपटादिविषयकोपस्थितेरपि पटादिशाब्दबोधजनकत्वापत्तिरिति तद्विषयकशाब्दबोधे तदर्थविशेषितशक्तिविशिष्टपदविषयकज्ञानजन्यतदुपस्थितित्वेन हेतुता वाच्या; तथा च न तेन रूपेण घटसम्बन्धिशक्तं पटपदमित्यादिज्ञानजन्यघटाद्युपस्थितेः संग्रह इत्युक्तव्यभिचार एवेति वाच्यम् ?

शक्तिविषयत्वावच्छिन्नकारणतानिरूपितयौगिकतद्विषयत्वावच्छिन्नकार्य्यताशालित्वेनोपस्थितस्तच्छाब्दबोधहेतुतया दर्शितोद्बोधकान्तरप्रयोज्यपटादिविषयताकोपस्थितेर्निरुक्तकार्य्यताशालित्वविरहेणोक्तातिप्रसङ्गानवकाशात्, तदर्थविशेषितशक्तिविषयतापर्य्यन्तस्योपस्थितिनिष्ठकारणताऽवच्छेदकेऽनिवेशादनुगमसम्भवाच्चोक्तलक्षणाज्ञानहेतुतायामपि शक्तिविषयताया अवच्छेदकत्वेन प्रवेशादिति,

तन्न समीचीनम्—उक्तानुगतरूपेण पदार्थोपस्थितेर्हेतुत्वे घटकालीना या शक्तिस्तद्वत् पटपदमित्यादिज्ञानजन्यघटाद्युपस्थितितोऽपि घटादिशाब्दबोधप्रसङ्गात्, तत्कालीनशक्तिरूपपरम्परासम्बन्धविषयताऽन्तःपातिन्याः शक्तिविषयताया अपि तादृशसम्बन्धविषयताप्रयोज्यघटादिविषयताप्रयोजकत्वात्, तादृशशक्तिविषयकधियश्च घटादिनिरूपितत्वेन तत्सम्बन्धिनिरूपितत्वोपरागेण च पदे शक्त्यनवगाहितया शाब्दबोधप्रयोजकतच्छक्तपदज्ञानतल्लाक्षणिकपदज्ञानानात्मकतया तज्जन्योपस्थितेः शाब्दबोधजनकत्वोपगमासम्भवाद्,

न च यत्किञ्चिन्निरूपितत्वोपरक्तशक्तिविषयताप्रयोज्यतत्तदर्थ-

ज्ञानादित्यर्थः। तदर्थविशेषितेति। निरूपितत्वसम्बन्धेन विषयत्वसम्बन्धेन वा तदर्थविशिष्टशक्तिमत्पदविशिष्टज्ञानजन्येत्यर्थः, तादृशपदवैशिष्ट्यञ्च विषयित्वसम्बन्धेन,

एतच्चान्यथाख्यात्यनङ्गीकारमतेन, तेनान्यथाप्रसिद्धशक्तिभ्रमजन्योपस्थितेरसङ्ग्रहेऽपि न क्षतिः।

तादृशशक्तीति। घटकालीनशक्तिमत्पटपदादिविषयकधियइत्यर्थः। घटादिनिरूपितत्वेनेत्यस्य शक्त्यनवगाहितयेत्यत्र योजना, तत्सम्बन्धीति। घटादिसम्बन्धित्वोपलक्षितो यस्तन्निरूपितत्वेनेत्यर्थः। यत्किञ्चिन्निरूपि-

विषयताकोपस्थितित्वेन शाब्दधीजनकत्वोपगमान्नायमतिप्रसङ्गः; उक्तज्ञानीयशक्तिविषयतायाः किञ्चिन्निरूपितत्वाविषयतानिरूपितत्वविरहादिति वाच्यम् ?

एवमपि घटकालीना या पटनिरूपिता शक्तिस्तद्वत्पटपदमिति ज्ञानप्रयोज्यघटाद्युपस्थितेरुपधानुपचेः,

अथ किञ्चिन्निरूपितत्वविषयतानिरूपितत्वेन शक्तिविषयता यादृशकारणताऽवच्छेदिका तादृशकारणताप्रतियोगिकप्रकृतार्थविषयत्वावच्छिन्नकार्य्यताशालित्वेन पदार्थोपस्थितेर्हेतुत्वोपगमान्नायमतिप्रसङ्गः; शक्त्यंश उदासीनस्य पटनिरूपितत्वादेर्भानेऽपि घटकालीनशक्तिरूपघटीयपरम्परासम्बन्धविषयकपदज्ञानस्य घटादिस्मारकतया तत्स्मृतिजनकताऽवच्छेदककोटौ घटादिनिरूपितत्वविषयतानिरूपितत्वस्य शक्तिविषयकत्वेऽनिवेशादिति चेद् ?

तत्वोपगमेति । यत्किञ्चिन्निरूपितत्वनिष्ठविषयतानिरूपितशक्तिनिष्ठविषयतानिष्ठावच्छेदकताकजनकताकजन्यताऽवच्छेदकीभूततदर्थनिष्ठविषयताशाल्युपस्थितित्वेन तदर्थविषयकशाब्दनिरूपितजनकत्वाङ्गीकारादित्यर्थः ।

निरूपितत्वविरहादितीति । घटकालीनशक्तिमत्पटपदमित्यादिज्ञानीयविषयतायां कालीनत्वविषयतानिरूपितत्वस्यैव सत्त्वादिति भावः ।

ननु किञ्चिन्निरूपितत्वविषयतानिष्ठावच्छेदकताकशक्तिविषयतानिष्ठावच्छेदकताकज्ञानत्वावच्छिन्नजनकताका यदर्थनिष्ठविषयत्वावच्छिन्नोपस्थितिनिष्ठजन्यता तदर्थविषयकशाब्दं प्रति तादृशजन्यताशाल्युपस्थितित्वेन कारणत्वस्य कल्पनान्नोक्तदोषः ? घटकालीना या पटनिरूपिता शक्तिस्तद्वत्पटपदमिति ज्ञाने पदे घटस्य स्वकालीनशक्तिरूपसम्बन्धावगाहित्वेन तज्ज्ञानजन्योपस्थितिनिरूपितजनकताऽवच्छेदककोटौ तत्सम्बन्धाघटकस्योदासीनस्य पटनिरूपितत्वस्य विषयताया अप्रवेशादित्याशङ्कते—अथ किञ्चिदिति ।

ननु किञ्चिन्निरूपितत्वनिष्ठविशेषणतानिरूपितविशेषणतानिरूपितशक्तिनिष्ठसंसर्गतानिष्ठावच्छेदकतानिरूपितपदनिष्ठविषयतानिष्ठावच्छेदकताका या ज्ञाननिष्ठजनकता तन्निरूपिता या तदर्थविषयकत्वावच्छिन्नजन्यता तच्छाल्युपस्थितित्वेन तदर्थविषयकशाब्दं प्रति हेतुत्वेन शक्ति-

एवमपि यत्र ज्ञाने घटादेः शक्तत्वसम्बन्धेन पदांशे प्रकारता तज्जन्योपस्थितितोऽपि घटादेः शाब्दबोधोत्पत्त्या तदनुपपत्तिर्दुर्वारैव, तत्र पदांशेऽर्थसंसर्गतया भासमानशक्तावर्थस्य निरूपितत्वरूपसम्बन्धान्तराभानात्,

वस्तुतो घटत्वाद्युपलक्षितवाचकाद् द्रव्यादिपदाच्छक्त्याऽभ्रान्तस्य घटत्वादिप्रकारकशाब्दबोधवारणाय तद्धर्म्मप्रकारकशाब्दबोधे शक्तौ तद्धर्म्मविशिष्टनिरूपितत्वावगाहित्वेन शक्तिज्ञानस्योपयोगिता वाच्या; तथा च तत्सम्बन्धिशक्तत्वावगाहिनो लक्षणाग्रहस्य तेन रूपेणासंग्रहादननुगमेन व्यभिचारप्रसक्त्योक्तकार्य्यकारणभावे कारणानन्तर्य्यस्य प्रवेश आवश्यकः,

---

सम्बन्धेन स्वसम्बन्धिनिरूपितशक्तिसम्बन्धेन च घटवद् घटपदमित्याद्विज्ञानजन्यघटाद्युपस्थितेः संग्रह, असंग्रहश्च स्वकालीनशक्तिसम्बन्धेन घटवत्पटपदमित्यादिज्ञानस्य, नाङ्गीक्रियते च शक्त्यादिप्रकारकज्ञानजन्योपस्थितेः कारणत्वमिति ?

अथ वा-किञ्चिद्धर्म्मावच्छिन्नविषयनिष्ठावच्छेदकताभिन्ना सती तादृशावच्छेदकताकसम्बन्धिविषयतानिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपितनिरूपितत्वविषयतानिष्ठावच्छेदकताकशक्तिविषयतानिष्ठावच्छेदकताकजनकताकजन्यताशालितदर्थनिष्ठविषयताशाल्युपस्थितेः कारणतया न तद्दोष इति यदि विभाव्यते ? तदाऽप्याह—वस्तुत इति ।

द्रव्यपदं घटत्वविशिष्टे शक्तमित्यादिभ्रमेण द्रव्यादिपदादपि भ्रान्तस्य घटादेरन्वयबोधः भवत्येवेत्यत आह—अभ्रान्तस्येति । तादृशभ्रमरहितस्येत्यर्थः, तथा च तदानीं तादृशशक्तेरुपस्थितेरयोग इति भावः । तद्धर्म्मविशिष्टेति । तद्धर्म्मप्रकारकशाब्दबोधं प्रति निरूपितत्वसम्बन्धेन तद्धर्म्मविशिष्टवैशिष्ट्यापन्नशक्तिनिष्ठविषयतानिरूपितपदनिष्ठविषयताशालिनिश्चयत्वेन कारणत्वमित्यर्थः । उपलक्षितावगाहिज्ञानस्य यथा न कारणत्वं तथाऽग्रे दर्शयिष्यति । तत्सम्बन्धीति । तथा च लक्षणाग्रहे तद्धर्म्मावच्छिन्नविषयतानिरूपितसम्बन्धिनिष्ठविषयताकशक्तिनिष्ठविषयतासत्वेन न तस्य तादृशकारणताऽवच्छेदकाक्रान्ततेति भावः ।

एवं शक्तिज्ञानमुभयविधं विनिगमकाभावात् शाब्दबोधप्रयोजकं पदेऽर्थवाचकत्वावगाहि; अर्थे पदवाच्यत्वावगाहि च; तयोरपि नानुगमसम्भवः, वाच्यत्ववाचकत्वयोः शक्तिप्रतियोगित्वशक्त्याश्रयत्वरूपयोर्मिथोविलक्षणसम्बन्धरूपतयाऽनुगतानतिरिक्तरूपाभावात्, सम्बन्धत्वादिनाऽनुगमे तदीयकालिकादिसम्बन्धज्ञानादर्थधर्मिकपदवाचकतायाः पदधर्मिकार्थवाच्यतायाश्च ज्ञानात् शाब्दबोधापत्तेः तज्जन्योपस्थित्योरपि परस्परजन्यबोधे व्यभिचारः,

एवं लक्षणाज्ञानमपि पदेऽर्थसम्बन्धिवाचकताऽवगाहितयाऽर्थे पदवाच्यसम्बन्धिताऽवगाहितया च द्विविधशाब्दबोधप्रयोजकं तदधीनोपस्थित्योरप्यननतिप्रसक्तरूपेणानुगमासम्भवात् परस्परजन्यबोधे व्यभिचार इति कार्य्यताऽवच्छेदकगर्भे तत्कारणानन्तर्य्यप्रवेशो ध्रुव इत्यवधेयम् ।

क्रोडपत्रं समाप्तम् ।

द्विविधशक्तिज्ञानस्य कारणत्वानुरोधेनापि कार्य्यताऽवच्छेदककोटावानन्तर्य्यप्रवेशस्यावश्यकत्वं दर्शयति—एवमिति । सम्बन्धत्वादिनेति । सम्बन्धत्वं च विशिष्टधीजनकत्वं विशेष्यत्वप्रकारत्वान्यविशिष्टधीविषयत्वं संयोगसमवायाद्यन्यतमत्वं वा । अनुगम इति । तथा च तदर्थविषयकशाब्दं प्रति तदर्थनिष्ठविषयतानिरूपितसम्बन्धत्वसमानाधिकरणधर्मावच्छिन्नसंसर्गताकपदनिष्ठविषयताशालिज्ञानजन्योपस्थितित्वेन कारणत्वमिति ध्येयम्, आदिनैकज्ञानीयविषयत्वादिपरिग्रहः ।

एवं तद्विधेत्यादि यच्छिन्नकक्रोडपत्रीयपाठस्तु न सम्यक्; अग्रिमेण सह पौनरुक्त्यदोषप्रसक्तत्वादिति ।

इति क्रोडपत्रटीका ।



[वस्तुतस्तु शक्त्या लक्षणया चोपस्थितस्य तत्तदर्थस्य शाब्दबोधे मानादुभयविधतत्तदर्थोपस्थितेरेव तत्तद्विषयकशाब्दबोधहेतुता वाच्या; तादृशोपस्थित्योश्चानुगतानतिप्रसक्तकारणताऽवच्छेदकस्यागुरोर्दुर्वचतया व्यभिचारवारणाय शक्त्यादिज्ञानजन्यतदुपस्थितेर्जन्यताऽवच्छेदककोटौ तत्तत्कारणाव्यवहितोत्तरत्वनिवेश आवश्यकः।

इत्थञ्च वृत्त्यनुपस्थितस्यापि संसर्गस्य शाब्दबोधोपगमे व्यभिचारासक्त्या न किञ्चिद्बाधकमिति। किं तत्र वृत्तिकल्पनेन ?]

अथ तत्र वृत्त्यनुपस्थितस्यापि पदार्थद्वयसंसर्गस्य शाब्दबोधविषयत्वोपगमे सम्बन्धभाने नियामकाभावात् सर्वत्राबाधितयावत्संसर्गभानापत्तिरिति चेद् ?

वस्तुतस्त्विति। शक्तिलक्षणाऽन्यतरत्वस्यानुगतानतिप्रसक्तस्य सुवचत्वादाह-अगुरोरिति। तथा चैकभेदविशिष्टापरभेदवद्भेदात्मकस्यान्यतरत्वस्य विशेष्यविशेषणभाववैपरीत्येन द्विविधतया तद्रूपेण कार्यकारणभावकल्पने गुरुधर्मावच्छिन्नद्विविधकारणत्वापत्तिरिति,

नन्वन्यतरत्वस्याखण्डोपाधित्वेन न गौरवं न वा विशेष्यविशेषणवैपरीत्या च कार्यकारणभावद्वयापत्तिरिति चेद् ?

न-तस्याखण्डोपाधित्वे मानाभावाद्, अन्यथाऽनुमित्यादिनिष्ठपरामर्शादिजन्यताऽवच्छेदककोटावव्यवहितोत्तरत्वादेः प्रवेशस्य मणिकारादिसम्मतस्यानावश्यकत्वापत्तेः,

अथ तथाऽपि शाब्दबोधौपयिकोपस्थितिजनकसम्बन्धज्ञानजन्यत्वमनुगतमिति चेद् ?

मैवं—शाब्दबोधजनकत्वघटितधर्मेण तज्जनकत्वनिर्वचन आत्माश्रयापत्तेः, शाब्दबोधं प्रति शक्तिज्ञानादेः स्वयं कारणत्वखण्डनाच्चेति भावः। इत्थञ्चेति। अनुगतरूपेण तादृशकार्यकारणभावासम्भवे चेत्यर्थः, यावत्संसर्गेति। द्रव्यं घट इत्यादौ द्रव्यघटयोरभेदस्येव संयोगसमवायादीनामपि भानं स्यादिति।

इदमुपलक्षणं तेन चैत्रः पचतीत्यादौ कालिकादेरपि भानसम्भवेन

[ ] एतच्चिह्नान्तर्गतः पाठः प्राचीनपुस्तकेषु कोष्ठकाव्यवहितपूर्वमूलघटकतया वर्त्ते।

न-कयोश्चित् पदयोः केन चित् सम्बन्धेन स्वार्थान्वयबोधसाकाङ्क्षतयाऽऽकाङ्क्षाज्ञानस्यैव पदार्थसंसर्गभाननियामकत्वात्, ययोः पदयोर्नानासम्बन्धेन स्वार्थान्वयबोध आकाङ्क्षा तज्जन्यशाब्दबोधे संसर्गविशेषतात्पर्यज्ञानरूपकारणबलादेव सम्बन्धभाननियमोपपत्तेः; अन्वयांशे शक्त्युपगमेऽप्येकैकस्यैव पदार्थस्य संसर्गविषया क चित् कस्य चिद् भानं क्व चित् कस्य चिद्भानमित्यनियमेन सामान्यरूपेणैवान्वयस्य शक्यकोटावन्तर्भावणीयतयोक्तस्यैव संसर्गभाननियामकत्वात्,

न च संसर्गविशेषानुपस्थितौ तात्पर्यज्ञानासम्भवेन तदुपस्थितेरावश्यकतया तद्बोधकसंस्कारोद्बोधार्थमेव तत्र वृत्तिज्ञानमपेक्षितमिति वाच्यम् ?

तादृशाकृत्यादिशून्येऽपि घटादौ तादृशप्रयोगापत्तिरित्यपि बोध्यम् ।

। कयोश्चिदिति । पचतीत्यादौ पच्यादिपदतिङादिपदयोरित्यर्थः । केन चिदिति । अनुकूलत्वादिसम्बन्धेनेत्यर्थः । आकाङ्क्षाज्ञानस्येति । अन्वयबोधहेतोस्तत्तत्संसर्गेणैकपदार्थविशिष्टापरपदार्थज्ञानस्येत्यर्थः, तथा च पचतीत्यादौ पच्यादिपदार्थविशिष्टतिङादिपदत्वज्ञानस्यानुकूलत्वसम्बन्धेनैव पाकादिप्रकारककृतिविशेष्यकबोधं प्रत्येव हेतुतया न तत्र सम्बन्धान्तरभानमिति भावः, एवमन्यत्रापि । ययोरिति । द्रव्यं घटपदिदादौ द्रव्यघटादिपदयोरित्यर्थः, नानासम्बन्धेन=संयोगसमवायादिनानासम्बन्धेनेत्यर्थः । संसर्गविशेषेति । उक्तं वाक्यं संयोगेन द्रव्ये घटान्वयबोधेच्छया प्रयुक्तमित्याद्याकारकज्ञानेत्यर्थकं, तथा च यदा यत्र यादृशसम्बन्धघटितत्वतात्पर्यज्ञानं तद्घटितसामग्रीविशेषबलात् तदा तादृशसम्बन्धस्यैव भानमिति नानियम इति भावः ।

शक्तिज्ञानजन्यसंसर्गविशेषोपस्थितिरेव नियामिका कुतोऽनियमः ? इत्यत आह—सामान्यरूपेणेति । सम्बन्धत्वादिसामान्यधर्मेणेत्यर्थः । शक्यकोटौ=शक्यतावच्छेदककोटौ, शक्तिविषयघटादिघटके । उक्तस्यैवेति । तात्पर्यज्ञानस्यैवेत्यर्थः । संसर्गविशेषेति । इदं वाक्यम् एतद्धर्मावच्छिन्नविशेष्यताकेनैतत्सम्बन्धावच्छिन्नैतद्धर्मावच्छिन्नप्रकारताकबोधजनकत्वप्रकारकेच्छावदित्याद्याकारकपर्यवसन्ने तात्पर्यज्ञाने, अवच्छिन्नत्वांशे संयोगादेः प्रकारतया

उद्बोधकान्तरोपस्थितेऽपि संसर्गे तात्पर्य्यग्रहसम्भवात् तत्र वृत्तिग्रहस्यानपेक्षितत्वात्, तस्माद् घटत्वगोत्वादिविशिष्टे घटगवादिपदस्य शक्तिः; पदार्थद्वयसंसर्गस्त्वाकाङ्क्षादिबललभ्य एवेति स्थितम्,

घटादिपदस्य पदार्थतावच्छेदकीभूतघटत्वादिविशिष्टे एव शक्तिर्न तु तदुपलक्षिते; घटत्वादेरुपलक्षणत्वे तस्य द्रव्यत्वाद्यविशेषेण घटादिपदाद् द्रव्यत्वादिना न बोधः; अपि तु घटत्वादिनैवेति नियमानुपपत्तेः,

अथ घटत्वादेरिव द्रव्यत्वादेरपि वैशिष्ट्यस्य घटादौ सत्त्वाद् घटादिपदशक्तेर्घटत्वादिसामानाधिकरण्यरूपवैशिष्ट्यवद् द्रव्यत्वादिसामानाधिकरण्यस्यापि तत्र सत्त्वाद् घटादिविशिष्टे शक्तिर्न तु द्रव्यत्वादिविशिष्ट इत्यस्य कोऽर्थः ?

अत्र वदन्ति—तद्विशिष्टे शक्तिरित्यस्य तद्धर्म्मतद्वैशिष्ट्यतदाश्रयेषु निष्ठैव शक्तिरित्यर्थः, घटादिपदशक्तिमति द्रव्यत्वादिवैशिष्ट्यसत्त्वेऽपि

मानात् तादृशप्रकारताप्रयोजकतदुपस्थित्यभावेन तात्पर्यज्ञानासम्भव इति भावः ।

संस्कारोद्बोधार्थमेव=संस्कारे फलोपधानार्थमेव । तत्र=सम्बन्धे । उद्बोधकान्तरेति । सम्बन्धान्तरज्ञानादिजन्योपस्थितिविषय इत्यर्थकम् । तस्मादिति । संसर्गादौ शक्त्यनावश्यकत्वादित्यर्थः । घटत्वेति । अस्य सावधारणपरत्वेन, न त्वन्वितघटत्वादिविशिष्ट इति भावः । आकाङ्क्षादीति । आदिना योग्यतातात्पर्यज्ञानयोः परिग्रहः, तस्य=घटत्वादेः, द्रव्यत्वाद्यविशेषाद्=द्रव्यत्वादिना सह वैलक्षण्याभावादिति । आशङ्कते—अथेति । द्रव्यत्वसामानाधिकरण्यस्येति, तथा च घटादिपदस्य घटत्वादिविशिष्टे शक्तिरिति वाक्यजन्यप्रतीतौ सप्तम्या वृत्तिरर्थकतया घटत्वादिशक्त्योः सामानाधिकरण्यावगाहनेनापि न निस्तारः । अत्रेति । तादृशाशङ्कायामित्यर्थः,

वदन्तीति । स्वयन्तु जात्यवयवसंस्थानरूपाकृतौ व्यक्तौ च गवादिपदानां शक्तिस्वीकारादेतस्मिन्नानिर्भरसूचनाय तदुक्तम्, एतच्चाग्रे व्यक्तीभविष्यति, तद्वैशिष्ट्येति । तद्धर्म्मवैशिष्ट्येत्यर्थः, वैशिष्ट्यञ्च

द्रव्यत्वादौ तच्छक्तिविरहात् तेषामुपलक्षणता; घटत्वादौ तत्सत्त्वाच्च तेषां विशेषणता, एवञ्च प्रवृत्तिनिमित्तेऽपि शक्तेः सत्त्वात् तस्यापि वाच्यतया; वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वमिति प्रवृत्तिनिमित्तलक्षणे वाच्यत्वे सतीति विशेषणदानं "जात्याकृतिव्यक्तयः पदार्थः" इति न्यायसूत्रोक्तं गोत्वादिजातेर्गवादिपदार्थत्वं चोपपद्यते,

अथ घटशब्दाद् घटो बोद्धव्य इत्याकारिकायां भगवदिच्छाया-

सम्बन्धः, स च समवायादिः, उपलक्षणतेति। सामानाधिकरण्यमात्रमित्यर्थः।

वाच्यत्वे सतीत्यादि, आकाशादिशब्दस्य शब्दाश्रये स्वरूपतः शक्तिवादिप्राचां मते शब्दाश्रयत्वे प्रवृत्तिनिमित्तत्ववारणाय—वाच्यत्वे सतीति।

नव्यनये तु द्रव्यादिपदादपि घटत्वाद्युपलक्षितघटादौ शक्तिग्रहाद् घटत्वादिना घटाद्युपस्थितिर्जायतेऽतो द्रव्यादिपदानां घटत्वादौ प्रवृत्तिनिमित्तत्ववारणाय-तद्,

नन्वेवं घटादिपदार्थविशेषेणाकाशादिपदस्यापि विशिष्टवाचकत्वं; न तु निरवच्छिन्नशक्तिकत्वम्, एवञ्च प्रवृत्तिनिमित्तलक्षणे वाच्यत्वविशेषणमनुपादेयमेवेति दीधितिकारस्य तद्विशेषणखण्डनमसङ्गतम्; उक्तरीत्या द्रव्यादिपदानां घटत्वादौ प्रवृत्तिनिमित्तत्ववारकतया नव्यमतेऽपि तत्सार्थक्यसम्भवादिति चेद्?

न—सामान्यतः शक्तिविषयत्वविशेषणेनोपपत्तौ वाच्यत्वपर्यन्तप्रवेशो व्यर्थ इत्यत्र तात्पर्याद्,

न च तादृशज्ञानेन घटत्वांशे सम्बन्धानवगाहनाद् घटत्वादिना तत्स्मरणं दुर्घटमिति वाच्यम्?

स्मृतिजनने प्रकारांशे सम्बन्धभानानपेक्षणाद्, अन्यथा लक्षणाऽप्रदृक्तीरत्वादिना तीरादेः स्मृत्यनुपपत्तेः,

गवादिपदानां जात्याकृतिविशिष्टवाचकतामते तेषां संस्थाने प्रवृत्तिनिमित्तत्ववारणाय—वाच्यवृत्तित्वे सतीति।

न च स्वाश्रयविशेषसंयोगरूपस्य संस्थानस्य स्वसमवायिसमवेतत्वसम्बन्धेन गवादौ वृत्तित्वात्तद्विशेषेऽप्यतिव्याप्तितादवस्थ्यमिति वाच्यम्?

बोधविशेषविषयतात्वेन बोधविषयप्रकारतानिरूपितविशेष्यता घट एव न तु घटत्वादौ विषयतामात्रञ्च वस्तुमात्र एवेति कथं घटपदशक्तिर्घटत्वादिषु त्रिष्वेवेति नियम इति चेद् ?

ईश्वरेच्छायास्तत्पदजन्यशाब्दबोधविषयताप्रयोजकसम्बन्ध एव

साक्षात्सम्बन्धेन तद्विवक्षणाद्, एतच्चाग्रे स्वयमेव वक्ष्यते,

वृत्तित्वञ्चात्र वाच्यताघटकसम्बन्धेन विवक्षणीय, नातः सत्स्थानस्य कालिकादिसम्बन्धेन गवादौ सत्त्वेऽपि तत्रातिव्याप्तितादवस्थ्यम्, वृत्तित्वपदेन सम्बद्धत्वस्य विवक्षणीयतया गम्यादिधातूनां प्रवृत्तिनिमित्तसयोगादेरनुकूलत्वादिसम्बन्धेन वृत्तित्वविरहेऽपि न क्षति, पशुपदस्य त्वेतन्मते लोमवल्लाङ्गूलविशिष्ट एव शक्ति, न तु स्वाश्रयलाङ्गूलसमवेतत्वसम्बन्धेन लोमवति नातस्तत्राव्याप्ति, यत्र बुद्धिस्थतादृशपरम्परासम्बन्धेन लोमविशिष्टस्तच्छब्देन परामृश्यते तत्र तच्छब्दस्य लक्षणैव न तु शक्तिरतो न तत्राव्याप्ति,

तच्छब्दस्य लक्षणा नास्ति सर्वत्रैव शक्तिरिति तु नाशङ्कनीयम्, अवयवग्रन्थे जगदीशतर्कालङ्कारेण तच्छब्दस्यापि लक्षणास्वीकाराद्,

द्रव्यदधिपदादेर्घटदध्यादौ प्रवृत्तिनिमित्तत्वापत्ति, घटादिरूपद्रव्येऽवयविरूपदध्यादौ च वाच्यत्वस्य सत्त्वात् तद्वाच्यात्मककपालाद्यवयवे दध्नि च वृत्तेश्चातो—वाच्योपस्थितीति । तदर्थस्तु भ्रमान्यशक्तिज्ञानजन्या योपस्थितिस्तन्मुख्यविशेष्यताकप्रकारताऽऽश्रयत्वम्, द्रव्यपद द्रव्यवति शक्तमिति शक्तिभ्रमजन्योपस्थितिमादाय द्रव्यपदादेर्घटादावतिव्याप्तितादवस्थ्याद् भ्रमान्येति, द्रव्यपद द्रव्यवति लाक्षणिकमिति ज्ञानजन्योपस्थितिमादायोक्तातिव्याप्तिवारणाय-शक्तीति, मुख्यविशेष्यतानिवेशाच्च पशुपदादीनां शक्यताऽवच्छेदकताऽवच्छेदके लोमादौ नातिव्याप्तिरिति ।

विषयतामात्रञ्चेति । अस्येश्वरेच्छीयविषयतात्वावच्छिन्न तत्पदजन्यबोधविषयत्वप्रकारकेश्वरेच्छीयविषयतात्वावच्छिन्न चेत्यर्थ ।

वस्तुमात्र एवेति । तथा च घटत्वादौ वाच्यत्वोपपत्तावपि सर्वेषु पदार्थेषु सर्वेषां पदानां वाच्यत्वापत्तिरिति भाव ।

ईश्वरेच्छाया इति । अत्र षष्ठ्यर्थो निरूपितत्वं तस्य च विषयताऽऽत्मकसम्बन्धेऽन्वय, भगवदिच्छा तु तत्तत्पदजन्यबोधीययादृशविषयत्वेन यमवगाहते तत्र शाब्दबोधीयतादृशविषयता प्रयुक्त इति नियमम

तत्र तत्पदशक्तिव्यपदेशनियामकः, घटपदाद् घटो बोध्य इत्येतादृशेच्छायाश्च घटत्वावच्छेदेन बोधविषयत्वमवगाहमानाया समवायावच्छिन्नबोधविषयत्वावच्छेदकत्वं घटत्वे समवायेन घटत्वावच्छेद्यत्वं वा विषयताया संसर्गमर्य्यादया भासते,

एवञ्चाश्रयत्वसम्बन्धावच्छिन्नबोधविषयत्वप्रकारतानिरूपितविशेष्यत्वं घटस्यावच्छेदकत्वसंसर्गावच्छिन्नघटविशेषणताऽऽपन्नबोधविषयत्वस्य या प्रकारता तन्निरूपितविशेष्यत्वं घटविशेषणताऽऽपन्नबोधविषयत्वाश्रयेऽवच्छेद्यत्वसम्बन्धेन प्रकारत्वं वा घटत्वस्य घटत्वे बो-

ध्येत्याह-घटपदादिति । इत्येतादृशेच्छायामित्यत्र सप्तम्यर्थो निरूपितत्वं तस्य च भासत इत्यत्र भासधात्वर्थविषयतायामन्वयः, घटत्वे इत्यत्र सप्तम्यर्थो विशेष्यत्वम् अस्यापि निरूपितत्वसम्बन्धेन भासधात्वर्थेऽन्वयः, भासत इत्यत्राख्यातार्थं आश्रयत्वरूपं कर्त्तृत्वं तस्य चावच्छेदकत्वमित्यत्रान्वयः । संसर्गमर्य्यादयेति । सांसर्गिकविषयतयेत्यर्थः, अभेदेऽत्र तृतीयाऽर्थः तस्यापि भासत इत्यत्र भासधात्वर्थेऽन्वयः, तथा च ईश्वरेच्छानिरूपितघटत्वनिष्ठविशेष्यतानिरूपितसांसर्गिकविषयत्वाभेदवद्विषयत्वाश्रयो बोधविषयताऽवच्छेदकत्वमित्यन्वयबोधः, बोधविषयतापर्य्यन्तं परिचायकं बोध्यम्,

द्वितीयपक्षे बोधविषयतायामित्यत्र सप्तम्यर्थो विशेष्यत्वं तथा च ईश्वरेच्छीयबोधविषयतानिष्ठविशेष्यतानिरूपितसांसर्गिकविषयत्वाभेदवद्विषयत्वाश्रयो घटत्वावच्छेद्यत्वमित्यन्वयबोधः ।

अत्र प्रथमकल्पे तादृशबोधविषयत्वं घटे भासमानं तद्विशेष्यताऽनन्ययेणावच्छेदकतासम्बन्धेन घटत्वे भासते,

द्वितीयकल्पे घटत्वं स्वधर्म्मिताऽवच्छेदकत्वे तादृशेच्छायां भासमाने तादृशविषयत्वे समवायसम्बन्धावच्छिन्नावच्छेद्यतासम्बन्धेन तथा भासत इति बोध्यम् ।

घटविशेषणताऽऽपन्नबोधविषयत्वेत्यनेन परतन्त्रा तादृशबोधविषयत्वनिष्ठप्रकारताकविशेष्यता न तु स्वतन्त्रेति सूचितं, तथा चाश्रयत्वसम्बन्धावच्छिन्नस्वतन्त्रबोधविषयत्वनिष्ठप्रकारत्वावच्छिन्ना याऽवच्छेदकत्वसम्बन्धावच्छिन्नेच्छीयप्रकारता तन्निरूपितविशेष्यता घटत्वादिविशिष्टपदस्य शक्तिः,

एवञ्चावच्छेद्यावच्छेदकभावापन्नप्रकारतानिरूपिताविषयताद्वयमेव

धर्मविषयतायाः संसर्गविधया भासमानेऽवच्छेदकत्वेऽवच्छेदकतया भासमानत्वं समवायस्येति त्रितयमेव घटपदजन्यबोधविषयतायां ज्ञातमुपयुज्यत इति त्रयाणां वाच्यतोपपत्तिः,

---

पृथग् विशेष्यविशेषणतत्संसर्गाणां शक्तिर्न तु विशेष्यभेदादिव विशिष्टमात्रमिति, अवच्छेदकत्व इत्यत्र सप्तम्यर्थो विशेष्यत्व तस्य च निरूपितत्वसम्बन्धेन भासमानत्वमित्यत्र भासधात्वर्थविषयतायामन्वय । अवच्छेदकतयेति । अवच्छेदकत्वसंसर्गेण तृतीयार्थोऽवच्छिन्नत्व तस्यापि भासधात्वर्थेऽन्वय । ज्ञातमुपयुज्यत इति ।

अथात्र किमाकारक ज्ञान उपयोगि ?

अत्र नव्या –तत्तत्पदजन्यबोधीयविषयतात्वावच्छिन्नेच्छीयप्रकारताकविशेष्यतानिष्ठप्रकारतानिरूपितघटादिनिष्ठमुख्यविशेष्यताक तादृशविषयतात्वावच्छिन्नेच्छीयप्रकारत्वावच्छिन्नावच्छेदकत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यताप्रकारक घटत्वादिमुख्यविशेष्यकम् इच्छीयतादृशप्रकारत्वावच्छिन्नप्रकारतानिरूपितावच्छेदकत्वनिष्ठसंसर्गतानिरूपितावच्छिन्नत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकत्वनिरूपिताधेयत्वसम्बन्धावच्छिन्नावच्छेदकताप्रकारक समवायादिविशेष्यकञ्च ज्ञान समवायेन घटत्वादिप्रकारकघटादिविशेष्यकान्वयबुद्धौ हेतुरिति प्राहु ।

यत्तु—घटत्वादिनिष्ठविशेष्यताकसमवायसम्बन्धावच्छिन्नावच्छेदकत्वनिष्ठसांसर्गिकविषयताकप्रकारत्वावच्छेदिका या तादृशविषयतात्वावच्छिन्नेच्छीयप्रकारता तन्निरूपितविशेष्यतावान् घट इत्याकारकमेक विशिष्टवैशिष्ट्यावगाहिज्ञानं हेतुरिति,

तत्तुच्छम्–एतद्ग्रन्थस्य तादृशज्ञानपरत्वे "अथ घटत्वे"त्याद्यग्रिमग्रन्थेन घटत्वविशेष्यकज्ञानस्य कारणत्वे घटत्वत्वानुपस्थितिकाले तादृशशाब्दबोधानुपपत्तिशङ्कनस्यासङ्गत्यापत्तेः, तत्र घटत्वादेर्विशेषणतया प्रवेशादिति ।

परे तु–तत्तत्पदजन्यबोधविषयतात्वावच्छिन्नेच्छीयप्रकारतानिष्ठप्रकारतानिरूपित घटत्वादिनिष्ठविशेष्यताश्रय तन्निरूपक ज्ञानमेव हेतु, सम्भवति च तादृशज्ञान यथा घटपटमठा इत्यादौ घटत्वाद्यवच्छिन्नविशेष्यताश्रयनिरूपिताश्रित्वादिनिष्ठप्रकारतानिरूपक ज्ञान, तदविदापि, अत्र घटेत्यादौ व्यासज्यवृत्तिधर्मानिष्ठकसम्बन्धावच्छिन्ने

घटघटत्वसंसर्गेषु सङ्केतविषयतानां मिथो वैलक्षण्येऽपि तन्निरूपकबोधनिष्ठविषयताया ऐक्याच्छक्त्यैक्यप्रवादो; न तु सङ्केतैक्यात्, शक्तशक्यत्वावच्छेदकभेदेनापि शक्तिभेदानुपपत्तेः भगवत्सङ्केतस्याभेदात्, तदंशे आश्रयत्वसम्बन्धावच्छिन्नबोधविषयत्वप्रकारतानिरूपितसङ्केतविषयताऽवगाहिज्ञानस्यैव पदार्थान्तरान्वयबोधोपयोगित्वमिति शक्तिभ्रमं विना न पदार्थताऽवच्छेदके पदार्थान्तरान्वयः,

---

कप्रकारता; प्रकृते स्वव्यासज्यवृत्तिधर्मनिष्ठा विभिन्नसम्बन्धावच्छिन्ना, तादृशसम्बन्धाश्च-स्वनिरूपितविशेष्यत्वस्वावच्छिन्नप्रकारताकविशेष्यत्वस्वावच्छिन्नप्रकारताऽवच्छेदकतानिरूपितावच्छेदकत्वस्वरूपाख्यात् विशेष इति ध्येयमिति वदन्ति ।

नन्वेतावता सङ्केतविषयतानामेव शक्तित्वमायातं, सा च पदार्थतदवच्छेदकादिभेदेन विभिन्नेति कुतस्त्यैका शक्तिरिति प्रवादोपपत्तिरित्याशङ्कायां? समाधत्ते-घटघटत्वेत्यादि । तन्निरूपकेति । सङ्केतनिरूपकेत्यर्थः । बोधविषयतायाः=बोधनिष्ठविषयतायाः,

शक्त्यैक्यप्रवाद इति । उपपद्यत इति शेषः, तथा चैका=एकनिरूपिका, साक्षात्परम्परासाधारणनिरूपितत्वसम्बन्धेनैकत्वविशिष्टा चेत्यर्थः ।

हर्यादिनानाऽर्थकशब्दानां शक्यताऽवच्छेदकैक्येऽपि विष्णुत्वसिंहत्वादिशक्यताऽवच्छेदकभेदेन शक्तिभेद इष्यत उक्तं-शक्यत्वेति ।

ननु घटत्वादावपि शक्तिस्वीकारे तेषां पदार्थत्वेन तत्र पदार्थान्वये घटो नित्य इत्यादितोऽप्यम्लानतामन्वयबोधः स्यादित्यत आह-तदंश इत्यादि । ज्ञानस्यैवेति । एवकारेणावच्छेदकत्वसम्बन्धावच्छिन्नबोधविषयत्वनिष्ठप्रकारतानिरूपितसङ्केतविषयत्वावगाहिज्ञानादेर्व्यवच्छेदः, पदार्थान्तरान्वयबोधोपयोगित्वं भिन्नवृत्त्युपस्थापितार्थान्वयबोधोपयोगित्वं, तेन गच्छतीत्यादौ तिङुपस्थाप्यवर्तमानत्वादेर्न तदुपस्थाप्यताऽवच्छेदककृतित्वादावन्वयः, शक्तिभ्रमं विना=भ्रमात्मकतादृशज्ञानं विना, न पदार्थताऽवच्छेदक इति । एतच्च प्रायिकाभिप्रायेण, तेन पचतीत्यादौ कृत्युपस्थाप्यताऽवच्छेदककृत्यादौ पाकादेरन्वयेऽपि न क्षतिः,

अथ कुत्र स्थले पदार्थताऽवच्छेदके पदार्थान्तरान्वयापत्तिः ? यद्वारणाय तादृशकार्यकारणभावकल्पनम् ।

न च यत्र घटत्वे नित्यस्य लोम्नि पशुभेदस्याबाधितस्य योग्यताज्ञानं तात्पर्यज्ञानं तदवच्छिन्ने शक्तिभ्रमादृते घटत्वावच्छिन्नस्य लोमा-

वच्छिन्नस्य चोपस्थितिश्च वर्त्तते तत्र घटो नित्य पशुर्न पशुरित्यादिवाक्याद् घटत्वेऽभेदेन नित्यस्य लोम्नि च पशुभेदस्यान्वयबोध स्यादिति वाच्यम् ?

तादृशबोध प्रति घटत्व नित्य लोम न पशुरित्याद्याकाङ्क्षाज्ञानस्यैव कारणतया तद्विरहादेव तादृशापत्तेरसम्भवाद्,

ननु यत्र घटपदस्य घटत्वे पशुपदस्य वा लोम्नि शक्तिभ्रमो लक्षणाग्रहो वाऽस्ति, तत्रेतरकारणसहकृतात् तादृशवाक्याद् घटत्वे नित्यस्य लोम्नि वा पशुभेदस्यान्वयबोधजननेन तादृशबोध प्रत्यप्याकाङ्क्षाज्ञानात्मकस्य तादृशवाक्यज्ञानस्य कारणतया वक्तव्यत्वेनोक्तस्थले तादृशापत्तिर्भवत्येवेति चेद् ?

न–तत्र तादृशशक्तिभ्रमादिजन्याया लक्षणाग्रहजन्याया वा घटत्वादेरुपस्थितेरसत्त्वेन तादृशापत्तेरयोगाद्,

यादृशयादृशकारणसत्त्वे कुत्र चित् कार्य्यमुत्पद्यते तादृशकारणस्तोमस्यैव कार्य्योपादकत्वनियमादिति चेद् ?

नैवम्—यस्मादेतद्ग्रन्थस्यायमभाव—उपस्थितेर्हेतुताया मुख्यविशेष्यत्वादिरूपविषयताविशेषस्याप्रवेशेन तद्धर्म्मप्रकारेण तद्विषयकशाब्द प्रति शक्तिग्रहजन्यतद्धर्म्मप्रकारेण तद्विषयकोपस्थितित्वेनैव हेतुत्व यदि वाच्य, तथा च घटादिपदाना घटत्वादौ शक्तिभ्रमाद्यधीनघटत्वाद्युपस्थितेरपि घटत्वादिविषयकान्वयबोध प्रति शक्तिज्ञानजन्यघटत्वादिविषयकोपस्थितित्वेनैव हेतुतया घटत्वविशिष्टे शक्तिग्रहाद्यधीनघटादिविषयकोपस्थितेर्घटत्वादिविषयकतया तादृशकारणतावत्त्वेन शक्तिग्रहाद्यधीनघटत्वादिप्रकारकघटाद्युपस्थितिकाले इतरकारणसत्त्वे तादृशापत्तिर्दुर्वारैव, कारणताऽवच्छेदका यावन्तो धर्म्माः प्रत्येक तद्धर्म्मावच्छिन्नयत्किञ्चिद्व्यक्तीना सत्त्वस्यैव कार्य्योत्पादकत्वनियमेन तदापादकत्वाद्,

अथ स्वानधिकरणादिषु तत्तच्छाब्दबोधस्यापत्तिवारणाय तत्तच्छाब्दव्यक्तिं प्रति शक्तिज्ञानजन्यतत्तदुपस्थितिव्यक्तित्वेन हेतुताया आवश्यकत्वेन शक्तिभ्रमाद्यधीनतदुपस्थितिव्यक्तेस्तदानीमसत्त्वेन न तदापत्तिरिति चेद् ?

यदि तत्तद्व्यक्तित्वस्य कार्य्यताऽवच्छेदकत्व कल्प्येत तदा तद्व्यक्तित्वावच्छिन्न प्रति कारणमेव तद्व्यक्तित्वावच्छिन्नमापादयति तदेव न प्रयोजनविरहाद्,

अथ वा भवतु तद्व्यक्तित्व कार्य्यताऽवच्छेदक मा वा, तथाऽपि

तत्र घटत्वादिधर्म्मिकघटादिभेदप्रकारकाद्यन्वयबुद्धित्वरूपसामान्यधर्मावच्छिन्नस्यापत्तेर्दुर्वारत्वात् सामग्रीसत्त्वात् तत्र तद्व्यक्तिकारणानपेक्षणाद् अन्यथाऽन्वयव्यतिरेकदर्शनादिना सामान्यधर्मावच्छिन्नं प्रति सामान्यधर्मावच्छिन्नस्य कारणताग्रहो न स्याद् यस्मात् यस्य व्यतिरेके दृष्टचरेभ्य इतरकारणेभ्यः कार्य्योत्पत्तिर्नावलोक्यते जायते चैतद्येतत् कार्य्यं प्रति कारणं न स्याद् एतत् कार्य्यमवश्यमुत्पद्येतेत्यापत्तिस्तदा तत् कार्य्यं प्रति तस्य कारणत्वं परिच्छिद्यते, यस्य व्यतिरेके तादृशापत्तेस्सकलेत्यादितर्कदीधितेरपि तत्रैव तात्पर्य्यबोध्यं, तत्र यद्यीतरकारणमध्ये तद्व्यक्तिरूपकारणमप्यपेक्ष्यते तदा यद्वह्निव्यक्तिसत्त्वे महानसादौ धूमोत्पत्तिरवलोकिता; अन्यत्र तद्वह्निव्यक्तेरसत्त्वेन तदापत्तेरसम्भवः स्यादत एवानुमितिनाशकालेऽनुमित्युत्पादो दुर्व्वार एवेति दीधितिरपि सङ्गच्छते,

वस्तुतस्तु यत्र यत्र स्थले यद्यच्छरीरावच्छेदेन पदार्थताऽवच्छेदकधर्म्मिकशक्तिभ्रमादिजन्यपदार्थताऽवच्छेदकोपस्थितिघटितसामग्र्येकदैव समवहिता न तु तत्पूर्व्वं तत्परतो वा; तत्तच्छरीरावच्छेदेनात्मनि पदार्थताऽवच्छेदकान्वयबोध एकैक एव, तत्तच्छाब्दबोधव्यक्तिं प्रति तु तत्तच्छरीरव्यक्तेरेव कारणत्वं कल्प्यते नान्यस्य तत्र तत्र तद्धर्म्मविशिष्टधर्म्मिकशक्तिग्रहाद्यधीनोपस्थितिघटिततादृशसामग्रीतः पदार्थताऽवच्छेदक इतरपदार्थान्वयबोधापत्तिर्वृत्तेति,

यत्तु-तादृशपारमार्थिककारणकूटाभावादेव न तादृग्बोधापत्तिरित्येतद्ग्रन्थस्य तात्पर्य्यं न त्वतिरिक्तकार्य्यकारणभावकल्पनया तादृशापत्तिवारणे तात्पर्यम्;

तदसद्-उक्तापत्तेरवारणाद्, गतिसम्भवे ग्रन्थस्य यथाश्रुतार्थपरित्यागानर्हत्वाच्चेति,

अथ कीदृशकार्य्यकारणभावः कल्पनीयो येन न तदापत्तेति ?

अत्र नव्याः-किञ्चित्प्रकारतानिरूपिता योपस्थितिप्रयोज्या सांसर्गिकविषयता तन्निरूपिततत्पदार्थनिष्ठविशेष्यताशालिशाब्दत्वावच्छिन्नं प्रति किञ्चित्पदजन्यबोधविषयत्वनिष्ठाश्रयत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितेच्छीयविशेष्यत्वनिष्ठप्रकारताकतत्पदार्थनिष्ठविशेष्यताशालिज्ञानत्वेन तादृशविशेष्यतासम्बन्धेन शाब्दं प्रति तादृशविशेष्यतासम्बन्धेनोपस्थितित्वेन वा हेतुता वाच्या, अत एव पशुर्घायतीत्यादौ लोमनिष्ठविशेष्यताया उपस्थितिप्रयोज्यसांसर्गिकविषयतानिरूपितत्वेन न क्षतिरित्याहुः ।

यत्तु–तदंशे सङ्केतमुख्यविशेष्यताग्रहस्तत्रेतरान्वयबोधप्रयोजको लोमादिमान् पशुपदाद्बोद्धव्य इत्याकारकसङ्केते लोमाद्यंशे बोधविषयतायाः प्रकारत्वेऽपि लोमादेर्धर्मिविशेषणताऽऽपन्नस्यैव तादृशविषयताविशेष्यत्वं; न तु मुख्यविशेष्यत्वमतो न लोमादौ पदार्थान्तरान्वय इति,

तन्न–लोम पशुपदजन्यबोधविषयताऽवच्छेदकं भवत्वित्याद्याधुनिकसङ्केतविषयकादवच्छेदकतासंसर्गावच्छिन्नतादृशबोधविषयत्वप्रकारताकमुख्यविशेष्यं लोमेति ज्ञानाल्लोमादिमुख्यविशेष्यकशाब्दबोधानुदयेनाश्रयत्वसम्बन्धावच्छिन्नत्वेन तादृशबोधविषयत्वप्रकारताऽवगाहिताया अवश्यं निवेशनीयत्वात्, तत्र च लोमावच्छिन्नविषयकबोधस्यैव सङ्केतविषयतया ग्रहेणान्यादृशबोधोत्पत्तेरनुभवविरुद्धतयेष्टापत्तेरयोगात् तादृशविशेष्यतायां मुख्यत्वनिवेशे प्रयोजनाभावाद्व,

एवञ्च पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेत्यत्र पदार्थत्वं बोधविषयताऽऽश्रयत्वेन सङ्केतविषयत्वं, तदेकदेशत्वञ्च बोध-

---

यत्त्विति। विशेष्यताया मुख्यत्वं प्रकारत्वानवच्छिन्नत्वं, प्रकारत्वेऽपीति। अवच्छेदकतासम्बन्धेनेति शेषः,

न तु मुख्यविशेष्यत्वमिति। पारतन्त्रीयतादृशविशेष्यतायाः स्वातन्त्रीयतादृशप्रकारत्वावच्छिन्नत्वादिति भावः।

ईश्वरसङ्केतस्य तादृशत्वे मानाभावादाह—आधुनिकेति। सङ्केतेति। लोम, अवच्छेदकतासम्बन्धेन पशुपदजन्यबोधीयविषयतावद्भवत्वित्याकारकेत्यर्थः। तेनेति। तादृशसङ्केतग्रहोत्तादृशबोध इत्यर्थः। सप्तम्यर्थो विषयत्वं तस्य चेष्टापत्तावन्वयः, एवञ्च=सङ्केतीयमुख्यविशेष्यत्वस्येतरपदार्थान्वयप्रयोजकत्वे च,

ननु स्वमते लोम पशुपदजन्यबोधविषयत्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितसङ्केतीयमुख्यविशेष्यताकमिति ज्ञानाल्लोमांश इतरपदार्थान्वयवारणेऽपि लोमविशिष्टांश इतरपदार्थान्वयानुपपत्तिः, तदंशे आश्रयत्वसम्बन्धावच्छिन्नप्रकारताकविशेष्यत्वस्यामानादिति चेद्?

न–यतो लोमघत पशुपदजन्यबोधविषयत्वनिष्ठाश्रयत्वसम्बन्धा

विषयताऽवच्छेदकत्वेन तथात्वरूपं, तदेव च शक्यताऽवच्छेदकत्वमित्यवधेयम् ।

अथ घटत्वाद्युपलक्षिते द्रव्यपदशक्त्यवगाहिभ्रमातो घटत्वादिप्रकारकस्य घटादिपदशक्तिभ्रमातः कालिकादिसम्बन्धेन घटत्वादिप्रकारकस्य च शाब्दबोधस्य वारणाय तत्सम्बन्धेन तद्धर्मप्रकारकशाब्दबोधं प्रति तत्सम्बन्धेन तद्धर्मविशिष्टांशे तत्पदवाच्यत्वावगाहि ज्ञानं कारणं वाच्यम् ,

विशिष्टांशे तत्पदवाच्यत्वावगाहित्वञ्च विशेषणीभूततद्धर्मतत्सम्बन्धतद्धर्म्यंशे तदवगाहित्वरूपं वाच्यं; न तु तेन सम्बन्धेन तद्धर्मं धर्मिताऽवच्छेदकीकृत्य तदवगाहित्वमात्रम् ,

घटत्वादिकं धर्मिताऽवच्छेदकीकृत्य द्रव्यादिपदशक्तिज्ञानस्यापि कालिकादिसम्बन्धेन घटत्वादिकं धर्मिताऽवच्छेदकीकृत्य घटादौ घटादिपदशक्तिग्रहस्यापि च प्रमात्वेनोक्तातिप्रसङ्गावारणाद्, एवमपि

वच्छिन्नप्रकारतानिरूपितविशेष्यत्वप्रकारकज्ञानस्य तज्जन्योपस्थितेश्च सत्त्व उक्तज्ञानसत्त्वेऽपि लोमवतीरपदार्थान्वये बाधकाभावात् तादृशबोधो भवत्येव, तादृशज्ञानजन्यलोमवदनुपस्थितौ तु तत्कारणविरहादेव न तदुत्पत्तिः,

यत्त्वितिमतेऽपि तादृशोपस्थितिकाल एव दोषं दत्तवानिति न कोऽपि दोषः,

एतेन वाक्यसद्भावानुसन्धानवत् केषाञ्चित् तदुपपादनान्तरप्रयासो विफल एवेति ध्येयम् ,

ननु तथाऽपि पशुपदं पशुं बोधयत्विस्यादिबाधकत्वज्ञानात् पश्वादावितरपदार्थान्वयो न स्यात् तदंश आश्रयत्वसम्बन्धावच्छिन्नप्रकारताकविशेष्यत्वज्ञानविरहादिति चेद् ?

न-अस्माच्छब्दादयमर्थो बोद्धव्य इत्युत्तरकल्प एव भट्टाचार्यस्य निर्भरत्वात् , शब्दमणौ मिश्रेण तथैव लिखितत्वाच्च,

विषयत्वसम्बन्धावच्छिन्नतादृशशङ्कितीयप्रकारताप्रकारकज्ञानस्यापीतरान्वयबोधप्रयोजकत्वकल्पनाच्चेति ।

आशङ्कते-अथेति । घटत्वाद्युपलक्षिते=घटत्वाद्याश्रये, तदवगाहि-

घटत्वांशे निर्द्धर्म्मितावच्छेदककात् प्रमेयत्वादिधर्म्मितावच्छेदककाच्च घटादिपदनिरूपितवाच्यताग्रहात्तत्प्रकारकबोधवारणाय स्वरूपतो घटत्वादिप्रकारकबोधे घटत्वत्वावच्छिन्नधर्म्मिकवाच्यत्वग्रहापेक्षोपेया, तथा च घटत्वत्वाद्यनुपस्थितिदशायां घटादिपदाच्छाब्दबोधानुपपत्तिः,

न च तदंशे घटादिवाचकताज्ञानमेव शाब्दबोधहेतुः; एवञ्च स्वरूपतो घटत्वादिप्रकारकबोधे वाचकत्वांशे स्वरूपतो घटत्वादिप्रकारकज्ञानस्यैव हेतुत्वमिति घटादिपदजन्यबोधे घटत्वत्वाद्युपस्थितेर्नापेक्षेति वाच्यम् ?

एवमपि घटादिपदांशे समवायवाचकताप्रकारकज्ञानस्य शाब्दबोधे घटत्वादिसम्बन्धतया स्वरूपतः समवायभानप्रयोजकताया-

---

त्वरूपमिति । वाच्यत्वावगाहित्वरूपमित्यर्थः । मात्रमिति । मात्रपदेन घटत्वांशे वाच्यत्वावगाहित्वव्यवच्छेदः । एवमपीति । घटत्वादित्वे वाच्यत्वावगाहिज्ञानस्य हेतुत्व इत्यर्थः ।

निर्द्धर्म्मितावच्छेदकेति । घटादिपदजन्यबोधविषयत्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नप्रकारताकविशेष्यतावदित्याकारकादित्यर्थः,

तादृशविशेष्यत्वनिष्ठप्रकारताकिञ्चिदवच्छिन्नविशेष्यताशालिज्ञानत्वेन हेतुत्वे चाह—प्रमेयत्वादीति । प्रमेयं घटादिपदजन्यबोधविषयत्वनिष्ठावच्छेदकत्वसम्बन्धावच्छिन्नप्रकारताकसङ्केतीयविशेष्यतावदित्याकारकादित्यर्थः ।

वाचकताज्ञानमेवेति । त सम्बन्धेन तद्धर्म्मप्रकारकशाब्दं प्रति तत्सम्बन्धावच्छिन्नतद्धर्म्मनिष्ठप्रकारताशालिशाब्दं जनयत्वित्याकारकसङ्केतीया या तद्धर्म्मनिष्ठाधेयत्वसम्बन्धावच्छिन्नप्रकारताकतत्सम्बन्धावच्छिन्नप्रकारतात्वावच्छिन्नविषयताकबोधनिष्ठविषयताकजनकत्वनिष्ठप्रकारताकविशेष्यता, तत्प्रकारकपदविशेष्यकज्ञानं हेतुः,

द्वितीयेच्छापक्षेऽपि तादृशेच्छीया या घटत्वनिष्ठविशेष्यतानिरूपितावच्छेदकत्वसम्बन्धावच्छिन्ना बोधविषयत्वनिष्ठा प्रकारत्वावच्छिन्ना प्रकारता तन्निरूपितबोधनिष्ठविषयताया परम्परया निरूपकत्वप्रकारकपदविशेष्यकज्ञानं हेतुः,

तत्र प्रथमे आधेयत्वसम्बन्धेन प्रकारत्वांशे, द्वितीये तु विशेष्य-

वाच्यतया समवायवाचकताज्ञाने वाचकतांशे समवायादेः स्वरूपतः प्रकारत्वासम्भवेन समवायत्वादिप्रकारेणैव तज्ज्ञानस्योपगन्तव्यतया तदनुपस्थितिदशायां घटादिपदाच्छाब्दबोधानुपपत्तेः,

तथा च केन रूपेण तत्र शक्तिधीर्हेतुता ?

अत्रोच्यते—तत्सम्बन्धेन तद्धर्मप्रकारकशाब्दबोधे तत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठावच्छेदकताकस्वजन्यबोधविषयत्वप्रकारतानिरूपितेच्छाविशेष्यतात्वावच्छिन्नसंसर्गकतत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठार्पिताऽवच्छेदकताकपदप्रकारकज्ञानत्वेन विषयताविशेषसंसर्गकार्थविशेष्यकशक्तिज्ञानस्य हेतुता,

ईदृशशक्तिग्रहे च सम्बन्धघटकतयैवावच्छिन्नत्वांशे समवा-

त्वांशे घटत्वादे प्रकारतया भानात् स्वरूपतस्तदसम्भवात्, जातेः स्वरूपतः समवायेनैव भानमिति त्वनुव्यवसायादौ व्यभिचारेण वक्तुमशक्यमिति भाव,

प्रकारत्वासम्भवेनेति । समवायस्य जात्यखण्डोपाध्यतिरिक्तत्वादिति हृदयम् । तदनुपस्थितिदशायां=समवायत्वानुपस्थितिदशायाम्, सिद्धान्तयति—अत्रोच्यत इत्यादि । स्वजन्येति । स्वपदं घटादिपदपर,- हेतुतेति । तत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठप्रकारताकशाब्दबोधं प्रति तत्सम्बन्धावच्छिन्नतद्धर्मनिष्ठावच्छेदकताकविषयतानिष्ठा या स्व निष्ठनिरूपितत्वसम्बन्धावच्छिन्नविषयतानिरूपितजन्यतानिष्ठविषयतानिरूपितबोधनिष्ठविषयतानिरूपितविषयतात्वावच्छिन्नप्रकारता तन्निरूपितसद्वैतीयविशेष्यतासम्बन्धेन घटादिपदप्रकारकतत्सम्बन्धावच्छिन्नतद्धर्मावच्छिन्नार्थनिष्ठविशेष्यताशालिज्ञानत्वेन हेतुतेत्यर्थः । स्वपद- घटादिपदपरम्,

एवञ्च यथाश्रुतस्वजन्यबोधविषयतानिवेशे घटपटपदोभयजन्यघटपटोभयविषयकसमूहालम्बनज्ञानमादाय स्वजन्यबोधीयघटत्वावच्छिन्नविषयतानिष्ठेच्छीयप्रकारताकविशेष्यतासम्बन्धेन घटपदवान् पट इति ज्ञान धृत्वा नातिप्रसङ्ग,

सम्बन्धघटकतयेति । तथा च संसर्गांशे विशेषणस्य विशेषणत्वाख्यविषयता स्वीक्रियते; न तु प्रकारत्वम्, उपस्थितेः प्रकारतां प्रति प्रयोजकत्वादिति भाव ।

यभानात्, स्वरूपतोऽपि तस्य तथाभानसम्भवेन समवायत्वोपस्थितेर्नापेक्षेति सामञ्जस्यम्।

द्रव्यपदाद् द्रव्यं बोद्धव्यमित्याकारताप्रयोजकद्रव्यपदजन्यबोधविषयत्वीयभगवदिच्छाप्रकारता न घटत्वावच्छिन्नविषयत्वनिष्ठा; अपि तु द्रव्यत्वावच्छिन्नविषयत्वनिष्ठेवेति द्रव्यपदजन्यबोधीयघटत्वावच्छिन्नविषयत्वनिष्ठप्रकारतानिरूपितभगवदिच्छाविशेष्यतात्वावच्छिन्नसंसर्गेण घटत्वावच्छिन्नविशेष्यकद्रव्यपदप्रकारज्ञानं संसर्गताऽवच्छेदकघटकघटत्वावच्छिन्नत्वांशे भ्रमः,

न च द्रव्यपदजन्यविभक्त्युपस्थापितैकत्वादिप्रकारकद्रव्यत्वावच्छिन्नविशेष्यकबोधीया यैकत्वावच्छिन्नद्रव्यत्वावच्छिन्नविषयता साऽपि द्रव्यपदजन्यबोधीयद्रव्यत्वावच्छिन्नविषयतात्वेन भगवदिच्छाविषयः, एवञ्च द्रव्यपदजन्यबोधीयैकत्वावच्छिन्नविषयत्वप्रकारतानिरूपितभगवदिच्छाविशेष्यतासम्बन्धेनैकत्वादिमतो द्रव्यपदवत्त्वाद्

स्वरूपत इति। जात्यखण्डोपाध्यतिरिक्तपदार्थस्य प्रकारतयैव स्वरूपतो भानानङ्गीकारादिति हृदयम्।

इत्याकारतेति। तादृशशब्दजन्यबोधीयविषयतैकरूपविषयता, तादृशशब्दोच्चारणप्रयोजकबुबोधयिषीयविलक्षणविषयता वेत्यर्थ, तथा च तादृशवाक्येन द्रव्यपदजन्यबोधीयद्रव्यत्वावच्छिन्नविषयतावद् द्रव्यमित्याकारिकेच्छैवाभिलप्यत इति भावः।

भ्रम इति। तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठविशेषणताकत्वरूपभ्रमत्वावच्छिन्न इत्यर्थः। न चेति।

न च द्रव्यमेकत्ववदिति ज्ञानीयद्रव्यत्वावच्छिन्नविशेष्यताया एकत्वप्रकारतानिरूपितत्व न त्वेकत्वावच्छिन्नत्व कुत एतत्सङ्गतिरिति वाच्यम्?

विशेष्यतायाः प्रकारावच्छिन्नत्वमभ्युपेत्य तथोक्तत्वात्, तच्च हेत्वाभासे स्वयमेव प्रत्यक्षमणौ चोक्तम्।

के चित्तु—द्रव्यं गगनमित्यादिवाक्यजन्यगगनप्रकारतानिरूपितैकत्वद्रव्यत्वोभयधर्म्मावच्छिन्नविशेष्यताशालिज्ञानमादाय तदुक्तमित्याहुः।

द्रव्य घट इत्यादिवाक्यत एकवचनेनैकत्वोपस्थितिकाले एकत्वेन

द्रव्यपदादभ्रान्तस्य पदान्तरानुपस्थितैकत्वप्रकारेणापि शाब्दबोधप्रसङ्गो दुर्व्वार एवेति वाच्यम् ?

तादृशविशेष्यतात्वेन तस्य सम्बन्धत्वानुपगमात्,

अथ वा तत्पदजन्यतद्धर्म्मप्रकारकशाब्दबोधे तद्धर्म्मावच्छिन्नत्वावच्छिन्नत्वेन स्वजन्यबोधविषयत्वप्रकारताऽवगाहितादृशप्रकारतानिरूपितविशेष्यतासंसर्गकपदप्रकारकं ज्ञानं हेतुः,

एवञ्चैकत्वादिप्रकारकद्रव्यादिपदजन्यबोधजनकशक्तिग्रहेण द्रव्यादिपदजन्यबोधविषयत्वीयद्रव्यत्वाद्यवच्छिन्नत्वावच्छिन्नत्वविशिष्टभगवदिच्छाप्रकारतायां बाधितस्यैकत्वावच्छिन्नत्वावच्छिन्नत्वस्यावगाहनात् तस्य भ्रमत्वम्,

---

द्रव्यबोधस्येष्टत्वादाह—पदान्तरानुपस्थितैकत्वेति । प्रसङ्ग इति । द्रव्यगुणः शब्द इत्यादावित्यर्थः ।

तादृशविशेष्यतात्वेनेति । जन्यबोधीयैकत्वावच्छिन्नविषयताप्रकारतानिरूपितभगवदिच्छाविशेष्यतात्वेन । तस्येति । द्रव्यपदजन्यबोधीयद्रव्यत्वावच्छिन्नविषयताप्रकारतानिरूपितभगवदिच्छाविशेष्यत्वस्येत्यर्थः, द्रव्यपदत्वावच्छिन्नप्रतियोगित्वेनेति शेषः, तेनैकवचनामादिपदजन्यतादृशबोधमादाय तादृशविशेष्यत्वस्यैकत्वावच्छिन्नत्वघटिततादृशविशेष्यतात्वेनैकवचनादेः संसर्गत्वेऽपि द्रव्यादिपदस्य तत्प्रतियोगित्वाभावेन तस्य तत्संसर्गावगाहने ज्ञानस्य भ्रमत्वमलीकत्वं चेति भावः ।

तुष्यतु दुर्जन इति न्यायेनाह—अथ वेति । तद्धर्म्मावच्छिन्नत्वावच्छिन्नेति । तथा च घटो घटपदजन्यबोधीयघटत्वावच्छिन्नविषयतावान् भवत्वित्याद्याकारक एव भगवत्सङ्केतो बोधविषयत्वांशे तत्तद्धर्म्मावच्छिन्नत्वावगाही शक्तिरिति; सा च द्रव्यपदजन्यबोधीयविषयतायामेकत्वाद्यवच्छिन्नत्वसत्त्वेऽपि न तद्रूपेण तामवगाहत इति,

एवञ्च तत्पदजन्यतद्धर्म्मप्रकारकशाब्दं प्रति तद्धर्म्मावच्छिन्नत्वावच्छिन्ना या स्वजन्यबोधीयविषयतात्वावच्छिन्नप्रकारता; तन्निरूपितेच्छीयविशेष्यतासम्बन्धेन तत्तत्पदप्रकारककार्यविशेष्यकज्ञानं हेतुरेवं सम्बन्धांशेऽपीति ।

यत्तु-पदार्थांशे घटत्वादेः शाब्दबोधप्रकारतायां तदंशे तत्पदशक्यताऽवच्छेदकत्वमेव प्रयोजकं, शक्यताऽवच्छेदकत्वञ्च तत्पदजन्यबोधविषयत्वप्रकारतानिरूपितविशेष्यताऽवच्छेदकत्वं; न तु बोधविषयताऽवच्छेदकतया सङ्केतविषयत्वरूपं विशेषणविधया वाच्यत्वं, तथा च तद्धर्म्मप्रकारकशाब्दबोधे तद्धर्म्मावच्छिन्नत्वविशिष्टतादृशविषयतासंसर्गकशक्तिज्ञानमेव कारणमास्ताम्,

द्रव्यादिपदजन्यबोधविषयत्वप्रकारतानिरूपितद्रव्यत्वावच्छिन्नभगवत्सङ्केतीयविशेष्यतात्वेनैव सम्बन्धता न तु तादृशप्रकारतानिरूपितघटत्वावच्छिन्नविशेष्यतात्वेन, तादृशप्रकारतानिरूपितभगवदिच्छाविशेष्यतायां द्रव्यत्वादेरेवावच्छेदकत्वं न तु घटत्वादेरित्येव वा स्वीकरणीयमिति नोक्तातिप्रसङ्गः, किं प्रवृत्तिनिमित्तस्य वाच्यत्वोपगमेन ? इति शक्यताऽवच्छेदकपदवाच्यमेवेति दीधितिकारमतम्,

तन्न शोभनम्-एवं सति शक्तिज्ञानाधुनिकसङ्केतज्ञानयोरेकरूपेणैव हेतुत्वाद् यत्र द्रव्यपदाद् गुणवत्त्वादिना द्रव्यं बोद्धव्यमित्या-

दीधितिकारमतं दूषयितुमुपन्यस्यति—यत्त्विति ।

विशेष्यताऽवच्छेदकत्वमिति । ईश्वरेच्छीयविशेष्यताऽवच्छेदकत्वमित्यर्थः, बोधविषयताऽवच्छेदकतयेति । अत्र विषयतानिरूपितत्वं तृतीयाऽर्थः, तस्य च सङ्केतविषयत्वेऽन्वयः । तादृशेति । तत्पदजन्यबोधीयविषयत्वप्रकारतानिरूपितविशेष्यतेत्यर्थः, तथा च तद्धर्मावच्छिन्नत्वतादृशविशेष्यतास्योभयधर्मावच्छिन्नसंसर्गताकशक्तिज्ञानमेव हेतुरिति ।

एकरूपेणैव हेतुत्वादिति । लाघवात् कारणताऽवच्छेदके ईश्वरीयत्वस्याप्रवेशेन हेतुतायास्तुल्यरूपताया अनुभवसिद्धत्वादित्यर्थः,

एतेन शक्त्याधुनिकसङ्केतयोरेकपदवैलक्षण्येन भिन्नाकारकतयैकरूपेण हेतुत्वादित्यसङ्गतमित्यपि परास्तम्,

एवञ्चाधुनिकस्थलेऽपि तद्धर्मप्रकारकशाब्दबोधे पदजन्यबोधविषयत्वनिष्ठप्रकारताकसङ्केतीयतद्धर्मावच्छिन्नविशेष्यतासम्बन्धेन पदप्रकारकज्ञानत्वेन हेतुत्वं वाच्यमिति भावः ।

गुणवत्त्वेनेति । अत्र तृतीयाऽर्थोऽवच्छिन्नत्वं, तस्य च बोद्धव्यमि

कारकाधुनिकसङ्केतीयद्रव्यत्वावच्छिन्नविषयता द्रव्ये गृहीता; तत्र तादृशसङ्केतग्रहाद् द्रव्यत्वेन द्रव्यबोधापत्तेर्गुणवत्त्वादिप्रकारकशाब्दबोधानुपपत्तेश्च दुर्वारत्वात् ।

इति सामान्यकाण्डः ।

त्यत्र तत्प्रत्ययार्थताऽवच्छेदकविषयतायामन्वयः ।

तादृशसङ्केतस्येश्वरीयत्वे मानाभावादाह—आधुनिकेति । अनुपपत्तेरिति । गुणवत्त्वस्य सङ्केतीयधर्मिताऽनवच्छेदकत्वादिति भावः,

अथ भगवत्सङ्केताधुनिकसङ्केतयोरेकरूपहेतुत्वेऽपि द्रव्यपदाद् द्रव्यं बोद्धव्यमिति सङ्केतस्य द्रव्यपदजन्यबोधीयविषयतात्वपर्य्याप्तावच्छेदकताकप्रकारताकसङ्केतीयद्रव्यत्वावच्छिन्नविशेष्यतासम्बन्धेन द्रव्यपदप्रकारकद्रव्यत्वावच्छिन्नविशेष्यताशालिज्ञानत्वेन हेतुत्वे द्रव्यपदाद् गुणवत्त्वेन द्रव्यं बोद्धव्यमित्याकारकसङ्केतीयप्रकारताया गुणवत्त्वावच्छिन्नत्वतादृशविषयतात्वोभयधर्मावच्छिन्नत्वेन द्रव्यपदजन्यबोधीयविषयतात्वेतरधर्मानवच्छिन्नत्वाभावेन न तदापत्तिः,

न च दीधितिकारमते पर्य्याप्तिनिवेशस्याधिक्येन गौरवमिति वाच्यम्?

द्रव्यत्वादेर्वाच्यत्वमतेऽपि द्रव्यत्वावच्छिन्नत्वद्रव्यपदजन्यबोधीयविषयतात्वोभयधर्मपर्य्याप्तावच्छेदकताकत्वस्य प्रकारतायामवश्यं निवेशनीयत्वेन गौरवानवकाशाद्, अन्यथा द्रव्यपदाद् गुणवद्द्रव्यत्वेन द्रव्यं बोद्धव्यमित्याद्याधुनिकसङ्केतग्रहाद् (द्रव्यत्वमात्रप्रकारेण द्रव्यबोधानुदयेन व्यभिचारापत्तेः),

न च तादृशाधुनिकसङ्केतज्ञानस्य तादृशशक्तिज्ञानकारणान्तर्भावस्वीकारेण नोक्तापत्तिर्वृत्ता, अपि तु फलबलेन तादृशज्ञानस्य स्वतन्त्रमवदमिमतकारणताकल्पनेनेति वाच्यम्?

यस्मादापत्तिदानस्य न केन चित् किमपि कल्प्यते तस्मात् फलोत्पादोऽपि सविवादः, अनुभवेनापेक्षकोपस्य दुष्करत्वं च,

नन्वेवमपि तादृशापत्तिर्मा भूत् किन्तु दीधितिकारमते तादृशाधुनिकसङ्केतग्रहाद् गुणवत्त्वादिना द्रव्यादेर्बोधानुपपत्तिदोषो दुर्वार इति चेद्?

न-तस्येष्टत्वाद्, द्रव्यपदाद् गुणवद्बोद्धव्यमित्याकारकाधुनिकसङ्केतेनैव तादृशबोधोदयाद्,

---

() एतदन्तर्गतं-केवलद्रव्यत्वप्रकारकबोधापत्ते, इति पाठान्तरम् ।

अथ वा तादृशसङ्केतग्रहात् तादृशबोधस्यानुभवविषयत्वं चेद् ? अ-गत्या स्वजन्यबोधीयगुणवत्त्वावच्छिन्नविषयतात्वावच्छिन्नप्रकारताक-सङ्केतीयविशेष्यतासम्बन्धेन द्रव्यपदप्रकारकगुणवत्त्वावच्छिन्नविशेष्य-ताकज्ञानत्वेन स्वातन्त्र्येणैव हेतुतायाः कल्पनेन तादृशसङ्केतग्रहात्ताद-शबोधजननात् स्यादेवमेतदतिरिक्तकल्पने गौरवं न स्याद्, भट्टाचार्य्य-मतेऽपि तत्कल्पनाया आवश्यकत्वाद्,

अथैवमपि तद्धर्म्मप्रकारकशाब्दबोधं प्रति सङ्केतीयतादृशविशे-ष्यतायास्तद्धर्म्मावच्छिन्नत्वेनावगाहिज्ञानमेव कारणमिति नियमो भ-ज्येतेति चेद् ?

न-शक्तिज्ञान एव तादृशनियमस्वीकाराद्,

न च तथाऽपि द्रव्यपदाद् गुणवद् बोद्धव्यमिति सङ्केतग्रहात् ता-दृशबोधस्य भट्टाचार्य्येणास्वीकारात् तादृशकारणत्वाकल्पनेन लाघव-मिति वाच्यम् ?

तथा सति दीधितिकारेणापि द्रव्यपदाद् गुणवत्त्वेन द्रव्यं बोद्ध-व्यमित्याकारकसङ्केतग्रहाद् गुणवद्बोधस्यानङ्गीकारेण तदकल्पनाल्, लाघवस्य तुल्यत्वादिति यदि सूक्ष्ममीक्ष्यते, तदा दीधितिकारमत ब्रह्म-णोऽपि दूषयितुमशक्यमिति ध्येयम् ।

इति सामान्यकाण्डविवृतिः ।



अथ

सविवृतिके शक्तिवादे

विशेषकाण्डः ।

*अथ पदार्थांश इव प्रकारीभूतधर्म्मांशेऽपि वाच्यत्वग्रहस्यापेक्षितत्वे आकाशपदाच्छब्दाश्रयतया बोधो न स्यात् शब्दाश्रयत्वस्य आकाशपदावाच्यतायाः सिद्धान्तसिद्धत्वाद् अतएव तद्वारणायैव प्रवृत्तिनिमित्तत्वलक्षणे वाच्यत्वे सतीति विशेषणोपादानमिति चेद्‌ ?

न–शब्दाश्रयत्वस्याकाशपदवाच्यत्वमनङ्गीकर्तृभिः प्राचीनैराकाशपदादाकाशांशे तदुपस्थाप्यधर्म्मप्रकारकशाब्दबुद्धेरेवोपगमात्,

तदुक्तम्–"अस्तु वा पदादपि निर्विकल्पकमिति," निर्विकल्पकत्वञ्च तदंशे तत्पदोपस्थाप्याप्रकारकत्वं; न तु तदंशे सामान्यतोनिष्प्रकारकत्वं, विभक्त्युपस्थापितैकत्वादीनां तदंशे प्रकारताया आवश्यकत्वात्, तेन समं पदार्थान्तरस्य संसर्गानवगाहने तादृशबो-

सिद्धान्तसिद्धत्वादिति शास्त्रकाराद्यवधारणविषयत्वादित्यर्थः । तद्वारणायेति । शब्दाश्रयत्वे प्रवृत्तिनिमित्तत्ववारणायेत्यर्थः । तदुपस्थाप्येति । आकाशपदोपस्थाप्येत्यर्थः । धर्म्मप्रकारकेति । स्वजन्यबोधीयनिरवच्छिन्नविषयतानिष्ठप्रकारतानिरूपितसङ्केतीयविशेष्यतासम्बन्धेनाकाशपदवान् शब्दाश्रय इत्याकारकज्ञानत्वेनाकाशनिष्ठनिरवच्छिन्नविषयताशालिशाब्दं प्रति हेतुत्वापगमादिति भावः ।

तदंश इति । तत्पदशक्यांश इत्यर्थः । तत्पदोपस्थाप्येति । आकाशादिपदोपस्थाप्यशब्दाश्रयत्वेत्यर्थः ।

नन्वाकाशैकत्वयोः समूहालम्बनबोधस्वीकारे का क्षतिरिति ? अत आह–तेनेति । आकाशेनेत्यर्थः ।

---

* प्राचीनपुस्तकानुरोधादध्यापकसम्प्रदायानुसाराच्च शब्दविशेषशक्तिविचारारम्भस्यात्रैव एव विशेषकाण्डारम्भः ।

घस्य शाब्दत्वासम्भवाच्च,

वस्तुतस्तु-तत्र निर्विकल्पकपदं तत्पदोपस्थाप्यवस्त्वविशेषितधर्म्मिविषयकशाब्दानुभवजनकनिर्विकल्पस्मरणपरम्; अत एव तत्र निर्विकल्पकरूपस्य स्मरणस्यानुपपत्तिः; अनुभवस्य स्वसमानप्रकारकमानस्मृतिजनकत्वादित्याशङ्क्य प्रकारान्तरेण तादृशस्मरणमुपपादितं मिश्रैः,

अत्र च मते जात्यतिरिक्तस्य तस्य स्वरूपतः पदार्थानुभवप्रकारत्वासम्भवादाकाशमासीदित्यादौ शाब्दबोधानुपपत्तिः, अन्वयिताऽवच्छेदकावच्छिन्न एव पदार्थान्तरान्वय इति नियमानुपपत्तिश्चेति पदार्थ इव पदार्थप्रकारीभूतधर्म्मांशेऽपि शक्तिग्रहापेक्षायां गोत्वादेर्गवा-

---

एतद्व्याख्याने शब्दाश्रयत्वप्रकारकोपस्थितेः स्वरूपत आकाशशब्दजननेऽनुभवविरोधो, निर्विकल्पकपदस्य संसर्गानवगाहिज्ञानरूपमुख्यार्थपरित्यागतो न्यूनता च स्यादित्यत आह—वस्तुतस्त्विति। तत्पदेति। आकाशपदेत्यर्थः। तदुपस्थाप्यं यद्वस्तु=तदविशेषितधर्म्मी, तद्विषयकशाब्दानुभवजनकेत्यर्थः। प्रकारान्तरेणेति। तद्धर्म्मनिष्ठप्रकारतान्यप्रकारत्वानिरूपिततद्धर्म्मिनिष्ठविषयताशालिस्मरणं प्रति तद्धर्म्मनिष्ठप्रकारतानिरूपिततद्धर्म्मिनिष्ठविशेष्यताशाल्यनुभवत्वेन कारणताकल्पनेनेत्यर्थः, तादृशस्मरणञ्च यदा प्रकारांशे नोद्बोधकस्य धर्म्यंश उद्बोधकस्य सम्वलनं तदैव, तत्कल्पने च फलबलादिति मिश्राणामाशयः।

अत्र च मत इति। आकाशादिपदानां स्वरूपतः शक्तिवादिमत इत्यर्थः। जात्येति। जातिपदमखण्डोपाध्युपलक्षकं, तेन जात्यखण्डोपाध्यतिरिक्तस्येत्यर्थः। तस्य=आकाशस्य, स्मृतौ स्वरूपत आकाशस्य प्रकारत्वसम्भवादाह—पदार्थानुभव इति। प्रकारत्वासम्भवादिति। योग्यताज्ञानादीनामाकाशांशे किञ्चिद्धर्म्मभानं विना जननासम्भवात्, तत्र यस्य यद्रूपेण भानं तस्य तद्रूपेणैव शाब्दबोधजननादिति भावः।

जात्यखण्डोपाध्यतिरिक्तपदार्थस्यापि स्वरूपतः कथञ्चिज्ज्ञानाङ्गीकारेणात्र बाधनिश्चयाप्रतिबध्यतया योग्यताज्ञानस्य कारणत्वाकल्पनेन च लक्षणया वा तदुपपादने त्वाह—अन्वयिताऽवच्छेदकेति। गगनमित्यादिवाक्यजन्यबोधानुरोधादिति, इष्टापत्तौ शब्दाश्रयो नैक इति बाधनिश्च-

दिपदवाच्यत्ववत् शब्दाश्रयत्वस्याकाशपदवाच्यत्वमस्त्येव,

अत एव दीधितिकृता गुणटिप्पण्यां रूपग्रन्थे "अत्रेदं तत्त्वमि"त्यादिना गोत्वादिना शब्दाश्रयत्वस्याविशेषं व्युत्पाद्य प्रकाशस्यप्रवृत्तिनिमित्तलक्षणे वाच्यत्वविशेषणस्योपादानं दूषितमेव,

प्रत्यक्षमणिदीधितौ च पदार्थांशे गोत्वादेः प्रकारतायां शक्यताऽवच्छेदकत्वस्य प्रयोजकत्वमुपगम्य शक्यताऽवच्छेदके शक्तिर्दूषितैव, तत्रोक्तानुपपत्तिश्चिन्त्या ।

यत्तु-शक्त्याऽऽकाशपदादष्टद्रव्यातिरिक्तद्रव्यत्वादिनाऽप्याकाशबोधो भवति न तु नियमतः शब्दाश्रयत्वेनैव तथा सत्याकाशः शब्दाश्रय इति सहप्रयोगस्य मुख्यताऽनुपपत्तिः, प्रत्येकं नानाधर्मविशिष्टएवाकाशे तत्पदस्य नानाशक्तिकल्पनं तु न सम्भवति नानाधर्मावच्छिन्नैकधर्मिण्येकपदवाच्यतायाः क्वाप्यदृष्टत्वादिति शब्दाश्रयत्वोपलक्षित एवाकाशपदशक्तिरिति प्राचीनमतमेव साधु,

उपलक्षणस्यापि विशिष्टावाचकपदजन्यशाब्दबोधे प्रकारत्वे न किञ्चिद् बाधकम्,

न च शब्दाश्रयत्वस्योपलक्षणत्वे तस्येवाविशेषात्प्रमेयत्वादेरप्याकाशपदजन्यानुभवप्रकारताऽऽपत्तिरिति वाच्यम् ?

प्रकारे सर्व्वानुभवविरुद्धस्य तादृशबोधस्यापत्तेरिति भावः ।

अत्र दीधितिकृत्सम्मतिं दर्शयति—अतएवेति । शब्दाश्रयत्वस्य शक्यताऽवच्छेदकत्वादेवेत्यर्थः । गुणटिप्पण्यां=गुणप्रकाशटिप्पण्याम् । गोत्वादिनेति । दृष्टान्तेनेत्यर्थः । अविशेषं=तुल्यानुभवयुक्तिकत्वं, व्युत्पाद्य=प्रदर्श्य, पदार्थांश इत्यत्र सप्तम्यर्थो विशेष्यत्वं तस्य च प्रकारतायामन्वयः, शक्यताऽवच्छेदकत्वस्य=सङ्केतीयविशेष्यताऽवच्छेदकत्वस्य, शक्तिः=पदजन्यबोधविषयत्वेन सङ्केतीयविषयत्वम्, उक्तानुपपत्तिः=गुणत्वेन द्रव्यपदादित्याद्यनुपपत्तिः । सहप्रयोगस्येति । एकार्थकपदद्वयप्रयोगस्येत्यर्थं इति के चित् । मुख्यतेति । सा च शक्त्या स्वार्थप्रतिपादकता, अत्राकाशपदस्य शब्दाश्रयस्य शक्यार्थस्य बोधकता न सम्भवति-उद्देश्यताविधेयताऽवच्छेदकयोरैक्येनान्वयानुपपत्तेः, लक्षण-

तत्प्रकारकशाब्दबोधे तदंशेऽनतिप्रसक्तत्वरूपशक्यताऽवच्छेदकत्वागादित्वेनोपलक्षिते शक्तिज्ञानस्य हेतुत्वादिति,

तत्र-आकाशः शब्दाश्रय इति सत्प्रयोगस्य मुख्यत्वासिद्ध्याऽष्टद्रव्यातिरिक्तद्रव्यत्वाकाशपदवाच्यत्वाद्येकतररूपेण लक्षणया एव तन्नोपगमाद्,

*एवञ्च यत्र सुवर्णवहनयोग्यगवादिरूपविशेषपरसामान्यवाचकपदघटितं द्रव्यं नास्ति गौर्नास्तीत्यादिकं वाक्यं प्रयुज्यते; तत्र विशेषधर्मावच्छिन्ने लक्षणैव, विशेषधर्मस्य सामान्यशब्दावाच्यतया शक्त्या तद्रूपप्रकारकबोधानिर्वाहाद्,

याऽऽकाशपदार्थत्वावच्छिन्नबोधकत्वेऽन्वयोपपत्तावपि मुख्यताहान्यापत्तेरिति भाव.। अनतिप्रसक्तेति। न च गगननिष्ठतद्व्यक्तित्वस्य शब्दत्वस्य चानतिप्रसक्ततया तत्तद्रूपेणाप्याकाशादिपदाच्छाब्दबोधापत्तिरिति वाच्यम्? इष्टत्वात्। हेतुत्वादिति। एतन्मत आकाशादिपदजन्यबोधविषयतावान् भवत्वित्याकारक आकाशविशेष्यको भगवत्सङ्केत, शब्दाश्रयत्वाद्यन्यूनानतिरिक्तवृत्तिकसङ्केतीयविशेष्यतासम्बन्धेनाकाशपदवान् शब्दाश्रय इत्याद्याकारकं ज्ञान हेतुरिति भाव.। मुख्यत्वासिद्ध्येति। प्रमाणाभावेनेति शेष.। अष्टद्रव्यातिरिक्तेति। पृथिवीत्वादिप्रत्येकधर्मावच्छिन्नभेदाष्टकवदित्यर्थ.।

ननु पदाना तत्तद्धर्मोपलक्षितावाचकत्वे सुवर्णादितात्पर्य्येणापि लोकैर्द्रव्यादिपद प्रयुज्यते तत्र का गति.? इत्यत आह—एवञ्चेति। पदानामुपलक्षितावाचकत्वे चेत्यर्थ.। द्रव्यान्तरवति द्रव्य नास्तीति प्रयोगो द्रव्यपरत्वे न सम्भवति, अपि तु सुवर्णादिपरत्व एवेति विशेषसूचनाय नञ्पदघटितवाक्यमुक्तम्, एव गवान्तरवति गौर्नास्तीति प्रयोगेऽपि बोध्य, प्रथमे शक्यताऽवच्छेदक परित्यज्य सुवर्णत्वावच्छिन्ने लक्षणा, द्वितीये तु शक्यताऽवच्छेदकगोत्वघटितहलवहनयोग्यताविशिष्टगोत्वावच्छिन्न सेति विशेषसूचनाय द्वयमुपात्तम्। बोधानिर्वाहादिति। तथा च तत्पदजन्यतद्धर्मपर्य्याप्तप्रकारताकशाब्दबोधं प्रति तद्धर्मपर्य्याप्तावच्छेदकताकत्वस्वजन्यबोधीयविषयतात्वोभयधर्मावि-

* यद्यपि पुस्तकान्तरेषु विवेद "यदि चेत्यादिग्रन्थेयमि"त्यन्तपाठोत्तरम् "एवञ्चेत्यादिर्ग्रन्थमि"त्यन्त १८, तथाऽपि प्रकृतटीकाऽनुरोधादेनयोर्व्यतिक्रमव्यवहारः।

एवं यत्र दुःखासम्भिन्नसुखत्वधानकर्म्यगोत्वादिविशिष्टवाचकं स्वर्गधेन्वादिपदं केवलसुखत्वगोत्वाद्यवच्छिन्नतात्पर्य्येण प्रयुज्यते; तत्र लक्षणैव, शक्त्या प्रवृत्तिनिमित्तैकदेशं परित्यज्य न बोध इत्यनुभवनिर्व्वाहाय शुद्धतद्धर्म्मप्रकारकशाब्दबोधे तदन्यरूपानवच्छिन्नत्वानवच्छिन्नबोधविशेषविषयत्वीयप्रकारतात्वेन प्रकारताघटितसम्बन्धावगाहिशक्तिज्ञानस्य कारणत्वमुपगन्तव्यम् ,

शक्यताऽवच्छेदके शक्यत्वानभ्युपगन्तृमते तादृशबोधे तद्रूपांशे सङ्केतविशेष्यताऽवच्छेदकतापर्य्याप्त्यवगाहिज्ञानत्वेन हेतुत्वान्नोक्तातिप्रसङ्ग इति तूक्तानुपपत्त्या हेयम् ।

यदि चाकाशः शब्दाश्रय इत्यादिवाक्यस्थमाकाशपदं मुख्यमेव निर्द्धर्म्मिताऽवच्छेदककश्च नान्वयबोधः कुत्रापि, तदाऽऽकाशादिपदात् शक्त्याऽष्टद्रव्यातिरिक्तद्रव्यत्वादिना बोधनिर्व्वाहाय विशिष्टवाच-

च्छिन्नप्रकारताकसङ्केतीयविशेष्यतासम्बन्धेन पदप्रकारकार्थविशेष्यकज्ञानत्वेन हेतुत्वादिति भावः ।

न्यूनधर्म्मावच्छिन्नबोधनस्थलेऽपि लक्षणामाह—एवमिति । उक्तस्थलवदित्यर्थः । दुःखासम्भिन्नेति । तत्त्वञ्च स्वाव्यवहितोत्तरत्वस्वावच्छेदकीभूतशरीरावच्छिन्नत्वस्वसामानाधिकरण्यैतत्रितयसम्बन्धेन दुःखविशिष्टान्यत्वम् । शुद्धतद्धर्म्मेति । तद्धर्म्मनिष्ठप्रकारतानिरूपिता सती तदन्यधर्म्मनिष्ठप्रकारत्वानिरूपिता या विशेष्यता तच्छालिशाब्दबोधं प्रति तद्धर्म्मावच्छिन्नत्वावच्छिन्नतदितरधर्म्मानवच्छिन्नत्वावच्छिन्नस्वजन्यबोधीयविषयतात्वावच्छिन्नसङ्केतीयप्रकारताकविशेष्यतासम्बन्धेन स्वर्गादिपदवत् सुखमित्याकारकं ज्ञानं हेतुः, हेतुता च तद्धर्म्मावच्छिन्नत्वावच्छिन्नत्वावच्छिन्ना सती तदितरधर्म्मावच्छिन्नत्वाभावावच्छिन्नत्वावच्छिन्ना सती स्वजन्यबोधीयविषयतात्वावच्छिन्नत्वावच्छिन्ना सती सङ्केतीयप्रकारतात्वावच्छिन्ना या विशेषणता तन्निरूपितविशेष्यतात्वावच्छिन्नसंसर्गताकस्वर्गादिपदत्वावच्छिन्नप्रकारताकसुखत्वादिधर्म्मावच्छिन्नविशेष्यताशालिनिश्चयत्वेनेति ध्येयम् ।

दीधितिकारमतेऽप्युक्तापत्तिवारणप्रकारं दर्शयति—शक्यताऽवच्छेदकेति । आकाशपदस्य स्वरूपतः शक्तिवादिनामाचार्य्याणां मतं परिष्क-

काकाशादिपदस्य प्रकारांशे वाच्यत्वानवगाहिशक्तिग्रहस्यैव तद्धर्म्मावच्छिन्नविशेष्यकतत्तद्धर्म्मप्रकारकान्वयबोधहेतुत्वमगत्या स्वीकार्य्यं, विशिष्टवाचकगवादिपदस्य च प्रकारांशे वाच्यत्वावगाहिशक्तिज्ञानमेव तद्धर्म्मप्रकारकशाब्दबोधहेतुरिति न शक्तिभ्रमलक्षणाग्रहमन्तरेण गवादिपदाद्गोपदवाच्यत्वाद्यवाच्यधर्म्मप्रकारको बोधः,

आकाशादिपदमिव गवादिपदमपि विशिष्टावाचकमिति भ्रमवतो गवादिपदादवाच्यधर्म्मप्रकारकबोधानिर्व्वाहाय तद्धर्म्मप्रकारकशाब्दबोधे तद्धर्म्मसामानाधिकरण्यमात्रावगाहितत्पदवाच्यताऽवगाहिग्रहस्य हेतुत्वेऽपि तद्धेतुतायां वाच्यतांऽशे विशेषणानन्तर्भावि-

---

रोति—यदि चेति । तच्च मुख्यत्वे विवादसूचनाय । प्रकारांश इति । स्वजन्यबोधीयविषयतात्वावच्छिन्नप्रकारतानिरूपितसङ्केतीयविशेष्यतासम्बन्धेनाकाशपदप्रकारकशब्दार्थपत्वावच्छिन्नविशेष्यकज्ञानं शब्दार्थपत्वप्रकारकशाब्दबोधं प्रति हेतुः,

एवं तादृशविशेष्यतासम्बन्धेनाकाशपदप्रकारकाष्टद्रव्यातिरिक्तद्रव्यत्वावच्छिन्नविशेष्यताकज्ञानमष्टद्रव्यातिरिक्तद्रव्यत्वप्रकारकशाब्दं प्रति कारणमिति ।

एवं रीत्यैव गगनकालदिक्शब्देऽपि हेतुहेतुमद्भावो बोध्यः । गोपदवाच्यत्वादीति । गोपदवाच्यत्वादिरूपो योऽवाच्यधर्म्मः तत्प्रकारक इत्यर्थः । विशिष्टावाचकमितीति । किञ्चिद्धर्म्मावच्छिन्नत्वानवच्छिन्ना या तत्तत्पदजन्यबोधीयविषयतात्वावच्छिन्ना सङ्केतीयप्रकारता तन्निरूपितविशेष्यतायाः परम्परया निरूपकमितीत्यर्थः, तत्तद्धर्म्मसामानाधिकरण्यमात्रावगाहीति । अवच्छिन्नत्वसम्बन्धेन गोपदवाच्यत्वादिसमानाधिकरणा या गवादिपदजन्यबोधीयविषयतात्वावच्छिन्ना सङ्केतीयप्रकारता तन्निरूपितविशेष्यतासम्बन्धेन गवादिपदप्रकारकगोपदवाच्यादिविशेष्यक ज्ञानं हेतुरिति भावः,*

विशेषणानन्तर्भाविवेति । तादृशकारणताऽवच्छेदककोटौ प्रकारत्वांशे किञ्चिद्धर्म्मावच्छिन्नत्वानवच्छिन्नत्वमपि विशेषणीयं; तथा च गवादि

---

* वस्तुतस्तु—विषयतायामेव तद्धर्मसामानाधिकरण्यावगाही शक्तिग्रहोऽत्र वाच्यो न तु प्रकारतायामवच्छिन्नत्वघटितसामानाधिकरण्यस्यावगाही, तथा सति विषयतायास्तत्द्व्यक्तित्वानवच्छिन्नत्वेनैव भ्रमत्वसम्भवेऽपि भ्रमत्वोपपादनवैयर्थ्यात् ।

त्वावगाहित्वमप्यवच्छेदकमुपेयतेऽतोऽवाच्यधर्म्मप्रकारकबोधहेतुगवादिपदशक्तिग्रहस्य भ्रमत्वनियमः, अतो नाभ्रान्तपुरुषस्य ततस्तादृशबोध इति बोध्यम् ।

प्राभाकरास्तु—धेनुपदस्य धानकर्म्मताविशिष्ट एव शक्तिर्न

पदजन्यबोधीयविषयतात्वावच्छिन्नत्वाकोञ्चिद्धर्मावच्छिन्नत्वावच्छिन्नत्वाभावोभयधर्मावच्छिन्नसङ्केतीयप्रकारतात्वावच्छिन्नविशेषणताकविशेष्यतात्वावच्छिन्नसंसर्गताकगवादिपदत्वावच्छिन्नप्रकारताकगोपदवाच्यत्वाद्यवच्छिन्नविशेष्यताकज्ञानत्वेन हेतुतेति, कार्यतावच्छेदकत्वे—तादृशविशिष्टवाचकत्वज्ञानाव्यवहितोत्तरगवादिपदज्ञानजन्यगोपदार्थत्वादिप्रकारकशाब्दत्वमतो गवादिपदानां गोपदवाच्यत्वादिविशिष्टवाचकत्वभ्रमजन्यतादृशशाब्दबोधे न व्यभिचारः, विशिष्टशक्तिज्ञानकार्यकारणभावस्तु पूर्वरीत्यैव बोध्यः,

तथापि विशिष्टवाचकत्वज्ञानाव्यवहितोत्तरत्वानिवेशान्न व्यभिचार इति ध्येयम् ।

भ्रमत्वनियम इति । गोपदादिसङ्केतीयप्रकारतायां किञ्चिद्धर्मावच्छिन्नत्वावच्छिन्नत्वसत्त्वेन तदभावावगाहने भ्रमत्वमेवेति ।

शक्त्युपाधिवादिनां गुरूणां मतमुत्थापयति—प्राभाकरास्त्विति । धानकर्म्मताविशिष्ट एवेति । धानकर्म्मता च दुग्धपानकर्म्मता, दुग्धपानञ्च दुग्धप्रतियोगिकविभागजनकत्वे सति दुग्धप्रतियोगिकगलाधःसंयोगानुकूलो यो व्यापारस्तद्रूपं, तत्कर्मता च तादृशविभागानुयोगित्वं तदाश्रयतया गवादिकं कर्म; अतएव गां धयति स्तनं पिबतीत्यादिकः प्रयोगः,

ननु गवादिपदानां गोत्वादाविव धेनुपदस्य धानकर्म्मत्वे कुतो न शक्तिरिति चेद् ?

न—यस्माद् यद् येन विना न भासते तद्भासकसामग्र्येव तद्भासयति न तु तद्भानार्थं सामग्र्यन्तरं, जातिस्तु व्यक्तिं विना न भासत इति जातिभासकसामग्री व्यक्तिं भासयति; अतो व्यक्तिभाने न सामग्र्यन्तरकल्पनं, धानकर्म्मता च व्यक्तिं विनाऽपि भासतेऽनन्तभूमानसामग्र्या व्यक्तिभानसम्भवाभावात् तद्भानार्थं धानकर्म्मताविशिष्टे शक्तिरावश्यकी,

तु गोत्वमपि विशेषणं, गोत्वस्य शक्त्युपाधित्वेन शक्तिनियन्त्रकत्वात् धानकर्मत्वस्य महिष्यादिसाधारणत्वेऽपि न धेनुपदात्तद्बोधः,

न च धेनुपदात् गोत्वप्रकारकबोधस्यानुभविकतया धानकर्म्ममहिष्यादिमति देशे धेनुर्नास्तीति विशेषदर्शिनां प्रयोगस्य मुख्यतया च धेनुपदजन्यबोधे गोत्वभानमवश्यमङ्गीकरणीयं; तथा च धानकर्म्मत्ववद् गोत्वेऽपि शक्तेरावश्यकतयाऽशक्यस्यापि प्रकारतया शाब्दबोधे भानोपगमे द्रव्यत्वप्रमेयत्वादेरपि प्रकारतया शाब्दबुद्धौ भानापत्तिरिति वाच्यम् ?

शाब्दबोधेऽशक्यस्य गोत्वादे' प्रकारतया भाने शक्यताऽवच्छेदकत्वस्य नियामकत्वात्, गोत्वस्य चाशक्यत्वेऽपि शक्यतायामवच्छेदकताऽऽत्मकसम्बन्धाविशेषोपगमात् द्रव्यत्वादेश्चातथात्वेनातिप्रसङ्गविरहात्,

---

एवकारस्यव्यवच्छेद्य स्पष्टयति—न तु गोत्वमपीति । विशेषणमिति । शक्याविति शेष',

ननु धेनुपदस्य यदि धानकर्म्मतामात्रविशिष्टे शक्तिस्तदा धानकर्म्मत्वेन कुतो न महिष्यादीनां धेनुपदशक्यत्वं न वा तद्बोध इति ? अत आह—गोत्वस्येति । शक्त्युपाधित्वेनेति । सम्बन्धान्तरकृपशक्तिकल्पनस्य धर्म्मिताऽवच्छेदकत्वेन शक्यभावप्रयोजकाभावप्रतियोगित्वेनत्यर्थं, तत्तु—अशक्यस्य सति शक्यताऽवच्छेदकत्वमिति तु यावत्, शक्तिनियन्त्रकत्वात्=शक्तिसङ्कोचकत्वात्, तत्सत्त्वाप्रयोजकस्वसत्ताकत्वादिति तु पर्यवसितम्, तद्बोध इति । महिष्यादिबोध इत्यर्थं, तत्र गोत्वाभावेन शक्यभावादिति भाव' ।

ननु धेनुपदजन्यबोधे गोत्वाभाने महिष्यादिप्रदेश धानकर्मतात्वावच्छिन्नाधिकरणतया धेनुर्नास्तीति प्रयोगानुपपत्तिरतो गोत्वभानमावश्यक तच्च शक्तिभ्रमेण लक्षणया वोपपादनीयमिति ? अत आह—विशेषेति मुख्यतयेति च । समाधत्ते-शाब्दबोध इति । नियामकत्वादिति । तथा च तत्तत्पदजन्यतत्तद्धर्म्मप्रकारकशाब्दबोधं प्रति तत्तद्धर्मावच्छिन्नशक्यताकत्वसम्बन्धेन तत्तद्धर्म्मावच्छिन्नप्रकारकपदविशेष्यकज्ञानं हेतुरिति भाव ।

न च गोत्वस्य वृषभादिसाधारणस्यातिप्रसक्ततया शक्तौ नावच्छेदकत्वसम्भव इति वाच्यम् ?

अवच्छेदकत्वस्य प्रकृतेऽनतिप्रसक्तत्वानियतत्वाभियतत्वे वा धानकर्मत्वसहितस्यैव तस्यावच्छेदकत्वोपगमाद्,

अथ गोत्वमेव शक्यं धानकर्मत्वमेव शक्त्युपाधिरिति वैपरीत्यमेव कुतो न स्याद्?

वस्तुतो धानकर्मत्वापेक्षया लाघवेन गोत्वस्यैव शक्यत्वमुचितम्,

न च गोत्वमतिप्रसक्तं धानकर्मत्वन्तु धानकर्मव्यक्तिभेदेन भि-

नन्वेवं धानकर्मत्वादेः शक्यताऽनवच्छेदकत्वेन प्रकारतया तस्य भानानुपपत्तिरिति चेद् ?

न—अग्रे तस्यापि शक्यताऽवच्छेदकत्वाङ्गीकारात्, प्रकृते=एतन्मते, अनतिप्रसक्तत्वानियतत्वादिति । अवच्छेदकस्येति शेषः, तथा चावच्छेद्यानतिप्रसक्तत्वाव्याप्यत्वादित्यर्थः, अतिप्रसक्तधर्मेऽप्यवच्छेदकत्वस्वीकारादिति भावः । धानकर्मत्वसहितस्येति । धानकर्मत्वगोत्वयोरेकव्यासज्यवृत्त्यवच्छेदकत्वस्वीकारादिति,

अथैतन्मते पदपदार्थयोरतिरिक्त एव सम्बन्धः शक्तिपदार्थो न त्वीश्वरेच्छारूपः; तैरीश्वरानङ्गीकारेणासम्भवात्; तत्प्रतियोगित्वं शक्यत्वं वाच्यं; प्रकारान्तरस्य दुर्वचत्वात्, तच्च धानकर्मतावत्वेव धानकर्मत्वेऽपि स्वीकार्यम्; अन्यथा तस्य शक्यत्वानुपपत्तेः, एवञ्च धानकर्मत्वसहितं गोत्वं तन्न्यूनवृत्त्येव तत्र कुतस्तदवच्छेदकत्वसम्भव इति चेद् ?

न—तादृशसम्बन्धप्रतियोगित्वमेकं व्यक्तिनिष्ठम्; अपरञ्च धानकर्मत्ववृत्ति; अतो व्यक्तिवृत्तिप्रतियोगित्वान्यूनानतिरिक्तवृत्तित्वस्य तत्र सत्त्वाद्,

एवञ्च शक्तिप्रतियोगित्वे सति शक्तिप्रतियोगिताऽवच्छेदकत्वं विशेषणविधयं शक्यत्वं बोध्यं; तादृशसम्बन्धप्रतियोगिताऽवच्छेदकत्वं विशेषणाविष्टं शक्यत्वमिति केचिद्,

विशेषणविधया शक्यत्वमेवेतरपदार्थान्वयप्रयोजकम्, अतो न धानकर्मत्वादावितरान्वय इत्यलं विस्तरेण ।

शङ्कते—अथेति । शक्यं शक्तिप्रतियोगित्वे सति तदवच्छेदकम्, गोत्वस्यैवेति । गोत्वे निरवच्छिन्नशक्यत्वं वक्तुमर्हत्यतो लाघवमिति

त्वामिति गोनिष्ठं तदनतिप्रसक्तमिति न वैपरीत्यमिति वाच्यम् ?

तस्यातिप्रसक्तत्वेऽपि शक्यत्वोपगमे क्षतिविरहाद् वृषभादिबोधस्य शक्त्युपाधिधानकर्मत्वस्यापि प्रकारतया वारणाद् ,

न च गोत्वस्य शक्यत्वे जातिशक्त्यैव व्यक्तिभानसम्भवेनानन्यलभ्यतया गवादिपदवृत्तिशक्त्युच्छेदप्रसङ्गः; तथा च धानकर्मत्वस्य शक्यताऽवच्छेदकत्वानुपपत्त्या वृषभादिबोधो दुर्वार एवेति वाच्यम् ?

एतदनुरोधेनापि व्यक्तौ शक्तिस्वीकारसम्भवादिति चेद् ?

भावः । जातिशक्त्यैवेति । प्रभाकरमते यद् येन विना न भासते तद्भासकस्यैव तद्भासकत्वं तद्भासकान्तरकल्पने प्रयोजनविरहो गौरवञ्चेति, तथा च जातिर्व्यक्तिं विना न भासत इति जातिभासकसामग्र्या एव व्यक्तिभासकत्वाद्, धानकर्मत्वस्य तु दोग्धृव्यापारप्रयोज्यदुग्धविभागरूपस्य जातिभिन्नतया व्यक्तिभानं विनाऽपि भानाच्च तद्भासकस्य व्यक्तिभासकत्वमिति भावः,

अथ जातिर्व्यक्तिं विना नेत्यस्य व्यक्त्यविषयकज्ञानाविषयत्वं पर्यवसितं वाच्यः तच्च न सम्भवति, यदा गोत्वादिना गवयादेः प्रत्यक्षादिकं तत्र; गोत्वं नित्यमित्यत्र ज्ञाने च; व्यक्तिभानं विनाऽपि गोत्वादेर्भानादिति चेद् ?

न—व्यक्तिविषयतानिरूपितं यत् सांसर्गिकविषयत्वं तदनिरूपितविषयत्वशून्यत्वं व्यक्तिं विनेत्यादेः पर्यवसन्नार्थत्वाद्, अन्यथाख्यात्यनङ्गीकर्तॄणां तेषां मते गोत्वादिना गवयादेर्ज्ञाने गोत्वादिवैशिष्ट्यभानेन तत्सम्भवाद्, गोत्वं नित्यमित्यादावपि गवेतरावृत्तित्वरूपगोत्वत्वादेर्भानेन तत्र गवादेर्भानाच्चेति,

वस्तुतस्तु व्यक्तिविषयत्वानिरूपितशाब्दविषयताशून्यत्वं तादृशप्रकारताशून्यत्वं वा तत्पर्यवसितार्थो वाच्यः; अतो न पूर्वोक्तदोषः,

एतेन गोत्वेन गवयज्ञानोत्तरं गोत्वेन गवयं जानामीत्यनुव्यवसायादौ गवादेरभानेऽपि न क्षतिर्लाघवञ्चेति, धानकर्मत्वं पश्येत्यादौ गवादिव्यक्तिभानं विनाऽपि तद्भानाच्च धानकर्मत्वभासकसामग्र्या व्यक्तिभासकत्वमिति निरस्तः,

गोत्वकर्मत्वं गोकर्मत्वं विनाऽनुपपन्नमिति ज्ञानसहकृतशाब्दसामग्र्येव व्यक्तिं भासयतीति केचित्,

शक्यताऽवच्छेदकत्वानुपपत्त्येति । धानकर्मत्वे गोत्वनिष्ठशक्यत्वसामा

न—यद्धर्मविशिष्टे शक्तिस्तद्धर्माश्रयस्य यावतः शक्यत्वनियमेन गोत्वस्य शक्यत्वे वृषभादेरपि तथात्वापत्तेः, धानकर्मताविशिष्टाया गोः शक्यत्वे च गोनिष्ठधानकर्मताव्यक्तीनामेव विशेषणतया; तासाञ्च महिष्यादिव्यावृत्ततया महिष्यादेश्च शक्यताऽऽपत्तिविरहादिति वदन्ति,

तन्मते यद्यपि शक्तिज्ञानाधुनिकसङ्केतज्ञानयोः कारणताभेदेन गौरवं न बाधकं; भगवद्विद्वेषिणां मीमांसकानां शक्तेः सङ्केतानात्मकतया तयोरेककारणतायाः कथमप्यसम्भवात्; तथाऽपि गोनिष्ठधानकर्मताव्यक्तीनामनतिप्रसक्तानुगतरूपाभावान्न शक्यत्वसम्भवः,

न च सामानाधिकरण्यसम्बन्धेन गोत्वमेव धानकर्मत्वसहितं धानकर्मत्वविशेषाणामनुगमकमिति वाच्यम् ?

नाधिकरण्याभावेन तदसम्भवादित्याशयः, तदनुरोधेनापीत्यत्रापिशब्दो व्यक्तावित्यनन्तरं योजनीयः; तेन व्यक्तावपीति लाभः । यावत-इति । अन्यथा पद्वादिपदं लोमवति शक्तमिति निश्चयेऽप्येष पद्मुपदशक्यो न वेति संशयापत्तेरिति भावः । गोनिष्ठेति । धानकर्म्मतानामाश्रयभेदेन भिन्नत्वादिति भावः ।

प्रभाकरमते गोत्वस्य धेनुपदशक्यत्वे धानकर्म्मताविशिष्टगोत्वोपलक्षिते शक्तं धेनुपदमित्याकारकशक्तिज्ञानस्य कारणत्वं वाच्यम्; एवञ्च धेनुपदाद् धानकर्म्म गौर्बोद्धव्येत्याकारकाधुनिकसङ्केतज्ञानस्यापि शाब्दबोधजनकतया पृथक्कारणत्वं वक्तव्यम्,

न्यायमते तु तादृशज्ञानस्य शक्तिज्ञानात्मकतया न पृथक् कारणत्वम्; अतस्तन्मते गौरवं भवति, तादृशगौरवस्य तन्मते सार्व्वत्रिकतया मत्यन्तराविरहेण स्वीकृततया तद्दोषेण तन्मतदूषणं सन्दर्भविरुद्धमित्याह—तन्मते यद्यपीति । न शक्यत्वसम्भवः, विशेषणविधया शक्यत्वमित्यर्थः, तथा च नानाव्यक्तीनामेकशक्यत्वकल्पनमनुगतामतिप्रसक्तधर्म्मं विनाऽसम्भवयुक्तिकम्; अन्यथा धेनुपदादेरनन्तगवादिष्वेकशक्तिकल्पनं शक्यताऽवच्छेदकं विनाऽपि कुतो न स्यादिति भावः ।

सामानाधिकरण्येति । सामानाधिकरण्यसम्बन्धेन धानकर्म्मत्वे वर्त्तमानं सहितेति शेषः, गोत्वमेवेति । वह्नित्वसहितं महानसीयत्वं महानसीयवह्नीनामनुगमकमितिवदित्यर्थः । अनुगमकमिति । अनुगतव्यवहारनियामकं,-

अशक्येन शक्यानुगमे सर्वत्रैव विशेषणशक्त्युच्छेदप्रसङ्गाद्, अतिप्रसक्तेनापि धानकर्म्मतात्वेन विशिष्टे धानकर्मताविशेषे शक्ति-ग्रहोपगमे लाघवाद् गोत्वविशिष्टे गोविशेष एव शक्तिर्धानकर्म-त्वमेव शक्त्युपाधिरित्येवोचितमननुगतेन तत्तद्धानकर्मतात्वेन श-क्तिग्रहोपगमे चापूर्वव्यक्त्यलाभप्रसङ्ग इत्यनुपपत्तिश्चिन्त्या ।

यथा नानाधर्म्मविशिष्टैकधर्म्मिवाचकात् पदात् शक्तिप्रमातो-नेकधर्म्मं परित्यज्य धर्म्मी प्रतीयते तथा चन्द्रत्वसूर्य्यत्वादिनानाधर्म्म-विशिष्टनानाधर्म्मिवाचकपुष्पवन्तादिपदाच्चन्द्रत्वादिकं परित्यज्य न सूर्य्यत्वादिप्रकारको बोधः,

अथात हरिपदादिशक्तिज्ञानादिवद् दिवाकरः पुष्पवन्तपदवाच्य-इत्याकारकशक्तिज्ञानात् केवलसूर्य्यत्वप्रकारको बोधो दुर्वारः ?

तथा च तादृशधर्म्मेणैवानुगतशक्यता सिध्येदित्यर्थं, अथ वा धान-कर्म्मताविशेषवृत्त्येकशक्यतासत्त्वप्रयोजकत्वसत्ताकमिति वाऽर्थं । लाघवादिति । धानकर्म्मत्वापेक्षयेत्यर्थं, शक्त्युपाधिरिति । अशक्यत्वे सति शक्यताऽवच्छेदक ; तज्ज्ञानजन्यानियतशाब्दधीप्रकारो वेत्यर्थ । अपूर्व्वेति । शाब्दबोधे पूर्व्वाननुभूतव्यक्तिविषयकत्वप्रसङ्ग इत्यर्थः । अयम्भावः—तत्तद्धानकर्म्मताव्यक्तौ शक्तिस्वीकारे व्यवहारेण यद्-धानकर्म्मताव्यक्तौ शक्तिर्गृहीता, अनन्तर धेनुपदघटितवाक्यात् त-त्तद्धानकर्म्मत्वव्यक्तेरेव स्मरणेन योग्यताविरहात् शाब्दबोधे भा-नासम्भव इति ।

पुष्पवन्तादिपदानां शक्त्या चन्द्रत्वसूर्य्यत्वादिप्रत्येकधर्म्मेण नियत-चन्द्रसूर्य्ययोरुभयबोधकत्वस्यानुभव दृष्टान्तेन द्रढयति-यथा नानेति ।

पदादिति । तु धात्वभिधत्वसुरत्वोभयधानकर्म्मत्वगोत्वोभयादिवि-शिष्टवाचकस्वर्गधेन्वादिपदादित्यर्थं । पुष्पवन्तादिपदादिति । आदिपदाद् दम्पतिपित्रादिपदपरिग्रह ,

चन्द्रत्वसूर्य्यत्वयो प्रत्येकधर्म्मेण वाच्यत्वे पुष्पवन्तपद सूर्य्य-वाचकमित्याकारादिवाच्यताग्रहस्यापि प्रमात्वेनाभ्रान्तस्यापि तादृश

न च पुष्पवन्तपदशक्तिज्ञानेन सूर्य्यत्वादिमकारकशाब्दबोधजनने चन्द्रत्वादिमकारकशक्तिज्ञानस्यापि सहकारितोपगमादातिप्रसङ्ग इति वाच्यम् ?

तस्य हर्य्यादिपदवन्नानार्थत्वग्रहदशायां भ्रान्तस्य केवलसूर्य्यत्वादिमकारकबोधस्याप्युत्पत्तेः,

एवं तत्पदस्य हर्य्यादिपदवन्नानाधर्म्मावच्छिन्नवाचकतया नानार्थत्वप्रसङ्गो दुर्वारः,

न चार्थद्वये तस्यैकस्या एव शक्तेरुपगमान्न नानार्थताऽऽपत्तिः; नानाशक्तिमत एव नानार्थत्वोपगमादिति वाच्यम् ?

नानाद् हर्य्यादिपदजन्यः केवलविष्ण्वादेर्बोध इव शुद्धसूर्य्यादिबोधो-दुर्वारः कारणविरहादर्शनादित्याशङ्कते—अथेति । कारणाभावं सम्पादयन् कार्य्योत्पत्तिवारणमाशङ्कते—न चेत्यादि । सहकारित्वोपगमादिति । पुष्पवन्तपदशक्तिग्रहजन्यसूर्य्यत्वप्रकारकशाब्दबोधं प्रति पुष्पवन्तपदं चन्द्रत्वावच्छिन्ने शक्तमिति ज्ञानस्य पुष्पवन्तपदशक्तिज्ञानजन्यचन्द्रत्वावच्छिन्नविषयकशाब्दं प्रति पुष्पवन्तपदं सूर्य्ये शक्तमिति ज्ञानस्य च फलानुरोधेन कारणत्वकल्पनादित्यर्थः । नानाऽर्थताग्रहदशायामिति । सूर्य्यत्वावच्छिन्ने चन्द्रत्वावच्छिन्ने च पृथग्वाचकताग्रहदशायामित्यर्थः,

भ्रान्तस्येति । तथा च तदानीं चन्द्रत्वप्रकारकशक्तिज्ञानादेरसत्त्वेन व्यभिचारात् तादृशज्ञानस्य सहकारितया वक्तुमशक्यत्वादिति भावः ।

तादृशनानाऽर्थताग्रहस्योक्तसहकारितायामुत्तेजकत्वोपगमेन व्यभिचारवारणसम्भवादाह—एवमिति । नानाधर्म्मावच्छिन्नेति । एकधर्म्मिविशेषणताऽनापन्ननानाधर्म्मावच्छिन्नेत्यर्थः, तेन स्वर्गादिपदानां न तदापत्तिः, नानाऽर्थताऽऽपत्तिः=नानाऽर्थशब्देन व्यवहार्य्यत्वाऽऽपत्तिः, न्युत्पन्नानां पुष्पवन्तशब्दो नानाऽर्थ इति व्यवहाराभावादिष्टापत्तेरयोगादिति भावः ।

यत्तु नानाऽर्थत्वस्य नानाशक्यताऽवच्छेदकतात्वेऽर्थ इति;

तन्तुच्छं-तादृशार्थस्येष्टत्वेनापत्तेरयोगात्, नानाधर्म्मावच्छिन्नवाच-

शक्यताऽवच्छेदकभेदेन शक्तिभेदस्यावश्यकत्वादवच्छेदकभेदस्यावच्छेद्यभेदनियतत्वाद्, अन्यथा हर्य्यादिपदेष्वपि शक्त्यैक्यापत्ते',

अत्र शक्त्यैक्यपदपदार्थसम्बन्धान्तरवादिमीमांसकानुयायिनः—यथा धानकर्मत्वगोत्वादिरूपशक्यताऽवच्छेदकभेदेऽपि धेन्वादिपदानां

कतयेतिहेत्वभिधानस्यासङ्ग्यापत्तेश्च । शक्यताऽवच्छेदकभेदेनेति । अत्रावच्छेदक व निरवच्छिन्न तदाश्रयश्च विशेषणविशेष्यताऽवच्छेदकादिभावानापन्नो ग्राह्य, तेन पश्वादिपदाना शक्यताऽवच्छेदकस्य लोमाद् स्वर्गादिपदाना शक्यताऽवच्छेदकस्य दु खासम्भिन्नत्वसुखत्वादेर्भेदेऽपि न क्षति,

अवच्छेदकपदस्यावच्छेदकतापरत्वेन लोमादौ दु खासम्भिन्नत्व सुखत्वादौ चावच्छेदकताया एक्येन न क्षतिरित्यप्याहु ।

अवच्छेद्यभेदनियतत्वादिति । अथ तादृशभेदनियतत्व न तादृशभेदप्रयोज्यत्व, भेदस्य नित्यत्वेन तदसम्भवाद्, नापि तादृशभेदव्याप्यत्वतद्, अवच्छेद्यभेदाभाववत्यवच्छेद्यऽवच्छेदकभेदस्य सत्त्वेन तद्विरहाद्, नापि तादृशभेदाभाववद्भिन्नानुयोगिकस्वरूपसम्बन्धावच्छिन्न तादृशभेदाभावव्यापकभेदप्रतियोगिताऽवच्छेदकत्व तदित्यपि सम्यक्, तथा सति हर्य्यादिपदानामपि विष्णुसिंहादिभ्नकशक्तिकत्वेऽपि तादृशव्याप्यत्वसम्भवेन तस्य शक्तिभेदासाधकतयाऽकिञ्चित्करत्वापत्तेरतो दुर्वच-तदिति चेद्?

न—यतो नियत व व्याप्यत्वमेव, तच्चावच्छेद्यभेदाभावव्यापकभेदप्रतियोगिताऽवच्छेदकत्वम्, अत्राभावश्च स्वप्रतियोगिनिरूपितावच्छेदकतावद्भिन्नानुयोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताक ,भेदाभावत्वञ्च—स्वप्रतियोगिभिन्नानुयोगिकस्वरूपसम्बन्धेन ग्राह्य, एवम्=अवच्छेदकभेद, अतो न हर्यादिपदस्य नानाशक्यताऽवच्छेदकत्वेऽनेकशक्यताऽवच्छेदकत्वसम्भव , न वाऽवच्छेदकभेदे व्याप्यत्वहानिरिति,

परञ्च यो यदवच्छेदक स तद्भेदव्याप्यभेदप्रतियोगीति व्याप्तौ ता पर्य्यमिति,

ननु धेन्वादिपदाना शक्यताऽवच्छेदकभेदेऽपि न शक्तिभेद इति तादृशव्याप्तौ व्यभिचारइति चेद्?

न—गोत्वविशिष्टधानकर्मत्वादौ शक्यताऽवच्छेदकत्वकल्पनात् पर्य्याप्तिविशेषेण धर्त्तुमशक्यत्वाच्चेति भाव ।

न शक्तिभेदः; अवच्छेदकताया व्यासज्यवृत्तित्वात्, तथा प्रकृते च-न्द्रत्वसूर्य्यत्वयोर्व्यासज्यवृत्तिशक्यताऽवच्छेदकतास्वीकाराच्च शक्तिभेदः; न चैकं परित्यज्यान्यप्रतीतिः, केवलसूर्य्यत्वादिप्रकारकबोधे केवलतद्धर्म्मनिष्ठशक्यताऽवच्छेदकतापर्य्याप्त्यवगाहिज्ञानस्य हेतुत्वा-

---

नव्यास्तु-अवच्छेदकभेदस्य असंख्यकावच्छेद्यभेदकत्वादिति नियतत्वादित्यन्तस्यार्थ इति प्राहुः ।

व्यासज्यवृत्तित्वादिति । एकपर्य्याप्तिसम्बन्धेनोभयावृत्तित्वादित्यर्थः । न शक्तिभेद इति । तथा च शक्यताऽवच्छेदकताभेदस्य शक्तिभेद-नियामकत्वादिति हृदयम् ।

परित्यज्य=अविषयीकृत्य ।

ननु न चैकं परित्यज्यान्यप्रतीतिरिति न युक्तं? पुष्पवन्तपद-शक्यताऽवच्छेदकत्वस्य सूर्य्यत्वचन्द्रत्वोभयपर्य्याप्तत्वेन सूर्य्यत्वेऽपि पर्य्याप्तत्वमतः पुष्पवन्तपदं सूर्य्यत्वपर्य्याप्तावच्छेदकताकशक्यताकमि-त्यादिशक्तिभ्रमातः सूर्य्यादिपदादिव केवलसूर्य्यादिबोधस्य दुर्व्वारत्वा-दिति? अत आह—केवलेत्यादि ।

इतरप्रकारतायाः कार्य्यताऽवच्छेदकत्वाभावसूचनाय प्रथमकेव-लपदमिति केचित्,

तन्न सम्यक्-सूर्य्यत्वपर्य्याप्तप्रकारताकशाब्दं प्रति सूर्य्यत्वमात्रपर्य्या-प्तावच्छेदकताकशक्यताकं पदमिति ज्ञानत्वेन हेतुत्वे; यदा पुष्पवन्त-पदं चन्द्रत्वसूर्य्यत्वोभयपर्य्याप्तावच्छेदकताकशक्तिमदित्यादिज्ञानाच्च-न्द्रसूर्य्योभयविषयकशाब्दबोधो जायते; तत्र सूर्य्यत्वमात्रपर्य्याप्तावच्छे-दकताकशक्तिज्ञानस्यासत्त्वेन तादृशशाब्दस्य कार्य्यताऽवच्छेदकाक्रान्त-त्वेन च व्यभिचारापत्तेः,

यदि तु केवलेत्यनेन सूर्य्यत्वभिन्ननिष्ठप्रकारताशून्यत्वे सति सूर्य्य-त्वनिष्ठप्रकारताकशाब्दं प्रति सूर्य्यत्वमात्रपर्य्याप्तावच्छेदकताकशक्ति-ज्ञानत्वेन हेतुत्वं कल्प्यते, तदाऽपि सूर्य्यपदं सूर्य्यत्वमात्रपर्य्याप्तावच्छेद-कताकशक्यताकं चन्द्रपदञ्च चन्द्रत्वमात्रपर्य्याप्तावच्छेदकताकशक्य-ताकमित्यादिज्ञानात् सूर्य्याचन्द्रमसावित्यादिवाक्यात् चन्द्रसूर्य्योभ-यविषयकशाब्दबोधानुपपत्तिरिति,

अत्र वदन्ति-सूर्य्यत्वनिष्ठप्रकारताभिन्नं यत् प्रकारताविशिष्टप्रका-रत्वं तच्छून्यत्वे सति सूर्य्यत्वनिष्ठप्रकारताशालिशाब्दं प्रति सूर्य्य-

त्, चन्द्रसूर्य्यत्वोभयांशे शक्यताऽवच्छेदकतापर्य्याप्त्यवगाहिज्ञानस्य चोभयप्रकारकबुद्धित्वं कार्य्यताऽवच्छेदकम्; अतस्तादृशशक्तिज्ञानाच-

---

त्वमात्रपर्य्याप्तावच्छेदकताकशक्यताकसूर्य्यादिपदज्ञानस्य हेतुत्वम्, प्रकारतावैशिष्ट्यञ्च—स्वभिन्नत्वस्वप्रयोजकशक्तिज्ञानप्रयोज्यत्वोभयसम्बन्धेन, स्वं प्रकारत्वं, पदान्तरशक्तिज्ञानप्रयोज्यचन्द्रत्वादिप्रकारतायां स्वप्रयोजकशक्तिज्ञानप्रयोज्यत्वाभावान्नासङ्गति', एवमन्यत्राप्यूह्यम्।

केचित्तु—हेतुत्वादिति पञ्चम्यन्तान्तस्य; अत इति पञ्चम्यन्तस्य च द्वयोर्न सूर्य्यत्वावच्छिन्नान्वयबोधप्रसङ्ग इत्यनेनान्वयः, ज्ञानस्य चेत्यत्रस्थचकारस्यात इत्यनन्तरं योजनया तत् समर्थनीयं, पञ्चम्यन्तान्तस्य प्रथमस्योपादानात् पुष्पवन्तपदस्य तादृशशक्तिभ्रमेण चन्द्राद्यनुपस्थितिकालेऽपि केवलसूर्य्यस्यान्वयबोधानुभवान्नान्वयबोधप्रसङ्गइत्यस्यासम्भवयुक्तिकत्वशङ्कानिरास इत्याहुः।

यत्तु हेतुत्वादित्यनन्तरं नाभ्रान्तानां पुष्पवन्तपदशक्तिप्रमातः केवलसूर्य्यत्वप्रकारेण बोध इति पूरणसम्वलितव्याख्यानम्,

तदसत्—उक्तप्रकारेणान्वयसम्भवे पूरणेन व्याख्यानस्यान्याय्यत्वात्।

उभयप्रकारकबुद्धित्वमिति। चन्द्रत्वप्रकारत्वे सति सूर्य्यत्वप्रकारत्वशाब्दत्वमित्यर्थः।

ननु पुष्पवन्तपदादिव घटादिपदादपि शक्तिभ्रमेण लक्षणया वा चन्द्रत्वसूर्य्यत्वोभयप्रकारकशाब्दोदयाद् व्यभिचारवारणाय तत्तत्पदशक्त्यादिज्ञानाव्यवहितोत्तरत्वस्य कार्य्यताऽवच्छेदककोटावश्यं निवेशनीयत्वेन तादृशप्रकारकत्वादेः कार्य्यताऽवच्छेदककोटौ कुतः प्रवेश इति चेत्?

नैव—मीमांसकमते तत्तच्छब्दजन्यबोधे तत्तच्छब्दस्यापि भानाङ्गीकारेण तत्तच्छब्दविषयकतादृशशाब्दबोधं प्रति तत्तच्छब्दशक्तिज्ञानस्य हेतुतया व्यभिचारवारणसम्भवात्; लक्षणाग्रहस्याहेतुत्वाच्च,

अथ वा यत्रादौ केवलसूर्य्यत्वावच्छिन्ने पुष्पवन्तपदस्य शक्तिभ्रमः चन्द्रत्वावच्छिन्नपदार्थान्तरस्य बाधनिश्चयात्मकः; ततः पुष्पवन्तपदं चन्द्रसूर्य्योभयशक्तमिति शक्तिग्रहः चन्द्रे पदार्थान्तरसम्बन्धाभावज्ञाने भ्रम इति वाक्यविषयकस्मरणात्मक'; ततः चन्द्रे योग्यताज्ञानविरहेण केवलसूर्य्यस्य शाब्दबोधो योग्यताग्रहात्मकः; तत' चन्द्रसूर्य्योभयस्य बोध', तत्क्षणे केवलसूर्य्यस्यापि बोधप्रसङ्गः; तादृशशब्दस्योभयशक्तिग्रहस्याव्यवहितोत्तरत्ववत्त्वेन कार्य्यताऽवच्छेदकाक्रान्तत्वाद्,

न्द्रत्वाद्यवच्छिन्नान्वयबोधोपयिकयोग्यताज्ञानाद्यसत्त्वे न सूर्य्यत्वाद्यवच्छिन्नान्वयबोधप्रसङ्गः,

नानाऽर्थपदाच्च प्रत्येकधर्म्मावच्छिन्नस्यापि प्रतीत्या तत्र प्रत्येकमेवावच्छेदकतापर्याप्तेर वश्योपगन्तव्यतया शक्यताऽवच्छेदकताभेदेन शक्तिभेदः,

अथावच्छेदकताग्राहकमानेन धर्म्मिनिष्ठकविशेष्यतानिरूपितविशेषणताऽऽपन्नेष्वेव नानाधर्म्मेष्ववच्छेदकत्वपर्य्याप्तिर्गृह्यतेऽतो महानसीयो नास्ति वह्निर्नास्तीत्याकारकं महानसीयत्ववह्नित्वादिपुरस्कारेण पृथक् पृथक् प्रतियोगिविषयकं ज्ञानं महानसीयत्ववह्नित्वा-

योग्यताज्ञानाद्यात्मकोपादकसत्त्वाच्च, चन्द्रत्वप्रकारत्वस्य सूर्य्यत्वप्रकारत्वस्य च कार्य्यताऽवच्छेदकत्वे च केवलसूर्य्यत्वप्रकारकबोधस्य पुष्पवन्तपदशक्तिग्रहकार्य्यताऽवच्छेदकशून्यत्वमेवातो नापत्तिरिति, ·अत इति । तादृशधर्मस्य पुष्पवन्तपदशक्तिज्ञानकार्य्यताऽवच्छेदकतापर्य्याप्त्यधिकरणत्वादित्यर्थः । न सूर्य्यत्वावच्छिन्नान्वयबोधप्रसङ्ग इति । पुष्पवन्तावुष्णकिरणाविति वाक्याच्चन्द्र उष्णकिरणाभाववानिति बाधनिश्चयकाले सूर्य्य उष्णकिरण इति बोधो न प्रसरतीत्यर्थः, शुद्धसूर्य्यत्वप्रकारकशाब्दत्वस्य तादृशशक्तिज्ञानकार्य्यताऽवच्छेदकत्वविरहादिति भावः । नानाऽर्थपदात्=द्व्यर्थाविपदात्, प्रत्येकमित्यस्य सप्तम्यन्तस्य विष्णुत्वसूर्य्यत्वाद्येकैकस्मिन्नित्यर्थः ।

ननु महानसीयत्ववह्नित्वादिधर्म्मद्वयादिष्वेकप्रतियोगिताऽवच्छेदकत्वं विना महानसीयवह्निर्नास्तीत्यादिप्रतीतेः प्रत्येकाभावावगाहिप्रतीतितो वैलक्षण्यं नोपपद्यते; अतो महानसीयत्ववह्नित्वादिधर्म्मद्वयादिष्वेकावच्छेदकत्वं सिध्यतु; पुष्पवन्तपदशक्यताऽवच्छेदकत्वावगाहिनी विलक्षणा प्रतीतिर्नास्त्यतः चन्द्रत्वसूर्य्यत्वधर्म्मद्वयादिष्वेकावच्छेदकत्वं कुतः सिध्येद् ? इत्याशङ्कते—अथेत्यादि ।

अवच्छेदकताग्राहकेति । अवच्छेदकतासाधकप्रत्यक्षादिनेत्यर्थः । धर्म्मिनिष्ठकविशेष्यतेति । तथा च वह्निमति पर्व्वते वह्निशून्ये च महानसे महानसीयवह्निर्नास्तीति प्रतीतिर्जायते किन्तु महानसीयो नास्ति वह्निर्नास्तीति प्रतीतिस्तु न जायते; अत एतत्समूहालम्बनप्रतीतितः पूर्व्वप्रतीतौ वह्निनिष्ठकविशेष्यतानिरूपितः प्रकारतारूपो विशेषः स्वीकार्य्य इति वह्निनिष्ठैकप्रतियोगिताऽवच्छेदकतापर्य्याप्त्यधिक-

दिपर्य्याप्तप्रतियोगिताऽवच्छेदकताकं विशेषाभावं नावगाहते; अपि तु शुद्धवह्नित्वावच्छिन्नाभावादिकमेवेति कथं दिवाकरनिशाकरशक्तं पुष्पवन्तपदमित्यादिशक्तिग्रहे चन्द्रत्वसूर्य्यत्वोभयस्मिन् शक्यताऽवच्छेदकत्वपर्य्याप्तिभानं; तत्र धर्म्मिणोश्चन्द्रसूर्य्ययोर्भेदेन तन्निष्ठविशेष्यतायाऐक्यासम्भवादिति चेद् ?

न—यतो यत्रावच्छेदकीभूतव्यासज्यवृत्तिधर्म्मान्तरधर्म्मिताऽवच्छेदकतया धर्म्मद्वयादेर्भानं; तत्र विभिन्नधर्म्मिविशेषणताऽऽपन्नेष्वपि तावद्धर्म्मेष्वेकावच्छेद्यनिरूपितावच्छेदकतापर्य्याप्तिः प्रतीयते,

कथमन्यथा घटपटौ न स्त इत्याकारकोभयत्वावच्छिन्नाभावप्रतीतौ घटपटादिरूपप्रतियोगिविषयताया भेदेऽप्यभावविषयताया ऐक्येन समूहालम्बनविलक्षणायामुभयत्वादिधर्मिताऽवच्छेदकतया भासमानघटत्वादिषु तादृशाभावप्रतियोगिताऽवच्छेदकत्वपर्य्याप्तिभानम् ?

एवञ्च दिवाकरनिशाकरयोः शक्तमेतत्पदमित्याकारकग्रहे शक्तिविषयताया ऐक्येन समूहालम्बनविलक्षण उभयत्वधर्मिताऽवच्छे-

रणत्व महानसीयत्ववह्नित्वोभयस्मिंस्तत्रैव, अन्यथा वह्निमति पर्वतादौ तादृशप्रतीतिर्न स्यादिति भाव ।

दिवाकरनिशाकरशक्तमयादि । अयम्भाव —अनेकधर्म्मिणोऽनेकाविशेषणकतया भानेन तादृशशक्तिज्ञानस्य समूहालम्बनतयाऽनुभूयमानत्वेन नैकशक्तिविषयकत्वसम्भव, दृष्टान्तान्तरेणोभयत्वभानाङ्गीकारेण च समूहालम्बनज्ञानात् तस्य विलक्षणत्वस्थापनेनोत्तरयति—यतो यत्र्यादिना । अवच्छेदकीभूतेति । प्रतियोगित्वादिसम्बन्धावच्छिन्नप्रकारताऽवच्छेदकीभूतेत्यर्थ तादृशशक्तिज्ञानप्रकविशेष्यताकत्वस्वीकारे बाधकमाह—घटपटौ न स्त इति । तादृशप्रतीतावुभयत्वादिव्यासज्यवृत्तिधर्म्मं पर द्वयोरेकमित्यादिरीत्या घटत्वावच्छिन्ने पटत्वावच्छिन्ने च भासमान सन् तत्तद्धर्म्मावच्छिन्नप्रतियोगिताऽवच्छेदकतया भासतेऽतस्तादृशप्रतीति प्रत्येकधर्म्मावच्छिन्नप्रतियोगिताकाभावतो विलक्षणोभयाभावावगाहिनी घटत्वादिप्रत्येकधर्म्मावच्छिन्नप्रकारताकनिश्चयेन न बाध्यते, तस्माच्च घटत्वपटत्वोभयत्वादिनिष्ठयादिधर्म्मपर्य्याप्तिकावच्छेदकतानिरूपितैकप्रतियोगितासिद्धि

दकताऽऽपन्नचन्द्रत्वसूर्य्यत्वयोरेकशक्यताऽवच्छेदकत्वपर्य्याप्तिभानमविरुद्धमिति न दोषः

न चैवमुभयाभावप्रतियोगितायामुभयत्वस्येव प्रकृतउभयत्वस्याप्यवच्छेदककोटिप्रवेशप्रसङ्ग इति वाच्यम् ?

अभावबुद्धौ प्रतियोग्यंश उपलक्षणस्याप्रकारत्वनियमादुभयत्वस्य प्रतियोगिताऽवच्छेदकत्वध्रौव्यात् ,

शक्तिग्रहे च शक्यांश उपलक्षणस्योभयत्वस्य प्रकारत्वोपगमेन तस्य शक्यताऽनवच्छेदकत्वाद्,

अस्तु वा प्रकृत उभयत्वसहितमेव चन्द्रत्वसूर्य्यत्वोभयं शक्यताऽवच्छेदकं; द्वावित्यत्रेव पुष्पवन्तावित्यत्रापि प्रकृतिविभक्तिभ्यामु-

---

रिति भावः।

एतच्च प्रात्यक्षिकप्रतीत्यभिप्रायेण, तादृशशाब्दे तु घटपटोभयत्वावच्छिन्ने वृत्तित्वाभावः प्रतीयते, अन्यथा स्त इत्यत्र द्विवचनानुपपत्तेः, आख्यातार्थविशेष्यबोधकपदस्यैव तत्समानवचनकत्वनियमादिति शाब्दाभिप्रायेणाप्येतत्सम्भवाच्च।

उपलक्षणस्येति । अभावप्रतियोगिताऽवच्छेदकताऽनापन्नस्येत्यर्थः, अन्यथा महानसीयवह्निर्नास्ति विशिष्टसत्ता नास्तीत्यादिप्रतीतेरपि वह्न्यादिसामान्याभावावगाहित्वाऽऽपत्तेरिति भावः।

उपलक्षणस्य=शक्यताऽनवच्छेदकत्वानियतशक्तिनिष्ठविशेष्यताकप्रकारताऽऽश्रयस्य, शक्यताऽनवच्छेदकत्वादिति । तदादिपदानां बुद्धिस्थत्वादेरिवेति भावः।

ननूभयत्वस्य शक्यांश उपलक्षणतया भानोपगमेन शक्तेरैक्यकल्पना यदि स्यात् तदा धेन्वादिपदानामपि गोत्वधानकर्मत्वादेरप्युपलक्षणतया गवादिनानाव्यक्तिषु शक्तेरैक्यं स्यात्; स्याच्च गोत्वधानकर्मत्वादौ शक्यताऽवच्छेदकत्ववैयर्थ्यमिति? अत आह-अस्तु वेति।

उभयत्वसहितमिति। तथा चोभयत्वचन्द्रत्वसूर्य्यत्वैतत्त्रितयमेव पुष्पवन्तपदशक्यताऽवच्छेदकमित्यर्थ

ननूभयत्वस्यापि शक्यताऽवच्छेदकत्वे पुष्पवन्तपदेनैवोभयत्वावच्छिन्नोपस्थापनात् पुष्पवन्तावित्यत्र द्विवचनोपस्थाप्योभयत्वस्य तत्रानन्वयप्रसङ्गो निराकाङ्क्षत्वादिति ? अत आह-द्वावित्येति ।

पस्थापितस्य सकृदेव भानं; विरुद्धयोरेकावच्छेदकत्वपर्य्याप्तिरपि घटत्वपटत्वयोरुभयाभावप्रतियोगिताऽवच्छेदकत्वपर्य्याप्तिवद् प्रकृते न विरुध्यते,

न च घटपटौ न स्त इत्यत्रोभयत्व एव प्रतियोगिताऽवच्छेदकत्वं भासते न तु घटत्वपटत्वादाविति वाच्यम् ?

केवलोभयत्वे तादृशाभावप्रतियोगिताऽवच्छेदकतायाः पर्य्याप्तौ यत्किञ्चिदुभयवति तादृशाभावप्रतीत्यनुपपत्तेः,

न च सामानाधिकरण्यसम्बन्धेन घटत्वपटत्वरूपावच्छेदकत्वावच्छेदकधर्म्मेण व्यावृत्तोभयत्वविशेषस्यैव तत्रावच्छेदकत्वं प्रतीयत इति वाच्यम् ?

सकृदेव भानमिति । न तत्र द्विवचनोपस्थाप्यद्वित्वान्वय, अन्वयबोधानुत्पत्तेस्तत्रैकत्वादिति भाव ।

प्रतियोगिताऽवच्छेदकतापर्य्याप्तिवदिति । तथा च परस्पर विरुद्धेऽपि घटत्वपटत्वादिधर्म्मिताऽवच्छेदकत्व प्रतीतिबलात् स्वीकरणीयम्,

स्वीकार्यञ्चोभयत्वादिसहितविरुद्धघटत्वपटत्वादावेकप्रतियोगिताऽवच्छेदकतापर्य्याप्त्यधिकरणत्वम्, अन्यथा तादृशप्रतीतेर्विलक्षणाभावविषयकत्वानुपपत्ति स्यादिति भाव ।

ननु यदि घटपटौ न स्त इति दृष्टान्तप्रतीतौ घटत्वपटत्वोभयत्वेतत्त्रितयपर्याप्तैकावच्छेदकताकप्रतियोगित्व भासेत तदा पुष्पवन्तपदं चन्द्रसूर्यौभयवाचकमिति प्रतीत्याऽपि चन्द्रत्वसूर्यत्वोभयत्वैतत्त्रितयधर्म्मपर्याप्तावच्छेदकताकशक्ति सिध्येत् तथैव न ? इत्याशङ्कते—न चेत्यादि ।

केवलोभयत्व इति । उभयत्वत्वेनोभयत्वमात्र इत्यर्थ, यत्किञ्चिदुभयवतीति । दण्डमठोभयादिप्रकारकनिश्चयसत्त्व इत्यर्थ, तादृशधर्मपर्याप्तावच्छेदकताकप्रतियोगिनासम्बन्धेन तादृशधर्म्मावच्छिन्नप्रकारताकाभावबुद्धिं प्रति तादृशधर्म्मावच्छिन्नप्रकारकनिश्चयत्वेन प्रतिबन्धकत्वकल्पनेन मठदण्डोभयवदिति निश्चये सामान्यत उभयत्वत्वावच्छिन्नप्रकारताकनिश्चयसत्त्वाद् घटपटौ न स्त इति प्रतीतिर्न भवितुमर्हतीति भाव ।

सामानाधिकरण्येनेति । सामानाधिकरण्यसम्बन्धेन पटत्वनिष्ठावच्छेदकतानिरूपिका सती तादृशसम्बन्धेन घटत्वनिष्ठावच्छेदकतानिरूपिका योभयत्वनिष्ठावच्छेदकता, तन्निरूपकप्रतियोगिताकाभाव एव

तेन तेन प्रकारेण तत्रोभयत्वस्याभानात्तत्तद्रूपाणां तत्तद्धर्म्मिविशेषणतयैव भानादतिप्रसक्तधर्म्मप्रकारेण भासमाने चावच्छेदकतापर्याप्तिभानानुपगमात् तत्रोभयत्वविशेषेऽभावप्रतियोगिताऽव-

---

ताद्दशप्रतीतेर्विषयः ।

एवञ्च ताद्दशविशेषणविशेष्यताऽऽपन्नोभयत्वस्यैवावच्छेदकत्वमानाद् विलक्षणाभावावगाहनमिति हृदयम् ।

तेनेति । सामानाधिकरण्यसम्बन्धेन घटत्वेन पटत्वेन च, तत्र=ताद्दशप्रतीतौ, अभानाद्=अविषयत्वात्, तत्तद्रूपाणां=घटत्वपटत्वादीनां, धर्मिविशेषणतया=घटादिविशेषणतया, एवकारेणोभयत्वादिविशेषणतया भानव्यवच्छेदः, अतिप्रसक्तधर्मप्रकारेण=उभयत्वान्तरसाधारणोभयत्वत्वप्रकारेण । भासमान इति । घटपटादिवृत्तित्वविशेष इति हृदयम् । तत्र=ताद्दशप्रतीतौ, उभयत्वविशेष इति । सामानाधिकरण्यसम्बन्धेन घटत्वपटत्वविशिष्ट इत्यर्थः ।

अयम्भावः—यत्र ज्ञाने यद्यद्धर्मविशिष्ट उभयत्वादिकं भासते तत्र तत्तद्धर्मसामानाधिकरण्येनाप्युभयत्वादिकं भासत इति नियमेनोक्तप्रत्यादिग्रहे घटत्वपटत्वादिसमानाधिकरणतयाऽप्युभयत्वादेर्भानमवश्यमेव,

एवञ्च घटपटौ न स्त इत्यादिवाक्यज्ञानस्य हि सामानाधिकरण्यसम्बन्धावच्छिन्नघटत्वपटत्वनिष्ठावच्छेदकताकोभयत्वत्वावच्छिन्नावच्छेदकताकप्रतियोगितासम्बन्धावच्छिन्ना या घटत्वावच्छिन्नविशेष्यताकपटत्वावच्छिन्नविशेष्यताकोभयत्वत्वावच्छिन्नप्रकारत्वावच्छिन्नघटत्वपटत्वोभयत्वैतत्त्रितयधर्म्मपर्याप्तावच्छेदकताकप्रकारता तन्निरूपिताभावत्वावच्छिन्नविशेष्यताकशाब्दबोधं प्रति हेतुतायाः कल्पनीयतया ताद्दशोभयत्वविशेषे प्रतियोगिताऽवच्छेदकत्वादिसम्भवः,

ननु नञर्थाभावे यत्सम्बन्धेन याद्दशधर्म्मविशिष्टस्य विशेषणतया भानं ताद्दशसम्बन्धावच्छिन्नतद्धर्म्मनिष्ठावच्छेदकताकप्रतियोगिताया एव तत्संसर्गतया भाननियमः;

अन्यथा घटो नास्तीत्यादिप्रतीतेर्विषयितासम्बन्धावच्छिन्नघटत्वनिष्ठावच्छेदकताकप्रतियोगितासम्बन्धेन तद्व्यक्तित्वावच्छिन्नप्रतियोगितासम्बन्धेन चाभावांशे घटादेर्भानापत्त्या घटवत्यपि ताद्दशप्रतीत्यापत्तेः,

एवञ्च घटपटौ न स्त इत्यादिप्रतीतौ घटत्वादेः समवायेन घटाद्यंशे भानेन समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताया एव सं-

च्छेदकत्वपर्य्याप्त्युपगमेऽप्युभयत्वाविशेषे शक्यताऽवच्छेदकत्वपर्य्याप्तिसम्भवाच्चन्द्रत्वसूर्य्यत्वयोरवच्छेदकताऽवच्छेदकतयैव शाब्दबोधे भानोपपत्तिः,

न च शक्यताऽवच्छेदकताऽवच्छेदकमवच्छेदकविशेषणतयैव भासत इति चन्द्रत्वसूर्य्यत्वयोस्तथात्वे चन्द्रसूर्य्यांशे प्रकारतया शाब्दबोधे भानानुपपत्तिरिति वाच्यम् ?

तयोरवच्छेदकताऽवच्छेदकत्वेऽपि शक्तिग्रहेऽवच्छेदकाश्रयचन्द्र-

सर्गत्वमावश्यकमिति चेद् ?

न-यत्रोभयत्वादेर्धर्मिताऽवच्छेदकतया घटत्वादेर्मानं तत्र घटत्वपटत्वादिसामानाधिकरण्येनोभयत्वादेः पारतन्त्र्येण भानोपगमादुक्तप्रतियोगिताया संसर्गत्वसम्भवादाकाङ्क्षाज्ञानस्य कारणतया विशेषतोऽविश्रमाच्च,

अवच्छेदकताऽवच्छेदकतयैवेति । शक्यताऽवच्छेदकताऽवच्छेदकतयैवेत्यर्थः ।

शक्तिज्ञानन्तु चन्द्रत्वसूर्यत्वावच्छिन्नोभयत्वनिष्ठावच्छेदकताकस्वनिरूपितशक्तिसम्बन्धेन चन्द्रसूर्योभयवत् पुष्पवन्तपदमित्याद्याकारकमिति ध्येयम्,

ननु पशुपदादिजन्यबोधे शक्यताऽवच्छेदकताऽवच्छेदकस्य लाङ्गूलत्वादेर्यथा शक्यविशेषणलाङ्गूलादिविशेषणतया मानं; तथा पुष्पवन्तपदजन्यबोधेऽपि शक्यताऽवच्छेदकताऽवच्छेदकचन्द्रत्वादेः शक्यविशेषणोभयत्वादिविशेषणतया मानं स्याद् ? इत्याशङ्कते-न चेत्यादि।

तयोरिति । चन्द्रत्वसूर्यत्वावच्छिन्नोभयत्वनिष्ठावच्छेदकताकस्वनिरूपितशक्तिसम्बन्धेन चन्द्रसूर्योभयप्रकारकज्ञानस्य हेतुतया तादृशज्ञाने चन्द्रत्वेन चन्द्रस्य सूर्यत्वेन सूर्यस्य च भानेन तज्जन्योपस्थितेरपि तादृशचन्द्रसूर्यविषयतया शाब्दबोधोऽपि तादृशो युज्यत इति हृदयम्,

नन्ववच्छेद्यमहे स्वातन्त्र्येणावच्छेद्याश्रये यस्य मानं तत्रावच्छेद्यावच्छेदकत्वं तत्र यो विशेषणतया भासते तत्रावच्छेद्यावच्छेदकताऽवच्छेदकत्वं न तु पारतन्त्र्येण भासमानेऽवच्छेद्यावच्छेदकत्वमिति नियम, रजतत्वेन रङ्गस्य ज्ञानं नास्तीत्यादिप्रतीतौ तु तृतीयाऽन्तार्थस्य रजतत्वप्रकारत्वस्य निरूपितत्वसम्बन्धेन षष्ठ्यन्तार्थरङ्गविशेष्यत्वेऽन्वयाद् रजतत्वप्रकारत्वनिष्ठावच्छेदकतानिरूपकरङ्गविशेष्यत्वमि-

सूर्यविशेषणतयैव भानात् शाब्दबोधेऽपि तद्विशेषणतया भानसम्भवात् ,

अथ शक्तिग्रहे साक्षात् शक्यताऽवच्छेदकस्य तदुभयस्य शक्यचन्द्रसूर्य्योभयांशे साक्षात्प्रकारतया भानं न सम्भवतीति चेद्व ?

घटपटौ न स्त इत्यादौ घटत्वपटत्वयोः साक्षात् प्रतियोगिताऽवच्छेदकत्वमन्तरेण प्रतियोगिविशेषणतया भानासम्भवस्तुल्य एवेत्याहुः ।

ज्ञानशक्तिवादिनस्तु—चन्द्रत्वसूर्य्यत्वोभयप्रकारकज्ञानमेव पुष्पवन्तपदशक्यं पुष्पवन्तपदमुभयप्रकारकज्ञाने शक्तमित्याकारकशक्तिग्रहस्य तादृशज्ञानत्वमेव कार्य्यताऽवच्छेदकमिति व्युत्पत्तिमतः पुरुषस्य नैकैकबोधापत्तिरतोऽतादृशस्य भवत्येव तादृशबोधः,

न चैवमपि पुष्पवन्तपदं चन्द्रत्वप्रकारकज्ञाने शक्तमित्यादिबोधस्य भ्रमत्वात् शक्तिभ्रमं विना प्रत्येकशाब्दबोधानुदय इति कथमुपपद्यत इति वाच्यम् ?

ह्यावच्छेदकताकज्ञानत्वाद्यवच्छिन्नप्रतियोगिताकाभाव एव भासते,

एवञ्च रङ्गरजते इति समूहालम्बनज्ञानकाले तादृशप्रतीतिरुपपन्ना, एवञ्च पुष्पवन्तपदं चन्द्रसूर्यशक्तमित्यादिप्रतीत्या शक्यांशे विशेषणतया भासमाने चन्द्रे सूर्ये च साक्षाद् विशेषणयोः चन्द्रत्वसूर्य्यत्वयोः शक्यताऽवच्छेदकत्वमेव न तु शक्यत्वाद्यवच्छेदकताऽवच्छेदकत्वं सिध्यतीत्याह—अथ शक्तीति ।

तुल्य एवेति । तथा च यत् साक्षादवच्छेदकं तदवच्छेद्याश्रये साक्षाद्विशेषणतया भासत इति नियमो न प्रामाणिकः; प्रामाणिकत्वे विरुद्धयोरपि घटत्वपटत्वयोः प्रतियोगितानिरूपितैकावच्छेदकत्वपर्य्याप्तिर्भवताऽपि स्वीकार्य्येति भावः ।

ज्ञानशक्तिवादिनां मतमाह—ज्ञानशक्तीति । चन्द्रत्वसूर्यत्वोभयप्रकारेति । चन्द्रत्वप्रकारकत्वे सति सूर्यत्वप्रकारकं ज्ञानमित्यर्थः, तथा च चन्द्रत्वांशे उभयत्वाभानेऽपि न क्षतिः ।

पुष्पवन्तपदशक्यमिति । पुष्पवन्तपदनिष्ठशक्तिनिरूपितजन्यतावदित्यर्थः । शक्तमिति । तादृशज्ञानजनकशक्तिमदित्यर्थः । तादृशज्ञानत्वमिति । चन्द्रत्वप्रकारकं सत् सूर्य्यत्वप्रकारकं यत्तादृशज्ञानत्वमित्यर्थः, तथा च

केवलचन्द्रत्वप्रकारकबोधे तत्तत्प्रकारकबोधत्वांशे शक्तिनिरूपकताऽवच्छेदकताऽवच्छेदकतापर्याप्तिग्रहस्य हेतुत्वात्,

प्रकृत उभयप्रकारकबोधत्वांशे शक्तिनिरूपकताऽवच्छेदकत्वपर्याप्त्यभ्युपगमात् तादृशस्य चन्द्रत्वप्रकारकज्ञाने शक्तमित्यादिबोधस्य भ्रमत्वनियमादित्याहुः।

ईश्वरेच्छारूपस्य सङ्केतस्य शक्तित्वमङ्गीकर्तृसिद्धान्तिपक्षे पुष्पवन्तपदाच्चन्द्रत्वावच्छिन्नविषयकसूर्यत्वावच्छिन्नविषयकशाब्दबोधो भवत्वित्याकारक एव तादृशपदे भगवत्सङ्केतः केवलचन्द्रत्वावच्छिन्नविषयकबोधश्च न तत्पदजन्यत्वेन तद्विषय इति तादृशपदान्न तथाविधबोधः,

न च तादृशपदजन्यत्वेन केवलचन्द्रत्वावच्छिन्नविषयकबोधस्य सङ्केताविषयत्वेऽपि चन्द्रत्वाद्यवच्छिन्नविषयकबोधविषयकत्वेन सङ्केतविषयकग्रहस्य चन्द्रत्वादिप्रकारकबोधजनकस्य सूर्यत्वाद्यवच्छिन्नविषयकबोधविषयकत्वेन संकेतग्रहघटितसूर्यत्वाद्यवच्छिन्नविषयकबो-

---

तादृशधर्मत्रयमेव शक्यताऽवच्छेदकं शक्तिनिरूपितजन्यताऽवच्छेदकमिति तु यावद्, इति व्युत्पत्तिमत=इति शक्तिग्रहवत', शक्तिनिरूपकता=शक्त्यवच्छिन्नजनकतानिरूपकता, अन्यच्च सुगमम्।

न्यायमतमुत्थापयति—ईश्वरेति। पक्षे=मत इत्यर्थः, चन्द्रत्वावच्छिन्नविषयताशालीति चन्द्रत्वप्रकारताशालीति वा तदर्थः, न तथाविध बोध इति। अत्र शक्तिभ्रमात इति पूरणीयम्।

चन्द्रत्वादिप्रकारकबोधजनकस्येति। पुष्पवन्तपदाच् चन्द्रत्वावच्छिन्नविषयकबोधो भवत्वित्याद्याधुनिकसङ्केतजन्यस्य तादृशशक्तिभ्रमजन्यस्य वा केवलचन्द्रत्वादिप्रकारकशाब्दबोधस्यानुरोधेन चन्द्रत्वप्रकारकशाब्द प्रति पुष्पवन्तपदजन्यत्वप्रकारतानिरूपितचन्द्रत्वावच्छिन्नविशेष्यताशालिसङ्केतग्रहो हेतुर्वाच्यः, तथा च तादृशशक्तिग्रहात् सूर्यत्वप्रकारकशाब्दसामग्रीं विनाऽपि चन्द्रत्वप्रकारकशाब्दबोधजननादिति भाव,

एतेन पुष्पवन्तपदघटितसामग्रीतः केवलचन्द्रादिविषयकबोधस्य दुःशक्यजननात् तादृशसामग्र्या. केवलचन्द्रादिविषयकबोधस्यापाद

यसामग्र्यामसत्यामपि सम्भवेन तद्बलादभ्रान्तस्य केवलचन्द्रत्वावच्छिन्नविषयकबोधो दुर्व्वार एवेति वाच्यम् ?

तत्पदजन्यकेवलचन्द्रत्वादिप्रकारकबोधे तत्पदजन्यकेवलचन्द्रत्वावच्छिन्नविषयकबोधत्वपर्य्याप्तविषयताऽवच्छेदकताकत्वप्रकारकसङ्केतविषयकज्ञानस्य हेतुत्वात्,

पुष्पवन्तपदजन्यबोधत्वघटितभगवत्संकेतविषयताऽवच्छेदकशरीरे च सूर्य्यत्वावच्छिन्नविषयकत्वचन्द्रत्वावच्छिन्नविषयकत्वयोरेकत्र निवेशात् तत्पदजन्यप्रत्येकधर्म्मावच्छिन्नविषयकबोधत्वे संकेतविषयताऽवच्छेदकत्वपर्य्याप्तिविरहात् तदंशे तत्पर्य्याप्त्यवगाही ग्रहो भ्रम एवेति न शक्तिभ्रमातः प्रत्येकधर्म्मप्रकारकबोधापत्तिः,

---

कत्वासम्भवात् केवलचन्द्रत्वावच्छिन्नविषयकबोधो दुर्व्वार एवेत्यस्यासङ्गतिरित्यपि निरस्तम्,

तादृशाधुनिकसङ्केतग्रहादिसत्त्वे केवलचन्द्रादिविषयकबोधस्योत्पत्त्या पुष्पवन्तपदघटितवाक्यज्ञानस्य कारणत्वस्यावश्यकत्वेन तद्घटितसामग्र्याः कुत्र चित् केवलचन्द्रादिविषयकबोधोत्पत्त्या आपादकत्वसम्भवात्,

केवलचन्द्रत्वादिप्रकारकशाब्दबोधतज्जनकशक्तिग्रहयोः चन्द्रत्वावच्छिन्नविषयकसूर्य्यत्वावच्छिन्नविषयकशाब्दबोधतज्जनकशक्तिग्रहयोश्च कार्य्यकारणभावावच्छेदकवैलक्षण्यप्रदर्शनेन समाधत्ते--तत्पदजन्येति । पुष्पवन्तपदजन्येत्यर्थः, केवलचन्द्रत्वादिप्रकारकशाब्दत्वञ्च कार्य्यताऽवच्छेदकं पूर्व्वं निरुक्तं, तत्पदजन्यकेवलचन्द्रत्वावच्छिन्नेत्यादिना कारणताऽवच्छेदकमुक्तं, तच्च पुष्पवन्तपदजन्यत्वप्रकारतानिरूपिता या चन्द्रत्वावच्छिन्नविषयकत्वनिष्ठावच्छेदकताभिन्ना सती शाब्दत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका तादृशधर्म्मद्वयावच्छिन्ना विशेष्यता तच्छालिसङ्केतग्रहत्वं--

तादृशसङ्केतश्च पुष्पवन्तपदजन्यः चन्द्रत्वावच्छिन्नविषयकशाब्दबोधो भवत्वित्याकारकः,

द्वितीयकारणताऽवच्छेदकञ्च पुष्पवन्तपदजन्यत्वप्रकारतानिरूपिता या चन्द्रत्वावच्छिन्नविषयकत्वसूर्य्यत्वावच्छिन्नविषयकत्वशाब्दत्वैतत्त्रितयधर्म्मावच्छिन्नविशेष्यता तच्छालिसङ्केतग्रहत्वम्,

तत्पदजन्यचन्द्रत्वावच्छिन्नविषयकसूर्य्यत्वावच्छिन्नविषयकबो-धत्वपर्य्याप्तविषयताऽवच्छेदकताकत्वप्रकारकशक्तिग्रहस्य चोभयधर्म्मप्रकारकबुद्धित्वमेव कार्य्यताऽवच्छेदकमतो न तद्घटितसामग्रीबला-देकधर्म्मावच्छिन्नान्वयबोधस्य यत्किञ्चित्कारणविरहदशायामपरधर्म्मप्रकारकशाब्दबोधापत्तिः,

---

अथ कीदृशं सङ्केतज्ञानमत्र कारणम् ? न तावच्चन्द्रत्वावच्छिन्नविषयकत्वसूर्य्यत्वावच्छिन्नविषयकत्वशाब्दत्वैतद्धर्म्मत्रयावच्छिन्नभगवत्सङ्केतीयविशेष्यतानिरूपितजन्यत्वप्रकारतानिरूपितपुष्पवन्तपदत्वावच्छिन्नावच्छेदकताकं पुष्पवन्तपदमित्याकारकम्,

तादृशज्ञानस्य पदपदार्थयोः सम्बन्धानवगाहनेनार्थस्मरणानुपपत्तेः,

नापि स्वनिष्ठं यत् पुष्पवन्तपदत्वावच्छिन्नावच्छेदकत्वं तन्निरूपितजन्यत्वप्रकारताकतादृशधर्म्मत्रयावच्छिन्नभगवत्सङ्केतीयविशेष्यतानिरूपितावच्छेदकताऽऽश्रयविषयत्वसम्बन्धेन पुष्पवन्तपदप्रकारकचन्द्रसूर्य्यविशेष्यकज्ञानम्,

अत्र स्वपदं पुष्पवन्तपदपरं परिचायकं, तादृशज्ञानस्य चन्द्रः सूर्य्यश्च पुष्पवन्तपदवानित्याकारकतया समूहालम्बनपर्य्यवसन्नत्वेनैकशक्तिविषयकत्वानुपपत्तेः,

न च द्वयोरेकमिति रीत्योक्तसम्बन्धेन पुष्पवन्तपदप्रकारकचन्द्रसूर्य्यविशेष्यकज्ञानस्य समूहालम्बनविलक्षणतयैकशक्त्यवगाहित्वेन नियतचन्द्रसूर्य्योभयविशेष्यकबोधजनकत्वोपपत्तिरित्यपि न सद्,

यस्माद् विरुद्धधर्म्मद्वयं धर्म्मिताऽवच्छेदकीकृत्य व्यासज्यवृत्तिधर्म्मप्रकारकमेव समूहालम्बनविलक्षणं स्वीक्रियते न त्वव्यासज्यवृत्तिधर्म्मप्रकारकम्,

अन्यथा विरुद्धघटत्वपटत्वादिकं धर्म्मिताऽवच्छेदकीकृत्य द्रव्यत्वादिकं धर्म्मिताऽवच्छेदकीकृत्य द्रव्यत्वादभावपरतया द्रव्यघटपटवद् भूतलमित्याकारकस्य द्रव्यत्वादिधर्म्मत्रयावच्छिन्नप्रकारताकं समूहालम्बनात्मकं ज्ञानं स्यात्

स्याच्च द्रव्यत्वघटत्वपटत्वादित्रितयधर्म्मावच्छिन्नप्रतियोगिताकोऽतिरिक्तोऽभाव इति चेद् ?

उच्यते—स्वनिष्ठविषयत्वनिष्ठावच्छेदकतानिरूपिका या चन्द्रत्वावच्छिन्नविषयकत्वसूर्य्यत्वावच्छिन्नविषयकत्वशाब्दत्वैतद्धर्म्मत्रयावच्छि-

उभयविषयकत्वावच्छिन्नाया बोधनिष्ठसंकेतविषयताया ऐक्यात् शक्तेरैक्यमिति न तत्पदस्य नानार्थतेति रमणीयः समाधिः,

"एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" इत्यमरकोष उक्तिपदं शक्तिपरं पुष्पवन्तपदं तत्प्रतिपाद्यपरं, तथा च सूर्याचन्द्रमसावेकशक्त्या पुष्पवन्तपदप्रतिपाद्यावित्यर्थः,

उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वये तात्पर्य्याच्चन्द्रत्वसूर्यत्वयोरेकशक्त्यधीनप्रतिपत्तिविषयतावच्छेदकत्वलाभो नातस्तस्माद्

समगवदिच्छीयविशेष्यता तन्निरूपितलक्ष्यत्वप्रकारतानिरूपितपुष्पवन्तपदत्वावच्छिन्नावच्छेदकतावत्त्वसम्बन्धेन चन्द्रसूर्यवत् पुष्पवन्तपदमित्याकारकमेव सङ्केतज्ञानं हेतुः, अत्र स्वपदं चन्द्रादिपरम्,

अत्रैकत्र द्वयमिति रीत्या चन्द्रसूर्य्योभयस्य तादृशपदे प्रकारतया युगपज्ज्ञानेन न समूहालम्बनत्वम्; अत एतज्ज्ञानस्यैकशक्तिविषयत्व नानुपपन्नमित्यलं विस्तरेण,

शक्तिग्राहककोषस्यापि पुष्पवन्तपदस्योभयस्मिन्नेकशक्तिकत्वपरत्वमुपपादयति—एकेत्यादिमिति ।

तदुक्तत्वतीयायाः प्रयोज्यत्वमर्थः; तस्य च पुष्पवन्तपदार्थतत्पदप्रतिपाद्यघटकप्रतिपत्तावन्वय, सूर्याचन्द्रमसेति । चन्द्रसूर्यौ पुष्पवन्तपदजन्यैकशक्तिप्रयोज्यप्रतिपत्तिविषयतावन्ताविति तदर्थः,

नन्वेतावताऽपि चन्द्रसूर्ययोर्निष्ठकथञ्चिदनुगतैकधर्मावच्छिन्नशक्तिस्वीकारेण तादृशधर्म्मप्रकारेण तयोः प्रतिपत्तिसम्भवेन न चन्द्रत्वादिप्रत्येकधर्मावच्छिन्न एकशक्तिसिद्धिः ? इत्यत आह—उद्देश्यताऽवच्छेदकावच्छेदेनेति ।

अयमाशयः—वाक्यं हि द्विविधम्—एकम् उद्देश्यताऽवच्छेदकसामानाधिकरण्येन विधेयान्वयपर—

द्वितीयम् उद्देश्यताऽवच्छेदकावच्छेदेन विधेयान्वयपरम्,

आद्यं यथा—नीरूपस्पर्शवन्मन; अस्य च रूपशून्यस्पर्शवद् यत् तद् मनः मनःपदार्थ इत्यर्थः, अस्य च रूपशून्यत्वविशिष्टस्पर्शवत्त्वसामानाधिकरण्येन मनःपदशक्यत्वान्वये तात्पर्यं मनस्त्वजातेरेव शक्यताऽवच्छेदकत्वात्,

एवं गौरिव गवय इत्यतिदेशवाक्यस्यापि,

द्वितीय यथा—शङ्खो लक्ष्मीपतेः पाञ्चजन्य इत्यादि; अस्य च विष्णोः शङ्ख पाञ्चजन्यपदशाक्य इत्यर्थः, तात्पर्यमस्य विष्णुसम्बन्धिशङ्ख-

नानाऽर्थादिव तादृश एकधर्म्मावच्छिन्नविषयकबोधो; नानाऽर्थे शक्तिभेदेन विशेषादिति लभ्यते,

अथ वैकयोक्त्या=एकोच्चारणेन सूर्याचन्द्रमसौ पुष्पवन्तपदप्रतिपाद्यावित्यर्थः,

तथा च यथा नानाऽर्थस्थले नावृत्तिमन्तरेण नानाऽर्थबोधस्तथा न प्रकृते; अत्र शक्तेरैक्येन सकृदुच्चरितात् सकृदर्थप्रत्यय एवेत्यस्याविषयत्वादिति भावः ।

त्वावच्छेदेन तस्यैव शक्यताऽवच्छेदकत्वाद्,

एवञ्च पुष्पवन्तपदस्यैकशक्तिज्ञानजन्यत्वस्य चन्द्रत्वावच्छिन्नविषयकसूर्य्यत्वावच्छिन्नविषयकप्रतिपत्तौ लाभ,

ननु दिवाकरनिशाकरावित्यत्रोभयत्वस्याप्युद्देश्यताऽवच्छेदकत्वेनैकशक्त्यधीनप्रतिपत्तिविषयताऽवच्छेदकतालाभोऽपि स्यात् पुष्पवन्तपदजन्यबोधे तादृशोभयत्वस्याभानादिष्टापत्तेरयोगादिति चेद् ?

न-तादृशोभयत्वस्य धर्म्मेऽत्र उपलक्षणतया मानस्वीकारेणात्र विधेयताऽवच्छेदकत्वालाभात् स्वरूपसम्बन्धरूपावच्छेदकत्वस्यैकदेशेऽपि स्वीकाराच्चेति भाव',

एकयेत्यत्रैकत्वं सजातीयद्वितीयराहित्यं न तु संख्याधीविशेषविषयत्वं, तच्च पुष्पवन्तपदजन्यप्रतिपत्तिप्रयोजकशक्तिनिष्ठभेदाप्रतियोगित्वम् ,

एवञ्च पुष्पवन्तपदस्य नानाशक्तिमत्त्वेऽपि नैकयोक्त्येत्यस्य बाध इति निरस्तम् ।

मिश्रमतानुसारेणाह—अथ वेति ।

यत्तु पूर्वकल्प उक्तिपदस्य शक्तिपरत्वे लक्षणाऽऽपत्तिरित्यत आह-अथ वेति; इति भाववर्णनं तत्तुच्छ-यतो गां वक्तीत्यादिना पूर्वोक्तेन भट्टाचार्य्येणैव वच्यादिधातोः शक्तौ शक्तिर्निरूढलक्षणा वा स्वीकृता, नावृत्तिमन्तरेणेति । तथा च हरिर्गच्छतीति सकृदुच्चरितात् सिंहसूर्यादेरेकतरस्यैव बोधो न तु सूर्य्यो गच्छति सिंहो गच्छतीत्यादिनानाविधबोधः,

अत्र कल्पेऽनास्थासूचनाय वाकारः, एकोच्चारितादप्युभयबोधस्य मणिकारादिसम्मतत्वाद्, अत एव तात्पर्य्यसत्त्वे सकृदुच्चारितादपि शब्दादुभयबोधस्येष्टत्वादिति मणिकारेणोक्तम् ।

इति पुष्पवन्तपदटीका ।

पुष्पवन्तपदवत् सर्वनामपदानामपि शक्तेरैक्यान्न नानाऽर्थता,

अथ सर्व्वनामपदेन विशिष्य घटत्वपटत्वादिनैव बुद्धिस्था घटपटादयः प्रत्याय्यन्ते न तु बुद्धिस्थत्वेन; अत्र घटोऽस्ति तमानयेत्यादिवाक्यजघटकर्मकानयनादिबोधानन्तरं विशिष्यानयनं घटकर्म्मकं न वेति संशयानुत्पादस्य सर्वानुभवसिद्धतया दुरपन्हवत्वात्,

तथा च वक्तृबुद्धिस्थत्वं न सर्व्वनामशक्यताऽवच्छेदकम्; अपि तु घटत्वपटत्वाद्येव तादृशनानाधर्म्मावच्छिन्नेषु पुष्पवन्तादिपदवन्नैकशक्तिसम्भव एकैकधर्म्ममात्रप्रकारकतत्तदर्थबोधानुपपत्तेरिति सर्वनाम्नो नानाऽर्थत्वं दुर्व्वारमेव,

न वा नानाऽर्थतोपगमेऽपि निर्व्वाहः, यद्रूपावच्छिन्नविषयकान्य-

सर्व्वनाम्नां शक्तिं परीक्षितुकाम आदौ सिद्धान्ताप्रदर्शने आशङ्कैव नोदेत्यतस्तत्सिद्धान्तमाह-पुष्पवन्तपदवदिति ।

सर्व्वनामपदानां=तदेतदिदमादिपदानां, नानाऽर्थतेति । पृथक् पृथक्शक्त्या पृथक् पृथगर्थप्रतिपादकतेत्यर्थः ।

परीक्षामारभते-अथेत्यादि । बुद्धिस्थाः=पूर्व्वबुद्धिविषयाः, बुद्धिस्थत्वेन=बुद्धिस्थत्वप्रकारेण,

ननु तदादिपदजन्यबोधे घटत्वादेरेव प्रकारत्वं न तु बुद्धिस्थत्वस्येति कुतोऽवधार्य्यते ? इत्यत आह-अत्र घट इति ।

संशयानुत्पादस्येति । तमानयेति वाक्याद् यदि बुद्धिस्थकर्म्मकमानयनमिति बोधो जायते तदाऽऽनयनं घटकर्म्मकत्वाभाववदिति बुद्धेर्माघ्रताऽवच्छेदकबुद्धिस्थत्वेन आह्यघटादेरभावात्त्वगाहितया तादृशनिश्चयाप्रतिबध्यत्वेन तादृशसंशयोत्पत्तिः कुतो न स्यादिति भावः,

तथा चेति । बुद्धिस्थत्वस्य तादृशबोधे भाने चेत्यर्थः, बुद्धिस्थत्वमिति । तत्पदजन्यबोधप्रकारस्यैव तत्तत्पदशक्यताऽवच्छेदकत्वादिति भावः,

नैकशक्तिसम्भव इति । सकृदुच्चारितपुष्पवन्तपदाद् यथा चन्द्रसूर्य्योभयविषयकबोधः तथा न तदादिपदाद् अपि तु पृथक् पृथगुच्चारिततदादिपदात् प्रत्येकघटत्वपटत्वाद्यवच्छिन्नस्य बोध इत्यत एकशक्तिकत्वस्य वक्तुमशक्यत्वादिति हृदयम्,

ननु तदादिपदानां नानाऽर्थतयाभ्युपेया क्षतिविरहाद् ? इत्यत आह-न वेति । यद्रूपावच्छिन्नेति । यद्धर्म्मावच्छिन्ने यत्पदस्य वृद्धव्यवहारो-

वहारजनकत्वं येन पुंसा तदादिपदे न गृहीतं तदवच्छिन्ने तेन तच्छक्त्यग्रहेण प्रक्रान्तस्यापि तदवच्छिन्नस्य तत्पुरुषीयतदादिपदजन्यबोधविषयताऽनुपपत्तेः;

न च बुद्धिस्थत्वं प्रकारीभूतघटत्वादीनामेवानुगमकं तथा च बुद्धिप्रकारवांस्तत्पदशक्य इत्याकारक एव शक्तिग्रहः; स च तद्धर्म्मप्रकारेण सकलतद्धर्म्मविषयक एव सामान्यप्रत्यासत्त्या सम्भवतीति नापूर्व्वप्रकारेण बोधानुपपत्तिः;

सामान्यलक्षणाऽनभ्युपगमे तु शक्तिग्रहविशेष्यताऽवच्छेदकप्रका-

येन पुंसा दृश्यते तद्धर्म्मावच्छिन्ने तत्पदस्य तेन पुरुषेण शक्तिरवगम्यते, अनन्तरं तत्पदस्य तद्धर्म्मावच्छिन्ने शक्तिसम्बन्धग्रहेण तत्पदार्थः स्मर्य्यते, प्रतिपद्यते च तेन पुंसा तदर्थः,

एवञ्च यद्धर्म्मावच्छिन्ने येन यत्पदव्यवहारो न दृष्टस्तदवच्छिन्ने यत्पदस्य तस्य शक्तिग्रहो नाभूत् कुतस्तद्धर्म्मावच्छिन्नाभिप्रायेण प्रयुक्ताद् देवदत्तो गच्छति त पश्येत्यादौ तच्छब्दात् तस्य पुंसः तादृशदेवदत्तप्रतिपत्तिः ? शक्त्यग्रहेण तद्धर्म्मावच्छिन्नानुपस्थितत्वादिति भावः,

प्रक्रान्तस्यापि=वक्तृबुद्धिस्थस्यापि बुद्धिप्रकारत्वरूपानुगतधर्म्मेण पूर्वं चैत्रत्वादरूपि शक्तिग्रहाविषयत्वमुपपाद्य शाब्दबोधोपपादनमाशङ्कते—न चेति ।

शक्तिग्रह इति । वृद्धव्यवहारादिना जायत इति शेषः, स च तादृशशक्तिग्रहः सम्भवतीत्यनेनान्वितः, तद्धर्म्मप्रकारेण=बुद्धिप्रकारत्वरूपधर्म्मप्रकारेणेत्यर्थः, सामान्यप्रत्यासत्त्या=सामान्यलक्षणारूपप्रत्यासत्त्या, तथा च घटोऽस्ति तमानय पटोऽस्ति तमपसारयेत्यादिवक्तृबुद्धिस्थपरतत्पदघटितनानावृद्धव्यवहारतः सविधस्थस्य सामान्यतः पूर्वं बुद्धिप्रकारत्वेन घटत्वपटत्वादिकं विषयीकृत्य बुद्धिप्रकारवांस्तत्पदशक्य इति ग्रहो भवति, ततश्च तादृशप्रकारत्वज्ञानं सामान्यप्रत्यासत्तिः निखिलबुद्धिप्रकारत्वाश्रयघटत्वचैत्रत्वमैत्रत्वादिकं ग्राहयति, ततश्च बुद्धिप्रकारत्वेन निखिलघटत्वचैत्रत्वमैत्रत्वाद्यवच्छिन्ने तत्पदशक्यताज्ञानं मानसं सम्पद्यत इति भावः ।

सामान्यलक्षणाऽनभ्युपगन्तृमतेऽप्याह–सामान्येति । शक्तिग्रहेति । बुद्धिप्रकारवान् तत्पदशक्य इति शक्तिग्रहविशेष्यताऽवच्छेदको यः प्रका

दाश्रयस्यापूर्वधर्म्मिणः शक्तिग्रहाविषयत्वेऽपि शाब्दबोधे भानवत् शक्तिग्रहधर्म्मिताऽवच्छेदकताऽवच्छेदकानुगतरूपाश्रयस्यापूर्वधर्म्मस्यापि शक्तिग्रहविषयतां विना शाब्दबोधे न भानानुपपत्तिः, शक्तिधियः शाब्दज्ञानसमानविषयकत्वस्यातन्त्रत्वादिति वाच्यम् ?

बुद्धिस्थत्वस्य शक्यताऽवच्छेदकताऽनवच्छेदकत्वेन शक्यताऽवच्छेदकानुगमकत्वायोगात्, तदवच्छेदकत्वे च तस्यापि शाब्दबुद्धौ शक्यताऽवच्छेदकघटत्वादिविशेषणतया नियमतो भानप्रसङ्गात् स्वरूपतो घटत्वादिप्रकारकशाब्दबोधानिर्व्वाहात्, उपलक्षणेनापि शक्यताऽवच्छेदकानुगमे शक्यस्याप्युपलक्षणेनैवानुगमोऽस्तु किं विशिष्टशक्त्या ?

एतदाश्रयस्येत्यर्थः, अपूर्व्वधर्म्मिण इति । अत्र गृहे गौरस्ति तं ताडयेत्यादिवृद्धव्यवहारतो बुद्धिप्रकारगोत्वाद्यवच्छिन्ने गोव्यक्तिविशेषे शक्तिग्रहः; ततोऽपरगोव्यक्तिपदात् गौर्गावति तं पश्येत्यादिवाक्यघटकात् गोशब्दात् शक्तिसम्बन्धग्रहेण कारणेनानुभूतस्य गोपिण्डस्योपस्थितिः, ततश्च योग्यतावशेन गोत्वेन पूर्व्वागृहीता गोव्यक्तिरेव शाब्दबोधविषयो यथा भवति तद्वदत्र घटोऽस्ति तमानय पटोऽस्ति तं परिधेहीत्यादिवृद्धव्यवहारतो बुद्धिस्थत्वरूपघटत्वपटत्वाद्यनुगमकधर्म्मेण घटत्वपटत्वादिविशिष्टे तत्तच्छब्दस्य शक्तिग्रहात्, अत्र चैत्रोऽस्ति तं पश्येत्यादिवाक्यघटकेन पूर्व्वाननुभूतचैत्रत्वाद्यवच्छिन्नपरतापदेनाननुभूतचैत्रत्वाद्यवच्छिन्नस्य स्मरणासम्भवेऽप्यनुभूतघटत्वाद्यवच्छिन्नस्य स्मरणे सति योग्यतावशेनापूर्व्वचैत्रत्वाद्यवच्छिन्नस्य शाब्दबोधे भाने बाधकाभाव इति भावः ।

नन्वेवमव्यक्तौ शक्तिग्रहेणापरव्यक्तेः कुतः शाब्दबोधो; यत्र शक्तिग्रहस्तस्यैव शाब्दबोधनियमात्? इत्यत आह–शक्तिधिय इति । अतन्त्रत्वादिति । अनियमादित्यर्थः । शक्यताऽवच्छेदकानुगमकत्वायोगादिति । नानाशक्यताऽवच्छेदकनिष्ठशक्तिज्ञानीयविशेष्यतानिरूपितैकप्रकारत्वायोगादित्यर्थः, तदवच्छेदकत्वे च–शक्यताऽवच्छेदकताऽवच्छेदकत्वे चेत्यर्थः । उपलक्षणेनापीति । शक्यताऽवच्छेदकताऽनवच्छेदकेनापीत्यर्थः । उपलक्षणेनैवेति । शक्यताऽवच्छेदकताऽनापन्नेनैवेत्यर्थः, अनुगमोऽस्तु–नानाशक्यनिष्ठविशेष्यतानिरूपितगोत्वादिशक्यताऽवच्छेदकनिष्ठैकप्रकारता-

अथ द्रव्यादिपदाद् घटत्वादिप्रकारकबोधप्रसङ्गवारणाय विशिष्टे शक्तिरुपेयते प्रकृते च बुद्धिस्थत्वस्योपलक्षणत्वेऽपि तेनानुगमने न किञ्चिद्बाधकमिति चेद् ?

अस्तु बुद्धिस्थत्वेनानुगतधर्म्मेणाननुगतानां प्रकाराणां शक्तिधीविषयत्वं; तथाऽपि सर्व्वनाम्नां नानाऽर्थत्वं दुष्परिहरमेव, साक्षात्परम्परया वा यदवच्छेदकं तदैक्यादेवावच्छेद्यैक्याद् बुद्धिस्थत्वस्यातथात्वाद्, उपलक्षणैक्येन शक्यैक्ये हर्य्यादिपदशक्यताऽवच्छेदकानामप्युपलक्षणीभूतेनान्ततो बुद्धिविषयत्वादिनाऽनुगमसम्भवेन नानाऽर्थमात्रोच्छेदप्रसङ्गाद्,

एवं बुद्धिस्थप्रकारवान् तत्पदशक्य इत्याकारकशक्तिज्ञानात् स्वरूपतो घटत्वादिप्रकारकस्मरणशाब्दबोधौ न सम्भवतः; जातिमान् हस्तिपकसम्बन्धीत्यादिज्ञानात् स्वरूपतो हस्तित्वप्रकारकस्मर-

शालिशाब्दधीरसिद्धत्वाद्, किं=ऽयर्थम्, विशेषणे शक्तिर्निष्प्रयोजनेति यावद्,

ननु येषां पदानां विशेषणे शक्त्यकल्पने दोष स्यात्तथा विशेषणेऽपि शक्तिरस्तु यस्य च तत्र शक्त्यकल्पने न दोषस्तस्य तत्र कुत शक्ति कल्प्यते ? इत्याशङ्कते—अथेति ।

तत्स्वीकारमाह—अस्त्विति । अननुगताना घटत्वपटत्वादीनाम्, साक्षादवच्छेदक घटत्वादिक; परम्परयाऽवच्छेदक लाङ्गूलत्वादिकम्, अवच्छेद्यैक्य घटपदस्वभावादीना घटपशुपदादीनाञ्च प्रतियोगित्वशक्त्यार्थैक्यम्, अतथात्वात् साक्षात्परम्परया वाऽनवच्छेदकत्वाद्, अन्तत =इतरधर्म्माणामनुगमानुसन्धाने, नानाऽर्थमात्रोच्छेदप्रसङ्गइति । हर्य्यादिपदाना नानाशक्तिमत्तोच्छेदप्रसङ्ग इत्यर्थ,

ननु हर्य्यादिनानाऽर्थपदाना बुद्धिविषयत्वादेरनुपस्थितिकालेऽपि सूर्य्यादिशाब्दबोधोदयेन बुद्धिविषयत्वाद्युपलक्षितधर्म्मावच्छिन्न एकशक्तिकल्पना न सम्भवति तदादिसर्व्वनाम्नान्तु बुद्धिप्रकारत्वादेरनुपस्थितौ शाब्दबोधाजननस्य सर्व्वजनीनत्वेन तत्कल्पने बाधकाभाव ? अत आह—एवमिति ।

असम्भवप्रयोजक कारणाभाव दर्शयति—जातिमानिति । जातित्वावच्छिन्नहस्तित्वनिष्ठावच्छेदकताकविशेष्यतानिरूपितहस्तिपकसम्बन्ध-

णानुदयात् स्वरूपतस्तद्धर्म्मप्रकारेण यस्य सम्बन्धो गृहीतस्तादृश-सम्बन्धिज्ञानस्य कारणत्वात्,

यथा याभ्यां रूपाभ्यां धर्म्मिणोः सम्बन्धो गृहीतस्तदेक-तररूपप्रकारकसम्बन्धिज्ञानादेवापरतद्रूपेणैव सम्बन्ध्यन्तरस्मरण-मित्यनुभवस्तथा यादृशरूपाभ्यां धर्म्मिणोः सम्बन्धग्रहस्तादृशैकधर्म्म-प्रकारकज्ञानादेव तादृशापरधर्म्मप्रकारेण धर्म्मिस्मरणमित्यपि,

तथा च यत्र किञ्चिद्विशेषितधर्म्मप्रकारकसम्बन्धज्ञानं तत्राविशे-षिततद्धर्म्मप्रकारकस्मरणस्यानानुभविकतयेष्टापत्तेरयोगात्,

अन्यथा कदा चित् स्वरूपतस्तत्प्रकारिका कदा चिद्धर्म्मान्तरा-

प्रकारताकज्ञानादित्यर्थं, स्वरूपतो=जातित्वाद्यप्रकारेण तद्धर्म्मप्रकारेणेत्यनन्तर धर्म्मिणीति पूरणीयम्,

यस्येति । यद्धर्म्मावच्छिन्नस्येत्यर्थं, तथा च स्वरूपतस्तद्धर्म्मनिष्ठ-प्रकारताकधर्म्मिनिष्ठविशेष्यतानिरूपितयद्धर्म्मावच्छिन्नसम्बन्धप्रका-रताशालिज्ञानं जातमित्यर्थं, तादृशसम्बन्धिज्ञानस्येति । तद्धर्म्मप्रकारक-धर्म्मिविशेष्यकज्ञानस्येत्यर्थं,

याभ्यामिति । अविशेषितधर्म्मप्रकारेणेत्यर्थं तदेकतरेति । अविशे-षिततदेकतरधर्म्मनिष्ठप्रकारतानिरूपितविशेष्यताशालिज्ञानादित्यर्थं, स्व-रूपतो धर्म्मप्रकारकज्ञानजन्यानां स्वरूपतो धर्म्मपुरस्कारेण स्मरणाना-बाहुल्येन शीघ्रानुभावकतया दृष्टान्ततयोपन्यासः, यादृशरूपाभ्यामिति । किञ्चिद्धर्म्मविशेषितरूपाभ्यामित्यर्थं, धर्म्मिणोः=प्रतियोग्यनुयोगिनोः, तथा च तद्धर्म्मावच्छिन्नावच्छेदकताकप्रकारतानिरूपितसम्बन्धनिष्ठ-विशेष्यतावच्छिन्नप्रकारतानिरूपिततद्धर्म्मावच्छिन्नावच्छेदकताकविशे-ष्यताशालिज्ञानोत्तर तद्धर्म्मावच्छिन्नप्रकारताकज्ञानात्तद्धर्म्मावच्छिन्न-प्रकारताशालिस्मरणं जायत इत्यर्थं,

दण्डपुरुषस्य यद्यादृशरूपाभ्यां धर्म्मिणोः सम्बन्धग्रह तादृशैक-तरधर्म्मपुरस्कारेणापरतद्धर्म्मावच्छिन्ने सम्बन्धज्ञानादपि तद्धर्म्मप्रकारेण स्मरणम्, एव यादृशयद्रूपाभ्यामपि ज्ञेयम्,

तथा चेति । सम्बन्धज्ञानस्मरणयोरेकरूपावच्छिन्नविषयकत्वानुभवे-त्यर्थं, अन्यथेति । तद्धर्म्मान्यधर्म्मानवच्छिन्नतद्धर्म्मनिष्ठावच्छेदकताक-विशेष्यतानिरूपितसम्बन्धनिष्ठप्रकारताशालिज्ञानत्वेन तद्धर्म्मेतरध

वच्छिन्नतत्प्रकारिका स्मृतिरित्यत्र नियामकाभावप्रसङ्गात्,

सामान्यलक्षणामनङ्गीकुर्वतां पुनरनिष्कृतिरेव, शक्तिग्रहाविषयस्यापूर्वधर्मस्य स्वरूपतः कथमपि भानासम्भवाद्, न हि बुद्धिविषयताऽवच्छेदकत्वेन धर्म्मान्तरविषयकज्ञानं स्वरूपतोऽपरधर्मप्रकारकं ज्ञानं जनयितुं प्रभवति तथा सति समानप्रकारकत्वनियमस्यापि भङ्गप्रसङ्गादिति,

मैवम्-भगवत्सङ्केतरूपायां शक्तौ शक्यताऽवच्छेदकीभूतघटत्व-पटत्वादावुपलक्षणीभूतबुद्धिविषयताऽवच्छेदकत्वप्रकारेण भासमाने

र्म्मानवच्छिन्नतद्धर्म्मनिष्ठप्रकारताशालिस्मरणं प्रति कारणत्वकल्पनया तादृशनियमास्वीकारेणापत्तौ चेत्यर्थः,

नियामकाभावप्रसङ्गादिति। तथा च किञ्चिद्धर्म्मपुरस्कारेण तद्धर्म्मावच्छिन्नेऽपरसम्बन्धज्ञानादनियमेन तादृशाद्विविधस्मरणापत्तेरिति भावः,

सामान्यलक्षणाऽङ्गीकारे तु बुद्धिविषयताऽवच्छेदकत्वरूपसामान्यधर्म्मेण तदादिपदस्य प्रथमशक्तिग्रहात् पूर्वमपूर्वचैत्रत्वादिज्ञानसम्भवेन तादृशग्रहस्य तादृशचैत्रत्वादिप्रकारकत्वसम्भवादाह—सामान्यलक्षणामनङ्गीकुर्वतामिति। अनिष्कृतिरेव=अनुपपादनमेव,

नन्वत्र गृहे घटोऽस्ति तमानयेत्यादिवृद्धव्यवहारात प्रथमं तत्पदस्य बुद्धिविषयताऽवच्छेदकत्वेन घटत्वेन घटे शक्तिसम्बन्धग्रहो जातः पश्चादत्र चैत्रोऽस्ति त पश्येत्यादिवाक्यघटकापूर्वचैत्रत्वावच्छिन्नपरतत्पदस्यापि बुद्धिविषयताऽवच्छेदकत्वेन घटत्वावच्छिन्ने जायमानः शक्तिसम्बन्धग्रह एव स्वरूपतोऽपूर्वचैत्रत्वादिप्रकारकस्मरणं जनयेत्स एव हेतुहेतुमद्भावकल्पनादित्यत आह—न हीति। भङ्गप्रसङ्गादिति। स्मरणानुभवयोः समानप्रकारकत्वस्य सर्वानुसिद्धत्वेन तस्यापलपितुमशक्यत्वादिति भावः।

सिद्धान्तमारभते—मैवमिति। शक्तिसम्बन्धस्यातिरिक्तत्वे घटत्वपटत्वादिरूपशक्यताऽवच्छेदकभेदेन न तस्या ऐक्यसम्भव इत्यत आह—भगवदिति। सङ्केतेति। शक्तिपदार्थ इत्यर्थः, अत्र सप्तम्यौ विषयतानिरूपितत्वं तस्य च भासमाने भासत इत्युभयत्र भासधात्वर्थविषयतायामन्वयः, प्रकारेणेत्यत्र तृतीयाऽर्थः प्रकारतानिरूपितत्वं तस्य च भासमानपदतद्घटकीभूतभासधात्वर्थे विषयतायामन्वयः, घटत्वपटत्वादावित्यत्र विषये·

तद्यादिपदजन्यबोधविषयताऽवच्छेदकत्वं भासते,

एतच्च बुद्धिविषयताऽवच्छेदकरूपावच्छिन्नस्तत्पदाद्बोद्धव्य इत्याकारकस्य तत्पदं बुद्धिविषयताऽवच्छेदकरूपावच्छिन्नं बोधयत्वित्याकारकस्य वा संकेतस्य विषयताया अननुगतघटत्वपटत्वादिनिष्ठाया अप्यनुगतबुद्धिविषयताऽवच्छेदकत्वरूपावच्छिन्नतया शक्तेरैक्यम्,

घटपदादिसंकेतविषयतानां नानाघटादिव्यक्तिनिष्ठानां घटत्वाद्यनुगतधर्म्मावच्छिन्नत्वेन पश्वादिपदसंकेतविषयतानां प्रकारीभूतनानालोमादिव्यक्तिनिष्ठानां लोमत्वाद्यनुगतधर्म्मावच्छिन्नत्वेन तत्तत्पदशक्त्यैक्यवदननुगतसिंहत्वादिनिष्ठानां नानार्थहर्य्यादिपदसंकेतविषयतानामनुगतयत्किञ्चिद्धर्म्मावच्छिन्नत्वाभावाद्व न शक्तेरैक्यम्,

तत्रोपलक्षणीभूतकिञ्चिद्धर्मप्रकारेणाभासमानस्यैव सिंहत्वादेर्भगवत्संकेतरूपायां शक्तौ हर्य्यादिपदजन्यबोधविषयताऽवच्छेदकत्वं भासत इति न नानार्थमात्रोच्छेद इति,

---

भासमानेत्यन्तं विशेषणं, तदुत्तरसप्तम्या विषयत्वमर्थः, तस्य च निरूपितत्वसम्बन्धेन भासत इत्यत्र भासधात्वर्थेऽन्वयः, भासत इत्यत्राख्यातार्थं आश्रयत्वं विषयताऽवच्छेदकत्वमितिप्रथमान्तार्थेऽन्वेति, अत्रोपलक्षणत्वं पदजन्यशाब्दबोधीयविषयताऽवच्छेदकत्वावच्छिन्नशक्तिविषयताशून्यत्वम्,

तथा च भगवत्संकेतविषयतानिरूपिततादृशबुद्धिविषयताऽवच्छेदकत्वनिष्ठप्रकारतानिरूपितविषयताऽऽश्रयीभूत यद् घटत्वपटत्वादिकं तन्निष्ठविषयतानिरूपितविषयताऽऽश्रयतद्यादिपदजन्यबुद्धिविषयताऽवच्छेदकत्वमित्यन्वयबोध,

एवञ्च—घटत्वादाद्युपलक्षणीभूतबुद्धिविषयतयाऽवच्छेदकत्वावच्छिन्नशक्तिविषयत्वे च, घटत्वाद्यनुगतधर्मेण शक्यांशे विषयतैक्ये दृष्टान्तमुक्त्वाऽनुगतधर्मेण शक्यताऽवच्छेदकांशे विषयतैक्ये दृष्टान्तमाह—पश्वादित्यादि,

ननु भगवत्संकेतरूपायां शक्तौ पशुपदादिशक्यताऽवच्छेदकलोमाद्यंशे लोमत्वाद्यवगाहनेन तत्तत्पदजन्यशाब्दबोधेऽपि लोमत्वादेर्भानवत् शक्तौ तत्पदशक्यताऽवच्छेदकांशे बुद्धिविषयताऽवच्छेदकत्वस्य भाने

इयांस्तु विशेषः-तत्र घटत्वत्वोमत्वादिषु तत्तत्पदजन्यबोधविषयताऽवच्छेदकत्वं भासत इति तानि विशेषणान्युच्यन्ते; प्रकृते च बुद्धिविषयताऽवच्छेदकत्वे सर्व्वनामपदजन्यबोधविषयताऽवच्छेदकत्वं संकेतेन नावगम्यतेऽपि तु तादृशविषयतासामानाधिकरण्यमात्रमिति तदुपलक्षणमिति गीयते,

यद्यपि घटादिपदसङ्केतस्य घटत्वादिविशिष्टविषयकत्ववत् सर्व्वनामसङ्केतेन बुद्धिविषयताऽवच्छेदकत्वे बोधविषयताऽवच्छेदकत्वानवगाहनेऽपि सङ्केतस्य तद्विशिष्टविषयकत्वमक्षतमेवेति सङ्केतविषये तद्विशेषणमेव,

---

शाब्दबोधे तस्य कथमभानं न स्यात्? इत्यतस्तयोः शाब्दबोधे भानाभान प्रयोजकवैलक्षण्यमाह—

इयांस्तु विशेष इति। तत्रेति। शक्याविवित्यर्थः, विशेषणानीति। तथा च तत्पदजन्यबोधविषयताऽवच्छेदकत्वनिष्ठविषयतानिरूपितशक्तीयविषयताश्रयस्य साक्षात् परम्परया वा तत्पदशक्यविशेषणत्वं, सङ्केतीयतादृशविषयत्वस्यैव शाब्दबोधे प्रकारतया भानप्रयोजकत्वादिति भावः,

प्रकृते च=सर्व्वनामस्थले चेत्यर्थः, बुद्धिविषयताऽवच्छेदकत्व इति। अत्र विषयतानिरूपितत्वं सप्तम्यर्थः; तस्य चावगाह्यत इत्यत्रावगाहनार्थविषयतायामन्वयः, सङ्केतेनेत्यत्र निरूपकत्वरूपकर्तृत्वं तृतीयार्थः, अस्यापि तत्रान्वयः, अवगाह्यत इत्यत्र कर्माख्यातार्थाश्रयत्वस्यावच्छेदकत्वमित्यन्तप्रथमान्तार्थान्वितनञर्थाभावेऽन्वयः। तादृशविषयतासामानाधिकरण्यमात्रमिति। सर्व्वनामपदजन्यबोधविषयतासामानाधिकरण्यमित्यर्थः, अस्य चावगाह्यत इत्यनेनान्वयः, तदुपलक्षणं=धर्योपलक्षणम,

ननु तत्पदजन्यबोधविषयताऽवच्छेदकत्वेन सङ्केतविषयत्वरूपविशेषणत्वं शक्यविशेषणमिति व्यवहारप्रयोजकमेवास्तु, शाब्दबोधे प्रकारतया भानप्रयोजकन्तु यद्विशिष्टे सङ्केतस्तत्त्व,-

तच्च सङ्केतीयविशेष्यतानिरूपितवैशिष्ट्यरूपसम्बन्धावच्छिन्नविषयताकविषयत्वमेव,

यत्र बुद्धिविषयतावच्छेदकत्वे सर्व्वनामपदसंकेतीयतादृशविषयतायाः सत्त्वेन दुष्टो न तस्य शाब्दबोधप्रकारतया भानमित्याशङ्क्य—यदर्शति।

एवं शक्यविशेषणघटत्वादिनिष्ठे बोधविषयताऽवच्छेदकत्वरूपबोधविषयतानिष्ठसङ्केतविषयतानिरूपितविषयतारूपशक्यत्वे तदवच्छेदकमपि; तथाऽपि बोधविषयतया सङ्केतविषयत्वरूपशक्यतायास्तत्रासत्त्वेन शक्ये न तद्विशेषणं, शक्यव्यावर्त्तकशक्यस्यैव शक्यविशेषणत्वादिति तस्य शक्योपलक्षणतयाऽऽकाशपदजन्यशाब्दबोधे शब्दाश्रयत्वभानानियमवत् तदादिपदजन्यबोधे तदभाननिर्व्वाहः,

तर्ह्यजन्तु तदुपलक्षितघटत्वादिविषयकत्वेन तदविषयकघटत्वा-

ननु तर्हि घटत्वादेरपि बुद्धिविषयताऽवच्छेदकत्वस्य घटादौ साक्षात्त्वेन न कुतः? इत्यत उक्तम् आह—एवमिति । शक्यत्व इति । अत्र सप्तम्यर्थनिरूपितत्वस्यावच्छेदकपदार्थघटकावच्छेदकतायामन्वयः, तदिति । बुद्धिविषयताऽवच्छेदकत्वमित्यर्थकं, शक्यांशे शाब्दबोधीयविषयत्वेन सङ्केतविषयत्वरूपविशेषणत्वस्य शक्यविशेषणव्यवहारप्रयोजकतावत् शाब्दबोधप्रकारताप्रयोजकत्वाद् न तदापत्तिरिति समाधत्ते—तथाऽपीति ।

तेनेति । बुद्धिविषयताऽवच्छेदकत्व इत्यर्थः, न तद्विशेषणमिति । तद् = बुद्धिविषयताऽवच्छेदकत्वं, न विशेषणं शाब्दबोधप्रकारताप्रयोजकविशेषणत्वाभाववादित्यर्थः,

ननु शक्तौ शक्यांशे भासमानत्वे सति तदनुगमकस्यैव विशेषणत्वेन बुद्धिविषयताऽवच्छेदकत्वस्य कुतो न सर्व्वनामपदशक्यविशेषणत्वमत आह—शक्यव्यावर्त्तकशक्यस्यैवेति । शक्यव्यावर्त्तकत्वं शक्यानुगमकत्वं, तच्च नानाशक्यनिष्ठविशेष्यतानिरूपितैकप्रकारत्वं न त्वितरव्यवच्छेदकत्वं सर्व्वादिपदशक्यताऽवच्छेदकस्य सर्व्वत्वादेरितरव्यवच्छेदकत्वासम्भवात्, शक्यस्यैवेति । तत्तत्पदजन्यबोधविषयत्वेन संकेतविषयताऽऽश्रयस्यैवेत्यर्थः ।

शक्यविशेषणत्वादिति । तथा च शक्यानुगमकत्वे सति पदजन्यबोधविषयत्वेन सङ्केतीयविषयत्वस्यैव शक्यविशेषणतात्वमिति भावः,

शब्दाश्रयत्वभानानियमवदिति । आकाशपदस्य स्वरूपतः शक्त्यङ्गीकर्त्तॄणां मते शब्दाश्रयत्वस्योपलक्षणत्वादिति भावः, तदभाननिर्व्वाहः = बुद्धिविषयताऽवच्छेदकत्वाविषयत्वनिर्व्वाहः,

ननु शक्तौ बुद्धिविषयताऽवच्छेदकत्वस्योपलक्षणत्वं न तु विशेषणत्वमित्यत्र किं नियामकम्? इत्यत आह—तर्ह्यजन्त्विति । यथा यष्टिशिखि-

द्वितीयस्यापि सङ्केतविषयत्वं, घटादिपदसङ्केतस्य च घटत्वादिविशिष्टविषयकबोध एव विषय इति तज्जन्यबोधे तादृशधर्म्मभाननियमः, यथा यद्विशिष्टविशेष्यकबोधविषयत्वं संकेतविषयस्तच्छक्यताऽवच्छेदकतया व्यवह्रियते, तथा यद्विशिष्टप्रकारविशिष्टविशेष्यकबोधविषयत्वं तथा तच्छक्यताऽवच्छेदकताऽवच्छेदकमित्युच्यते प्रकृते च बुद्धिविषयताऽवच्छेदकत्वन्तथैवेति न तच्छक्यताऽवच्छेदकं न वा तदवच्छेदकं, जातित्वादिविशिष्टघटत्वाद्यवच्छिन्नस्य तदादिपदाधीनबोधे

शेष्यकबोधविषयत्वमिति तद्विशिष्टनिष्ठविशेष्यताऽऽत्मकविषयताप्रकारताकत्वमित्यर्थः,

स्वरूपतो घटत्वादिना घटादेः शाब्दबोधोपपादिकां तद्रूपेण तच्छब्दे शक्तिं व्युत्पाद्य; जातित्वादिकिञ्चिद्धर्म्मपुरस्कारेण घटत्वादिना घटादेः शाब्दबोधप्रयोजिकां शक्तिं व्युत्पादयति–जातित्वादिविशिष्टेति । अथ तत्पदजन्यजातित्वावच्छिन्नघटत्वनिष्ठप्रकारताकशाब्दबोधं प्रति तत्पदजन्यप्रकारताकविशेष्यत्वावच्छिन्नप्रकारतानिरूपिता या बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वनिष्ठसामानाधिकरण्यसम्बन्धावच्छिन्नावच्छेदकताकावच्छेदकतात्वावच्छिन्नावच्छेदकताकप्रकारतात्वावच्छिन्नावच्छेदकताकविषयतानिष्ठप्रकारताकजातिमत्त्वावच्छिन्नविशेष्यताशालिसङ्केतविषयकज्ञानत्वेन हेतुता वक्तव्या,

सङ्केताकारस्तु–जातिमान् तत्पदजन्यबोधीयबुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्म्मावच्छिन्नप्रकारताकविषयतावान् भवत्विति तु न वक्तुं शक्यते; यतो यत्र घटत्वत्वादिना घटत्वाद्यवच्छिन्नो वक्तृबुद्धिस्थस्तत्तात्पर्य्येणापि तच्छब्दप्रयोगस्तत्र घटत्ववान् तत्पदबोधीयबुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्म्मावच्छिन्नप्रकारताकविषयतावान् भवत्वित्याद्याकारेण सङ्केतो वाच्यः;

तथा च सङ्केतस्य नानात्वेन तस्य नानाऽर्थत्वापत्तिः, अपि तु तत्पदं बुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्म्मावच्छिन्नप्रकारताकविषयताशालिबोधजनकं भवत्वित्याकारो वाच्यः;

एवञ्च तत्पदं बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्म्मावच्छिन्ने शक्तमित्याकारकसङ्केतज्ञानात् कदाचिज्जातित्वेन घटत्वावच्छिन्नस्योपस्थितिः कदाचित् घटत्वत्वादिना घटत्वावच्छिन्नस्योप-

तु बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्मविशिष्टावच्छि-
न्नविषयकत्वावगाही सङ्केतः प्रयोजक इति तत्र जातित्वावच्छिन्नप-

---

स्थितिरिति क्वचिज्जातित्वादिना क्वचिद् घटत्वत्वादिना शाब्दबोध-
इति नियमस्यानुपपत्तिरिति चेद् ?

न—श्रोता पुरुषो यदा जातित्वादिना घटत्वावच्छिन्नो वक्तृबुद्धि-
विषय इति प्रकरणादिना ज्ञात्वा जातित्वविशिष्टावच्छिन्नस्तत्पदप्रतिपाद्य-
इति जातिविशिष्टे शक्तिं गृह्णाति तदा जातित्वेन घटत्वावच्छिन्नं—
प्रतिपद्यते,

यदा तु घटत्वत्वेन घटत्वावच्छिन्ने प्रकरणादिना वक्तृबुद्धिविष-
यत्वं गृह्णाति तदा तत्तुल्यरीत्या तद्रूपेण तत्र शक्तिमवधार्य तं शाब्दा-
द्बुध्यत इत्येवं शक्तिग्रहशाब्दबोधकल्पनेऽनुपपत्त्यभावाद्, एतच्चाग्रे
व्यञ्जयिष्यामः,

नन्वेवमपि सर्वनामपदाज् जातित्वादिना घटत्वावच्छिन्नशाब्द-
बोधोत्पत्तये बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्मविशि-
ष्टावच्छिन्ने पृथक् शक्तिकल्पने नानाऽर्थत्वापत्तिर्दुर्वारैवेति चेद् ?

अत्र केचित्—साक्षात्परम्परासाधारणबुद्धिविषयताऽवच्छेदकता-
त्वावच्छिन्नप्रतियोगिताकपर्याप्त्यधिकरणत्वेनोपलक्षणेन स्वरूपतो घ-
टत्वावच्छिन्ने जातित्वादिना च घटत्वाद्यवच्छिन्ने एकैव शक्तिः कल्प्य-
ते, जातित्वादिविशिष्टेत्यादिग्रन्थस्तु तद्रूपेणैकशक्तिग्रहपरः, अ-
न्यथा नित्यत्वे सत्यनेकसमवेतत्वरूपजातित्वस्य सखण्डतया बुद्धि-
विषयताऽवच्छेदकताऽवच्छेदकत्वेन तस्यानुगमासम्भवाद्, घट एक-
त्वानितिज्ञानीयविशेष्यताऽऽख्यविषयताऽवच्छेदकतात्वावच्छिन्नप्रति-
योगिताकपर्याप्त्यधिकरणत्वस्य स्वरूपतो घटत्वे जातिमानेकत्वा-
दित्यादिज्ञानीयविशेष्यतारूपविषयताऽवच्छेदकतात्वावच्छिन्नपर्याप्त्य-
धिकरणत्वस्य च जातित्वविशिष्टघटत्वादौ वृत्तेः,

अथ वा तत्तद्बुद्धिविषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताक-
पर्याप्तिसम्बन्धेन तादृशावच्छेदकतात्वावच्छिन्नवत्त्वस्य घटत्वादौ ता-
दृशजातित्वाद्यवच्छिन्ने च सत्त्वेन तादृशतादृशज्ञानमादाय तादृशता-
दृशतद्धर्मेऽनुगतोपलक्षिततत्तद्धर्मेणानुगतशक्यताऽवच्छेदकत्वस-
म्भव इत्याहुः,

अन्यास्तु बुद्धिविषयताऽवच्छेदकत्वेन घटत्वपटत्वचैत्रत्वादीनां बुद्धि-
विषयताऽवच्छेदकत्वेन स्वरूपत एकशक्यताऽवच्छेदकत्वम्, अतो न

टत्वादिनिष्ठप्रकारतेत्र विषय इति न जातिमानित्यादिबोधकाले घट इत्याकारकबोध.,

अथ किञ्चित्प्रकारेण भासमानधर्म्मस्यावच्छेदकत्वे भासमाने तद्विशिष्ट एव भासते न तदुपलक्षित इति नियमः, कथमन्यथा स्वरूपतो घटत्वावच्छिन्नाभावस्य न जातिमान्नास्तीत्याकारिका प्रतीतिः ?

एवञ्च बुद्धिविषयताऽवच्छेदकत्त्वोपलक्षिते कथं बोधविषयताऽव च्छेदकत्व सङ्केतेनावगाहनीयमिति चेद्‌ ?

न-अवच्छेदकताया अवच्छेद्याश्रयविशेषणताऽऽपन्नस्य संसर्ग-

तत्तद्धर्म्मभेदेन शक्तेर्भिन्नत्व समवेतत्वादिना जातित्वादिना च घटत्वादौ जातित्वादौ च बुद्धिविषयताऽवच्छेदकताऽवच्छेदकत्वेन तदवच्छेदकत्वेन च पृथक्‌शक्यताऽवच्छेदकत्व, सर्व्वनाम्नो नानाऽर्थता च स्वरूपत शक्यताऽवच्छेदकताऽवच्छेदकादिभेदेनप्यत एवेति प्राहु,

वस्तुतस्त्वनुगमघटितवक्ष्यमाणसिद्धान्तकल्पे सर्व्वसाधारणैकशक्तिकल्पनप्रकारो दर्शयिष्यत एवातोऽत्राशङ्कासमाधानाभ्यामलमिति ब्रूम,

न जातिमानिति। सङ्केतेन यादृशबोधोऽवगाह्यते तादृशबोध प्रति तादृशसङ्केतज्ञानस्य कारणत्वादिति भाव,

तदवच्छेदकताऽनापन्नेन धर्मेण भासमानेऽवच्छेदकत्वमङ्गीकर्त्तु न शक्यत इति शङ्कयते-अथ तद्विशिष्ट एवेति। विशेषणेऽवच्छेदकत्व भासत इति भाव, न जातिमान् नास्तीत्याकारिकेति। तथा च जातिमान् नास्तीत्याकारकप्रतीते स्वरूपतो घटत्वाद्यवच्छिन्नाभावविषयकत्वे घटशून्यपटवति देशे जातिमान्नास्तीति प्रतीत्यापत्तेरिति भाव,

यो धर्म्मो भासते येन तद्विशिष्ट हि भासते ।
तत्रावच्छेदकत्व वै न तु तेनोपलक्षित ॥
ससर्गविधया भाने नियमोऽय प्रकीर्त्तित ।
अन्यथा तत्पदाच्छक्तेर्मानमेव हि दुर्लभमिति-
कारिकोक्तदिशा सिद्धान्तमारभते—

अवच्छेदकताया इति। अवच्छेद्याश्रय =प्रतियोगित्वाद्याश्रय, तत्र विशेषण च तन्निष्ठविशेष्यताकप्रकारताऽऽश्रयत्व, तदापन्नस्य तदाश्रयस्य,

विषया भान एव तथा नियमाद्,

अन्यथा धूमव्यापकताऽवच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववानित्याकारकव्यापकताऽवच्छेदकत्वोपलक्षितवह्नित्वाद्यवच्छिन्नाभावप्रतीत्यनुपपत्तेः,

प्रकृते च तत्पदं बुद्धिस्थप्रकारावच्छिन्नविषयताकबोधं जन-

संसर्गविधया = तन्निरूपितसांसर्गिकविषयतया, अत्र च तृतीयाऽर्थोऽभेदस्तस्य च भाधात्वर्थविषयतायामन्वयः, तथा नियमादिति । तद्विशिष्टे हि भासत इति नियमादित्यर्थः,

अयमाशयः-घटो नास्तीत्यादिप्रतीतौ घटत्वावच्छिन्नप्रतियोगिताकस्वसम्बन्धेन घटादेरभावादौ भानेन तत्रावच्छेदकतायाः संसर्गविधया भानाद्; अवच्छेद्यप्रतियोगित्वाश्रये घटे घटत्वं विशेषणमेव, तथा च तत्र घटत्वादिकमवच्छेदकमेव न तूपलक्षणमिति,

ननु किञ्चिद्धर्मप्रकारेण भासमाने यत्रावच्छेदकत्वं भासते तद्विशिष्ट एव तदिति सामान्यनियम एवादरणीयो लाघवादित्यत आह बाधकमाह—अन्यथेति ।

अवच्छेदकतायाः संसर्गविधया भान एव तादृशनियम इत्यस्वीकार इत्यर्थः, धूमव्यापकताऽवच्छेदकेत्यादि । धूमाभावरूपव्याप्याभावानुमापकतादृशप्रतीत्यनुपपत्तेरित्यर्थः, तथा च तादृशानुमित्यनुत्पादप्रयोजकज्ञानस्यापह्नोतुमशक्यत्वादिति भावः,

न च तत्र धूमव्यापकताऽवच्छेदकत्वावच्छिन्नवह्नित्वनिष्ठावच्छेदताकप्रतियोगिताकाभाववत्ताज्ञानस्यैव व्याप्याभावानुमितिहेतुत्वमिति वाच्यम्?

तादृशरूपेण कारणत्वे व्यापकताऽवच्छेदकवन्नास्तीत्याकारकज्ञानस्यैव हेतुतया प्रमेयत्वादेरपि धूमव्यापकताऽवच्छेदकतया तद्वच्छिन्नाभावाप्रसिद्ध्या विशेषदर्शिनां तादृशज्ञानानुपपत्तेः,

न च धूमव्यापकताऽवच्छेदकत्ववह्नित्वत्वोभयधर्मावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावज्ञानत्वेन हेतुता; तथा च धूमव्यापकताऽवच्छेदकवह्नित्ववान्नास्तीत्याद्याकाराभावज्ञानस्यैव प्रसिद्धत्वान्न तद्दोष इति वाच्यम्?

तादृशरूपेण हेतुत्वे धूमव्यापकताऽवच्छेदकत्वादेरप्यभावप्रतियोगिताऽवच्छेदककोटिप्रविष्टस्य विषयतायाः कारणताऽवच्छेदक-

धीरित्याकारकोऽवच्छेद्यावच्छेदकभावप्रकारक एव सङ्केतोऽङ्गीकार्य्य इत्यनुपपत्तेरभावाद्, स्वरूपतो घटत्वादिप्रकारकस्मरणाद्युपयोगी शक्तिग्रहः स्वरूपतो घटत्वादिप्रकारक एव; यदा स्वरूपतो यद्धर्म्मप्रकारकज्ञानसामग्री तदैव स्वरूपतस्तद्धर्म्मप्रकारेण शक्तिं गृहीत्वा स्वरूपतस्तत्प्रकारेण धर्म्मिणं स्मरत्यनन्तरमनुभवति च; मानसे च शक्तिग्रहे न व्यवहारदर्शनादेरपेक्षा; अपि त्वसंसर्गाग्रहसहितोपस्थितेरेवेति, यद्धर्म्माऽवच्छिन्ने तदादिपदघटितवाक्याद् व्यवहारो न दृष्टस्तदवच्छिन्नस्यापि मानसशक्तिग्रहाद् बोधः सुघट एव,

---

घटकतया महागौरवापत्तेः, गुरुधर्मस्याभावप्रतियोगिताऽनवच्छेदकत्वे तादृशाभावाप्रसिद्धेश्च तादृशनियमस्य सङ्कोचकल्पनाया स्यावश्यकत्वाद्,

न चेदमप्रामाणिक ? येन रूपेण व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेनाभाववत्ताज्ञान हेतुरित्यादिना दीधितिकृता तथा लिखितत्वाद्,

एतच्चाभावसाध्यकस्थले व्यापकत्वविशिष्टवैशिष्ट्यानवगाहिज्ञानस्यापि कारणत्वमते उक्तं, तेन मतविशेषे धूमादिव्यापकताऽवच्छेदकत्वविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानस्यापि कारणत्वे न क्षतिरिति मन्तव्यम,

ननु स्वरूपतो घटत्वादिप्रकारकशक्तिग्रह कदा चित् कुतो जायत इत्यत आह—यदा स्वरूपत इति । घटोऽस्य वक्तुर्बुद्धिस्थ इत्याकारकश्रोतृज्ञानसामग्रीत्यर्थः । श्रोतेति कर्तृपदमध्याहार्य्यम् ,

अन्यत्र घटोऽस्ति समानयेत्यादिव्यवहारदर्शनादिना घटादौ तत्पदस्य शक्तिग्रहः सुघटोऽस्तु; यत्र व्यवहारो न दृष्टस्तत्र शक्तिग्रह कुतो जायत इत्यत आह—मानसे चेति । असंसर्गाग्रह सतीत्यादि । असंसर्गाग्रह = तद्धर्म्मावच्छिन्ने तत्पदशक्यत्वबाधनिश्चयाभाव , तत्सहिता या तत्पदशक्यत्वतत्पदार्थोपस्थितिस्तस्या इत्यर्थ, मानसशक्तिग्रहाद् = उपनयजन्यालौकिकमानसशक्तिग्रहात् ,

ननु बाधनिश्चयाभावसहकृततत्तद्विशेषणोपस्थित्या यदि विशिष्टशक्तिग्रहो जायते, तदा शक्तिविपरीतकोटेरपि बाधकाभावेनोपस्थितिसम्भवेन तत्तत्संशयो जायत एवेति कथं शक्तिनिर्णय इत्याशङ्कते-न चेति । बाधितस्य = शक्त्यादिविरहस्य,

न च व्यवहारदर्शनाद्यविषये मनसा शक्तिर्निर्णेतुं न शक्यते विपरीतकोटेरप्युपस्थितिमात्रेण मानसज्ञाने मानसम्भवादिति वाच्यम्?

उपस्थितस्यापि बाधितस्य दोषमन्तरेणाभानान्निश्चयस्याप्युपपत्तेः,

एवं सति कतिपयविषयेषु सर्व्वनामघटितवाक्याद् प्रयोज्यस्य प्रवृत्तिमुपलभमानः प्रवर्त्तकज्ञानविषयकतिपयविषये शक्तिं कल्पयन् बुद्धिविषयताऽवच्छेदकधर्म्मावच्छेदेन तत्पदशक्यत्वं सामान्यतोऽवधारयति,

एवञ्च चैत्रोऽस्य बुद्धिविषयताऽवच्छेदकधर्म्मवानिति यदा तेन गृह्यते तदानीमस्य चैत्रस्तत्पदवाच्यो न वेति सन्देहो नावतरितुमर्हति,

---

ननु लौकिकप्रत्यक्षादौ विषयस्य बाधितस्य भाने पित्तादिदोषापेक्षाऽस्तु यत्रालौकिकसन्निकर्षादिनैककोटिरपि निर्णेतुं न शक्या तत्र बाधिता कोटिरुपस्थितिबलाद् दोषमनपेक्ष्यैव भासताम्; अन्यथा धूमादौ वह्निव्यभिचारस्य च सन्देहः कदाऽपि न स्यात्, स्याच्च तर्कानुसरणस्य शास्त्रकाराणां युक्त्यन्तरप्रदर्शनस्य वैफल्यमिति तत्तद्विपरीतकोटेः स्वतो भान बाधकं दर्शयितुमाह—एवं सतीति ।

कतिपयविषयेष्विति । गोघटादिष्वित्यर्थः, सर्व्वनामघटितवाक्यतोऽत्र गृहे गौरस्ति तमानयेत्यादिवाक्यात्, प्रयोज्यस्य=नियोज्यपुरुषस्य, प्रवृत्तिं=गवानयनादिषु प्रवृत्तिम्, उपलभमानः=निश्चिन्वन्, समीपस्थपुरुष इति शेषः, कल्पयन्=अनुमिन्वन्, बुद्धिविषयताऽवच्छेदकधर्म्मावच्छेदेनेति ।

न च यदि प्रवर्त्तकज्ञानविषयकतिपयपदार्थे शक्तिज्ञानेन सामान्यतो बुद्धिविषयताऽवच्छेदकावच्छेदेन शक्यावधारणं जायते; तदा तुरीतन्तुप्रभृतिकतिपयद्रव्येषु पटादिजनकत्वदर्शनेन द्रव्यत्वावच्छेदेन पटादिजनकत्वं गृह्णीयादिति वाच्यम्?

यथा कतिपयदण्डेषु घटजनकत्वं दृष्ट्वा व्यभिचारदर्शनलाघवज्ञानादिसहकारेण दण्डत्वावच्छेदेन तदवधारयति तद्वदत्रापि तादृशज्ञानजनने बाधकाभावाद्; अन्यथा निखिलधर्म्मिज्ञानासम्भवेन प्रत्याद-

यादृशधर्म्मावच्छेदेन यदवधारितं तादृशधर्म्मनिश्चयस्य स्वसमानधर्म्मिताऽवच्छेदककतद्विरोधिकोटिभानविरोधित्वादिति सम्भवत्येवापूर्व्वविषयेऽपि मानसः शक्तिनिश्चयः,

अथैवमपि तत्पदे चैत्रत्वविशिष्टवाचकतासन्देहस्य दुरुच्छेदतया तत्पदाद्व्यवहारदर्शनाविषयचैत्रत्वावच्छिन्नविषयकशाब्दबोधो दुरुपपाद एव, तद्धर्म्मप्रकारकशाब्दबोधे तद्धर्म्मविशिष्टवाचकतानिश्चयस्य हेतुत्वाद्, अन्यथा गवादिपदादभ्रान्तस्य शक्त्या सास्नाऽऽदिमत्त्वप्रकारेण शाब्दबोधापत्तेरिति चेद् ?

न—तत्पदप्रयोजकबुद्धिप्रकारतया गृहीतघटत्वपटत्वादिविशिष्टे व्यवहारदर्शनात् तत्पदस्य शक्तिं गृहीत्वा; यद्यत्तत्पदं यादृशयादृशधर्म्मावच्छिन्नविषयकबुद्ध्या प्रयुज्यते तत्तत् तत्पदं तद्धर्म्मविशिष्टशक्तमिति सामान्यतो व्याप्तिमवधारयति,

---

वच्छेदेन वह्निमत्त्वादिज्ञानं कदाऽपि नोत्पद्येत, द्रव्यत्वाद्यवच्छेदेन घटादिजनकत्वग्रहस्तु व्यभिचारदर्शनेन न जायत इति,

ननु बुद्धिविषयताऽवच्छेदकावच्छेदेन तत्पदशक्यत्वनिश्चयसहकृतस्य चैत्रत्वावच्छिन्ने बुद्धिविषयताऽवच्छेदकत्वानिश्चयस्य विपरीतकोटिनिरासद्वारा सामान्यतश्चैत्रत्वावच्छिन्ने तत्पदशक्यत्वनिश्चायकत्वेऽपि तत्पदशक्यत्वं चैत्रत्वावच्छिन्नं किमन्यधर्म्मावच्छिन्नमिति सन्देहानिरासात् तत्पदे चैत्रत्वविशिष्टवाचकतासन्देहोदयेन तादृशनिश्चयाजननात् कुतस्तत्पदाच् चैत्रत्वविशिष्टस्य शाब्दबोध इत्याशङ्कते—अथैवमपीति । गवादिपदं सास्नाऽऽदिमत्त्वादिविशिष्टवाचकमिति भ्रमवतः सास्नाऽऽदिमत्त्वेन शाब्दबोधस्येष्टापत्तेराह—अभ्रान्तस्येति ।

सिद्धान्तसारमते—तत्तत्पदप्रयोजकेति । शक्तिं गृहीत्वेत्यन्तेन तत्तद्धर्मविशिष्टवाचकत्वस्य च परस्पर सहचारदर्शनं व्यभिचारादर्शनञ्च व्याप्तिग्राहकं पूर्वमस्तीति सूचितं, सामान्यतो व्याप्तिमवधारयतीति । सामान्यतो व्याप्त्यवधारणञ्च यत्र प्रकृतसाध्यसाधनयोः सहचाराद्यनिश्चयेन व्याप्तिग्रहासम्भवेऽपि तत्सजातीयसाध्यसाधनयोः सहचारदर्शनादिजन्यव्याप्तिनिश्चयः तादृशव्याप्तिनिश्चयसहितेन,

अथ वा सजातीयनानाहेतौ सजातीयनानासाध्यसहचारग्रहस्य प्रकृतहेतौ प्रकृतसाध्यव्याप्तिग्रहं प्रति स्वातन्त्र्येण हेतुताकल्पनात् प्रकृ

तदनन्तरञ्च प्रत्यक्षगृहीतचैत्रत्वादिविशिष्टविषयकबुद्धिप्रयोज्यत्वं प्रकरणादिना यत्र तत्पदे गृह्णाति तत्र पक्षे तादृशहेतुना चैत्रत्वविशिष्टवाचकत्वस्य प्रागसिद्धस्यापि पक्षधर्मताबलादनुमित्यात्मकनिश्चयेनावगाहनसम्भवान्न काऽप्यनुपपत्तिः,

---

तद्धेतोः पक्षधर्मतामात्रग्रहेण सजातीयसाध्यहेतुसहचारदर्शनजन्यव्याप्तिग्रहेण वा प्रकृतसाध्यानुमितिरिति भावः,

न च प्रकृतसाध्यव्याप्यहेतुनिश्चयासत्त्वेन कुतोऽनुमितिरिति चेद्?

न-व्यतिरेकिसाध्यकस्थले प्रतियोगितावच्छेदकावच्छिन्नव्यापकाभावनिश्चयस्येव तादृशज्ञानस्यापि स्वातन्त्र्येणैव हेतुत्वात्,

अन्यथा स्वकीयस्तनपानादिविषयककृतिसाध्यत्वज्ञानप्रवृत्त्योः सहचारदर्शनेन यो यत्र प्रवर्त्तते स तं कृतिसाध्यतया जानातीति सामान्यव्याप्तिमवधार्य; बालकस्य गवानयनादौ प्रवृत्तिदर्शनेन गवानयनादिविषयकप्रयोजकपुरुषीयकृतिसाध्यत्वज्ञानानुमित्यनुपपत्तेरनुपपत्तेश्च लिङ्गस्तदधीनकार्यत्वग्राहकज्ञानस्य,

ननु साधनसजातीये साध्यसजातीयव्याप्तिनिश्चयादेव यदि प्रकृतसाध्यानुमितिर्भवति तदा दीधितिकारस्य यो यदीययावद्विशेषाभाववान् इत्यादिना सामान्यव्याप्तिं प्रदर्श्यापि यत्वतत्त्वयोरननुगमादित्यनेन तद्दूषणस्यासङ्गत्यापत्तेः, यत्वतत्त्वयोरननुगमस्य तद्घटकत्वादिति चेद्?

न-यो यदीयेत्यादिवाक्यस्य प्रकृतसाध्यतत्सजातीयसाधारणाननुगतरूपेणैकव्याप्तिपरत्वमभिप्रेत्य प्रथमतो दूषणं प्रदर्श्य; तत उक्तरीत्या दोषासम्भवेनैकावच्छेदेनोपनेन दोषान्तरप्रदानात्, साजात्यञ्चात्र स्वसाध्यकानुमितिप्रयोजकोदाहरणघटकाद्विकपदवृत्ततापर्य्यविषयत्वेन, एवमन्यत्रापि यथायथं बोध्यम्,

तादृशहेतुनेति । चैत्रत्वादिविशिष्टविषयकबुद्धिप्रयोज्यतत्पदत्वहेतुनेत्यर्थः, चैत्रत्वविशिष्टवाचकत्वस्य अन्वयबोधीयचैत्रत्वनिष्ठनिरूपितप्रकारतावच्छेदकताकविषयतात्वावच्छिन्नप्रकारताकत्वकैकत्रीयविशेष्यतायाः परम्परया निरूपकत्वस्य, प्रागसिद्धस्यापि-प्रागननुभूतस्यापि,

तत्पदं बुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्मविशिष्टवाचकमिति वृद्धव्यवहारतो जायमाने शक्तिज्ञाने बुद्धिविषयताऽवच्छेदकत्वरूपसामान्यप्रत्यासत्त्या ज्ञायमानघटत्वचैत्रत्वादिनिखिलविषयकं भवति तच्च-

के चित्तु बुद्धिविषयताऽवच्छेदकत्वेनानुगतधर्म्मेण सकलधर्म्मविषयकसंस्कारस्य सामान्यप्रत्यासत्त्यधीनानुभवजन्यस्य सत्त्वे प्रमुष्टबुद्धिविषयताऽवच्छेदकतांशं स्वरूपतश्चैत्रत्वादिप्रकारकशक्तिस्मरणनिराबाधमिति; तन्मूलकमेव स्वरूपतोऽपूर्व्वचैत्रत्वादिप्रकारकशाब्दज्ञानं भविष्यतीति किमनुपपन्नं ? स्वरूपतस्तत्प्रकारकस्मरणे स्वरूपतस्तत्प्रकारकसंस्कारानुभवयोरनपेक्षणाद् , उद्बोधकवैचित्र्यादेव कदा चिज्जातिमान् इत्याकारकं कदा चिद् घट इत्याकारकं स्मरणमिति नियमोपपत्तेः, स्वरूपतो घटत्वादिप्रकारकानुभवजनितसंस्कारवतोऽपि जातित्वादिना घटत्वादिप्रकारकात् संस्कारात् कदा चित् स्वरूपतो घटत्वाद्यप्रकारकस्य जातिमानित्याकारकस्मरणोदयेन स्वरूपतस्तत्प्रकारिकायां स्मृतौ तादृशसंस्कारानुभवयोर्विशिष्य हेतुत्वेऽप्युद्बोधकविशेषविरहस्य तादृशस्मृतिविरहप्रयोजकताया आवश्यकत्वात्,

---

न्यसंस्कारोऽपि तथा, तदधीनस्मरणञ्च बुद्धिविषयताऽवच्छेदकत्वान वगाहि तत्पदं चैत्रत्वादिविशिष्टवाचकमित्याद्याकारकं जायते तदृशा उद्बोधकाभावात् , फलबलेन च तत्तद्विषयकसंस्कारस्यापि तत्तदृशा उद्बोधकाभावसहकारेण तत्तद्विषयकस्मरणं प्रत्यपि हेतुत्वकल्पनादिति वदतां केषाञ्चिन्मतमाह—के चित्त्विति ।

प्रमुष्टबुद्धिविषयताऽवच्छेदकतांश = प्रमुष्ट स्वत स्वाविषयकबुद्धिविषयताऽवच्छेदकतांशमिति यावद्, अनवगाहदिति । तथा च जातित्वे तरधर्म्मानवच्छिन्नघटत्वनिष्ठप्रकारताकविशेष्यताशालि स्मरणादिकं प्रति जातित्वावच्छिन्नघटत्वनिष्ठप्रकारताकविशेष्यताशालिसंस्कारत्वेन तादृशविषयताऽऽदिशालिनुभवत्वेन च कारणत्वमिति भावः ।

नन्वेवं सति जातित्वेन घटत्वप्रकारकसंस्काराज् जातित्वेन घटत्वप्रकारकं स्वरूपतो घटत्वप्रकारकञ्च स्मरणं नियतं स्यादत आह—उद्बोधकवैचित्र्यादेवेति । उद्बोधकवैलक्षण्यादेवेत्यर्थः, तथा च यदा जातित्वेन स्मरणप्रयोजकम् उद्बोधकं सम्भवति तदा तद्रूपेण स्मरणं, यदा स्वरूपतो घटत्वप्रकारकस्मरणप्रयोजकमुद्बोधकं तदा तादृशं स्मरणमिति नियमो नेत्यर्थः , स्वरूपतस्तत्प्रकारकस्मरणं प्रति स्वरूपतस्तत्प्रकारकसंस्कारानुभवयोः कारणत्वेऽप्युद्बोधकस्य नियामकत्वमावश्यकं, न तु सम्भव एवत्याह—स्वरूपत इति । आवश्यकत्वादिति । उद्बोधकविशेष-

तादृशहेतुताया अप्रामाणिकत्वात्,

कथमन्यथा विशेषणान्तरानवच्छिन्नाऽस्मदाद्यदृष्टशरीरविशेषनिष्ठजातिविशेषावच्छिन्नसङ्केतितरामरावणादिपदेभ्यो वाक्यार्थधीरस्माकं—

कथं वा निर्विशेषणकातीन्द्रियजातिविशेषावच्छिन्नवाचकमनःपदात् शाब्दधीस्तत्र जातित्वादिना जातिविशिष्टे शक्तिग्रहेण प्रसुप्तजातित्वांशे मनस्त्वादिप्रकारकं शक्तिस्मरणं तत्रापि विशेषणांशमोषमन्तरेण गत्यन्तराभावादिति वदन्ति,

विवदन्तेऽप्यत्र बहवः-स्मृतेर्विलक्षणप्रकारतायां संस्कारानुभवयोः प्रयोजकत्वस्योद्बोधकविशेषप्रयोजकतामाश्रित्योच्छेदने वि-

---

विरहस्य स्मृतिविशेषविरहाप्रयोजकत्वे युगपदेव स्वरूपतो घटत्वप्रकारकस्मृतिः, जातित्वादिना च घटत्वप्रकारकस्मृतिश्चोपपद्येतोभयसामग्रीसत्त्वादिति भावः,

अत एव प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावाद् युगपदस्मरणमिति न्यायसूत्रेण तथैवोक्तं, प्रणिधानादिकन्त्वनुपदं व्याख्यास्यामः, तादृशहेतुताया इति । स्मृतिसंस्कारयोर्विशेष्यहेतुताया इत्यर्थः, किञ्चिद्धर्मपुरस्कारेण तद्धर्मप्रकारकसंस्कारात् स्वरूपतस्तद्धर्मप्रकारकस्मरणास्वीकारे दृष्टमुख्याद्यवच्छिन्नशरीरवृत्तिजातिविशेषावच्छिन्नवाचकरामरावणादिपदेभ्यः स्वरूपतस्तादृशजात्यवच्छिन्नस्यास्मदाद्यननुभूतत्वेन शक्तिग्रहासम्भवात् स्मरणासम्भवेन शाब्दबोधानुदयः स्यादित्याह—कथमन्यथेति । कथेति । रामरावणमनःपदादित्यर्थः, जातित्वादिनेति । शक्तिग्रहेण स्वरूपतः स्मरणद्वारा शक्तिग्रहप्रयोजकतादृशसंस्कारेणेत्यर्थः, तथा च जातित्वावच्छिन्नजातिनिष्ठप्रकारताकेन शक्तिग्राहकसंस्कारेणेत्यर्थः,

एतेन रामादिपदानां जातित्वेन तादृशजात्यवच्छिन्नशक्तिग्राहकाभावात्तादृशशक्तिग्रहासम्भवेऽपि न क्षतिः,

अयम्भावः—जातित्वादिना यत्किञ्चिद्घटत्वादिप्रत्यक्षानन्तरं सामान्यप्रत्यासत्त्या निखिलजातिमद्विषयकानुभवेनोपनयेन जातिविशिष्टानुभवजनिततादृशसंस्कारात् प्रसुप्तजातित्वांशो रामरावणादिशरीरवृत्तिजातिपुरस्कारेण तादृशजातिमद्विषयकः स्मरणात्मकस्तत्पुराण-

शेष्यविशेषणभावांशेऽप्युद्बोधकविशेषस्यैव नियामकत्वसम्भवात्, प्रकारत्वविशेष्यत्वानन्तर्भावेण सामान्यतस्तद्विषयकस्मृतौ तद्विषयकत्वेनैव संस्कारानुभवयोर्हेतुताऽऽपत्तेः, रावणादिपदेभ्यः लक्षणया तत्तत्पदार्थत्वादिप्रकारक एवान्वयबोधः,

वस्तुतस्तु– अनुगतोद्बोधकस्थले स्वरूपतस्तत्प्रकारकशक्तिज्ञान-

कोशादिभ्यः स्वरूपतस्तादृशजात्यवच्छिन्ने शक्तिग्रहो जायते, तदनन्तरं तादृशशक्तिग्रहवशात् स्वरूपतस्तादृशजात्यवच्छिन्नस्य स्मरणं शाब्दबोधश्च भवतीति,

स्वरूपतस्तद्धर्मप्रकारकस्मृतौ स्वरूपतस्तद्धर्मप्रकारकसंस्कारत्वेन हेतुत्वेऽपि रामरावणादिपदेभ्यः शाब्दबोधमुपपादयति–रावणादीति।

न च रावणादिपदानां शक्तिग्रहे शक्यसम्बन्धरूपलक्षणाया ग्रहासम्भवात् कथं तत्तत्पदार्थत्वादिना शाब्दबोध इति वाच्यम्?

यत् पदं साधु पूर्वपूर्ववृद्धैः प्रयुक्तं तत्पदं किञ्चिद्वाचकमिति सामान्यव्याप्त्या तत्तत्पदशक्यत्वग्रहसम्भवात् लक्षणाग्रहे शक्यताऽवच्छेदकावगाहनस्यानपेक्षणादिति भावः,

केचित्तु इदानीन्तनपुरुषे शक्तस्य रामादिपदस्य लक्षणया तादृशबोधो भवतीत्याहुः,

तदसत्–रावणदशास्यादिपदस्येदानीन्तनपुरुषे शक्तिग्रहो न यस्य पुरुषस्य जातस्तस्यापि तादृशपदात् पुराणादितः शाब्दबोधजननात्,

ननु सामान्यतस्तद्विषयकस्मृतित्वावच्छिन्नं प्रति तद्विषयकसंस्कारत्वेन हेतुत्वे घटवद् भूतलमित्यनुभवजन्यतादृशसंस्काराद् घटो भूतले चेत्याकारकस्मरणापत्तेरनुपपत्तिश्च तादृशविशिष्टस्मरणस्य, प्रकारतादेः प्रयोजकस्याभावात्, तत्तदुद्बोधकानां तादृशतादृशविशिष्टस्मरणजनकत्वेऽनुभवसंस्कारयोः स्मृतित्वावच्छिन्नं प्रति कारणत्वानुपपत्तितो विशिष्टस्मरणप्रयोजकत्वेऽपि विशिष्टसंस्कारस्य हेतुत्वमावश्यकमित्यालोच्याह–वस्तुतस्त्विति। अनुगतोद्बोधकेति। अनुगतोद्बोधकश्च सुस्मूर्षितविषयज्ञानविषयादिधर्मिकसादृश्यज्ञानादि, व्यक्तश्चैतत् प्रणिधाननियम्यधारणासेत्यादिग्रन्थे, तत्र च तत्तदर्थविषयकस्मरणं प्रति सुस्मूर्षिततत्तदर्थविषयकज्ञानत्वेन तादृशसादृश्यज्ञानादेरनुगतरूपेण हेतुतया तादृशस्थले उद्बोधकैक्यज्ञाने बोधस्य कस्यापि तु मनः कल्प्यमिति भावः, स्पष्ट इति। जातित्वादिना गोत्वावच्छिन्ने शक्तिग्रहस्-

सत्त्वे स्वरूपतस्तत्प्रकारकस्मरणापत्त्या तत्र तादृशज्ञानस्य हेतुत्वमावश्यकमित्यलमतिपल्लवितेन,

अथ सामान्यतो वक्तृबुद्धिविषयताऽवच्छेदकधर्म्मावच्छिन्नस्य सर्व्वनामशक्यत्वे शक्तिभ्रमं विना कालान्तरीणपुरुषान्तरीण—बुद्धिविषयताऽवच्छेदकत्वधर्म्मावच्छिन्नविषयिका प्रतीतिः सर्व्वनाम्ना न जन्यते;

अपि तु यो यदा यस्य बुद्धिस्थस्तदा तदुच्चरितपदात्तत्प्रकारावच्छिन्नविषयिकैवेति नियमानुपपत्तिः, स्वोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकावच्छिन्नस्य शक्तिविषयत्वे च स्वपदस्य तत्तद्व्यक्तिपरतया तत्तत्पदव्यक्तिभेदेन शक्तिभेदप्रसङ्गः, अननुगमाद्व्युत्पत्तिविरोधश्च ।

एवं युष्मदस्मत्पदयोरात्ममात्रे न शक्तिः; अपि तु सम्बोध्योच्चारणकर्त्रोरेव, सम्बोध्यताऽवच्छेदकत्वोच्चारयितृताऽवच्छेदकत्वरूपानुगतधर्म्मोपलक्षितचैत्रात्मत्वादिकमेव प्रवृत्तिनिमित्तमित्यप्यसङ्गतं, सामान्यतः सम्बोध्यताऽवच्छेदकत्वादेरनुगमकत्वे चैत्रस्य

स्वे, स्वरूपत इति । किञ्चिदविशेष्यतयेत्यर्थः,

व्युत्पत्तिविरोधश्चेति । सर्व्वनाम्न एका शक्तिरिति व्युत्पत्तिविरोधश्चेत्यर्थः, तथा च पूर्व्वाननुभूतचैत्रत्वादिप्रकारकशाब्दबोधानुपपत्तिरिति ध्येयम् ।

युष्मदस्मत्पदयोरप्यनुगतशक्यताऽवच्छेदकं विदर्शयितुमीषत्तावदेव तत्पदद्वयं धारयति—एवं युष्मदिति । आत्ममात्र इति । तयोरात्ममात्रशक्यत्वे त्वं गच्छेः; अहं न गच्छेयमिति विधिनिषेधयोरनुपपत्तिः, उद्देश्यताऽवच्छेदकस्यात्मत्वस्यैक्यात्, आत्मत्वसामानाधिकरण्येनोभयान्वयसमर्थने त्वं गच्छसीति निश्चयकाले त्वं न गच्छसीति प्रतीत्यापत्तेरिति भावः, सम्बोध्येति । वक्तृघटितवाक्यजन्यबोधावच्छेदकताऽवच्छेदकत्वेन वक्त्रभिप्रायविषयताऽवच्छेदकत्वोपलक्षितजात्यवच्छिन्नशरीरविशिष्टात्मत्वम्, उच्चारणानुकूलकृत्यवच्छेदकताऽवच्छेदकत्वोपलक्षितजातिमच्छरीरावच्छिन्नात्मत्वञ्च तयोः शक्यताऽवच्छेदकमित्यर्थः, चैत्रात्मत्वादिकमेवेति । चैत्रमैत्रतत्तच्छरीरविशेषाव-

यत्पदसम्बोध्यता तस्माद् युष्मत्पदाद् पदान्तरसम्बोध्यमैत्रादेश्चोच्चारितादस्मत्पदाद् पदान्तरोच्चारयितुश्च मैत्रादेः प्रतीतिप्रसङ्गो दुर्वार इति,

स्वजन्यबोधाश्रयतया प्रयोक्त्रभिप्रायविषयताऽवच्छेदकत्वरूपस्य सम्बोध्यताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य; स्वोच्चारणकर्तृत्वावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने चास्मत्पदस्य शक्तेः स्वीकरणीयतया स्वत्वान्तर्भावेणाननुगमतादवस्थ्यादिति चेद् ?

न-स्वोच्चारणानुकूलबुद्धिप्रकारावच्छिन्नविषयताकत्वस्वजन्यत्वोभयसम्बन्धेन तदादिसर्वनामपदप्रकारको बोधविषयकसङ्केतोऽभ्युपेयते,

---

च्छिन्नात्मत्वमेवेत्यर्थः, सम्बोध्येति । तथा वाक्यजन्यबोधाश्रयत्वेन, मैत्रादेरिति । अत्र यद्यप्यर्थो विषयित्वं तस्य च प्रतीतिप्रसङ्ग इत्यत्र प्रतीतावन्वयः, स्वजन्येति । स्वपदं युष्मच्छब्दपरं, स्वोच्चारणेति । स्वपदमस्मच्छब्दपदपरं, स्वोच्चारणेति । स्वपदं तच्छब्दपरम्, उच्चारणञ्च वर्णादिध्वनकत्वधीनो जनकताबदभिधानसंयोगानुकूलो व्यापारः, शब्दमुच्चरतीत्यादौ द्वितीयार्थो निरूपितत्वं तस्य च तादृशव्यापारघटकजनकतायामन्वयः, तथा च स्वोच्चारणानुकूला या बुद्धिस्तदीयप्रकारतावच्छेदकधर्मावच्छिन्नविषयकत्वमेकः सम्बन्धः, जन्यत्वञ्चापरः,

न चात्र घटोऽस्ति तमानयेत्यादौ प्रथमं घटादिकं बुद्धिविषयीकृत्य तच्छब्दप्रयोगेऽपि; तदुच्चारणप्रयोजकस्य बुद्धेः घटज्ञानादौ सत्त्वात इति वाच्यम् ?

सुबोधयिषयाऽधीनवाक्योच्चारणं प्रति वाक्यार्थज्ञानस्य हेतुतया तत्सम्पादकतया घटज्ञानस्य तदुच्चारणप्रयोजकत्वापदवक्तव्यादिति,

तदादीति । आदिना त्वच्छब्दपरिग्रहः, अभ्युपेयत इति । उक्तोभयसम्बन्धेन तत्पदवान् बोधविषयकत्वाकारको भगवत. सङ्केत स्वीक्रियते तत्स्वतन्त्रविरहादिति भावः,

ननु तादृशसङ्केतविषयकं तादृशाकारं ज्ञानं तत्पदजन्यशाब्दबोधे हेतुरिति चेद् ?

अत्र मन्यत-स्वजन्यजन्यत्वविशिष्टविषयतावत्त्वोभयसम्बन्धेन तत्पदवान् बोधो भवत्विति तादृशसङ्केत ईश्वरीयः स्वीकार्यः, तत्र तत्पदं, स्व-

वैशिष्ट्यञ्च स्वोच्चारणप्रयोजकबोधीयप्रकारतासमानाधिकरणनिरवच्छिन्नावच्छेदकताकत्वस्वोच्चारणप्रयोजकबुद्धिविषयवृत्तित्वोभयसम्बन्धेन,

एवञ्च तत्पदजन्यबुद्धिप्रकारत्वसमानाधिकरणनिरवच्छिन्नप्रकारताकविशेष्यताशालिशाब्दं प्रति स्वनिष्ठप्रकारताकबोधत्वावच्छिन्नसङ्केतीयविशेष्यतानिरूपिततादृशोभयत्वावच्छिन्नसंसर्गतानिरूपितवैशिष्ट्यनिष्ठसांसर्गिकविषयतानिरूपितोभयत्वावच्छिन्नसांसर्गिकविषयताकनिष्ठत्वनिष्ठसांसर्गिकविषयताका या निरूपितत्वसम्बन्धावच्छिन्नविषयता तादृशविषयतासम्बन्धेन तत्पदवान् बुद्धिप्रकारावच्छिन्नपदादृशसङ्केतज्ञानं हेतुः,

एवम् उक्तसङ्केतीयसांसर्गिकविषयतावत्त्वमेव पदार्थत्वम्, इतरपदार्थान्वयबोधं प्रत्यपि सङ्केतीयतादृशविषयताज्ञानं प्रयोजकमिति,

ननु यत्र दोहनयोग्यगवीबुद्ध्या तामानयेति वाक्यं प्रयुक्तवान्; तत्र तच्छब्दस्य शुक्लगोत्वविशिष्टे शक्तत्वज्ञानस्य भ्रमत्वं मा भूत् शक्तिभ्रमाधीनतज्जन्यशुक्लगोत्वप्रकारकशाब्दीयतत्पदजन्यत्वतत्पदोच्चारणानुकूलबुद्धिप्रकारकताऽऽश्रयगोत्वावच्छिन्नविषयतावत्त्वस्य च सत्त्वादिति,

न च स्वजन्यत्वस्वोच्चारणानुकूलबुद्धिप्रकारतास्वपर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविषयतावत्त्वोभयसम्बन्धेन पदप्रकारकबोधविषयकसङ्केतस्यैव प्रयोजकता; तथा च दोहनयोग्यगवीबुद्ध्या प्रयुक्तस्य तच्छब्दस्यैवोच्चारणप्रयोजकज्ञानीयप्रकारतायाः पर्याप्तिश्च दोहनयोग्यत्वे गोत्वे च वर्त्तते; अतः शुक्लगोत्वे तत्पर्याप्त्यधिकरणत्वेन सङ्केतावगाहिज्ञानस्य भ्रमत्वमेवेति वाच्यम् ?

प्रकारतायां व्यासज्यवृत्तित्वाभावेन पर्याप्तिसम्बन्धे मानाभावात्, द्वित्वादेस्तु सर्वेऽयमेको न द्वावित्यादिविलक्षणप्रतीतेर्मानत्वादिति चेत् ?

न-स्वोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयतावत्त्वघटितसम्बन्धस्य विलक्षणत्वात् अवच्छेदकतायाः पर्याप्तिस्तु बहुतरासामञ्जस्यभयेन ग्रन्थकारादिभिः स्वीकारात्,

न चैवमपि यत्र घट इतिमाभबुद्ध्या पकमः तत्शब्दः प्रयुक्तस्तत्र तादृशज्ञानीयविषयताऽवच्छेदकत्वविरहेण तादृशनिवेशो न सम्भवतीति वाच्यम् ?

विशेष्यतायाः प्रकारावच्छिन्नत्वमते तत्र घटनिष्ठविशेष्यताया-

तत्र च स्वपदार्थस्य सम्बन्धाघटकतया तत्तत्पदव्यक्तित्वेन पदानां न विषयता; अपि तु तत्तत्पदत्वादिरूपानुपूर्वीविशेषप्रकारेणैवेति न पदव्यक्तिभेदेन शक्तिभेदः,

---

घटत्वेऽवच्छेदकत्वसत्त्वात्,

वस्तुतस्तु घट इत्याद्याकारकमात्रज्ञानेन न तच्छब्दः प्रयुज्यते, अपि तु घटादिनाऽमुमर्थं साधयामीत्यादिकं मनसि कृत्वैव, तथा च तादृशघटत्वविशिष्टवैशिष्ट्यावगाहिज्ञानीयविषयताऽवच्छेदकत्वसत्त्वेनानुपपत्त्यभावात्,

नन्वेवमपि स्वोच्चारणानुकूलेत्यादिसम्बन्धे स्वत्वस्य परिचायकत्वेन सामान्यत उच्चारणानुकूलज्ञानीयविषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यधिकरणत्वं न घटत्वेऽपि तु घटत्वमठत्वादावपि घटादिकं प्रकम्प्यापि तच्छब्दप्रयोगात्; तथा च कथं तच्छब्देन घटादिमात्रबोध इति चेत् ?

मैवं–सामान्यतो ज्ञानीयविषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकाया घटत्वादिसमुदायनिष्ठैकपर्याप्तेरसत्त्वेन यत्किञ्चिद्विषयताऽवच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्तेरेव संसर्गघटकत्वात् यत्किञ्चिद्घटद्वयवति सामान्यतो घटद्वयवानिति प्रतीत्या द्वित्वप्रतियोगिकपर्याप्तिरिव साक्षात्परम्परासाधारणावच्छेदकताया निरूपकत्वस्वीकारेण यत्र दण्डत्वादितात्पर्येण तच्छब्दप्रयोगस्तत्र तस्य न शक्तिभेदः,

अन्यथा स्वोच्चारणानुकूलबोधविषयताऽवच्छेदकताऽवच्छेदकावच्छिन्नावच्छेदकताकविषयताऽऽदिघटितसम्बन्धेन वैशिष्ट्यं निवेश्य भिन्नभिन्नशक्त्यैकल्पनतया नानाऽर्थताऽऽपत्तिः,

ननु स्वोच्चारणेत्यादौ स्वत्वस्य तत्तद्व्यक्तित्वातिरिक्तस्य दुर्वचत्वेन तत्तद्व्यक्तित्वस्य सम्बन्धघटकत्वेऽननुगमतादवस्थ्यमित्यत आह–स्वपदार्थस्येति ।

तथा चोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकावच्छिन्नविषयतावच्छेदकत्वोभयस्यैव संसर्गत्वं, अन्यान्यत्र स्वनिष्ठान्यपर्याप्तिस्वरूपत्वे सति स्वाश्रयाहितोच्चारणकत्व तत्रापि स्वत्वस्य परिचायकत्वेन नाननुगमः, अतिरिक्तं वेति ध्येयम् ,

अन्यत्र तादृशसम्बन्धेऽननुगमत्वेऽपि साधकत्वहेतोः यदि तत्तद्·

सामान्यतस्तत्पदत्वादिरूपानुपूर्वीविशेषावच्छेदेनैवोभयसम्बन्धावच्छिन्नबोधविषयतानिरूपितसङ्केतप्रकारता प्राप्नोति न व्युत्पत्त्यनुपपत्तिः,

कालान्तरीणपुरुषान्तरीणबुद्धिश्च नेदानीन्तनैतत्पुरुषीयतत्पदादिपदोच्चारणानुकूलेति; तद्विषयताऽवच्छेदकावच्छिन्नबोधे नोपदर्शितोभयसम्बन्धेनैतत्तत्पदादिवैशिष्ट्यम्, अतो नेश्वरेच्छायां तादृशबोधस्यैतत्तदादिपदप्रकारेण भानमिति न कालान्तरीणपुरुषान्तरीणबुद्धिविषयताऽवच्छेदकावच्छिन्नस्यैतत्तदादिपदवाच्यता,

भगवत्सङ्केतीयतत्पदव्यक्तिप्रकारतानिरूपिततथाविधसंसर्गविषयताऽन्तःपातिबुद्धिविषयताऽवच्छेदकावच्छिन्नविषयताया एव तद्वाच्यतारूपत्वात्; अतो न भ्रमं विना तदवच्छिन्नबोधः,

तद्धर्मावच्छिन्नविषयताशालिबोधे पदांशे तद्धर्मावच्छिन्नविषयताघटितोक्तोभयसम्बन्धावच्छिन्नाया बोधनिष्ठविशेष्यतानिरूपित-

---

पदत्वरूपेण तत्पदं बोधेऽवगाह्यते तदाऽवच्छेदकभेदेन सङ्केतविषयताभेदात् शक्तिभेद इति कथं सकलतत्पदशक्तिग्रहः ? इत्यत आह—सामान्यत इति । व्युत्पत्त्यनुपपत्तिः=अपूर्वव्यक्तिग्रहानुपपत्तिरिति, एकदेशोच्चरितघटतात्पर्यकतत्पदस्यान्यदोच्चरिततत्पदजन्यघटविषयकबोध एकपुरुषोच्चरितघटतात्पर्यकतत्पदस्य पुरुषान्तरोच्चरिततत्पदजन्यार्थान्तरविषयकबोधे तत्पदत्वसत्त्वाभावप्रयोजकसम्बन्धाभावं दर्शयितुं वाच्यत्वापत्तिं वारयति—कालान्तरीणेति ।

वाच्यतारूपत्वादिति । तथा च भगवत्सङ्केतीया या बोधत्वावच्छिन्नविशेष्यताकतत्पदत्वावच्छिन्नप्रकारतानिरूपिततादृशपदीयसांसर्गिकविषयतावद्विषयतावत्त्व तत्पदवाच्यत्वमिति पर्यवसितम्,

हेतुरपि शाब्दबोध इच्छीयबोधत्वावच्छिन्नविशेष्यताकजन्यत्वोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकावच्छिन्नविषयतावत्त्वोभयसम्बन्धावच्छिन्नतत्पदत्वावच्छिन्नत्वनिष्ठप्रकारतानिरूपितोच्चारणत्वावच्छिन्नसांसर्गिकविषयताकानुकूलत्वनिष्ठसांसर्गिकविषयताकबुद्धित्वावच्छिन्नसांसर्गिकविषयताकविषयतात्वावच्छिन्नविषयताकावच्छेदकत्वावच्छिन्नविषयताकधर्मनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नविषय-

सङ्केतीयप्रकारताया वाचकतारूपाया प्रकारतया संसर्गतया वा ज्ञानस्य हेतुत्वाद्, अन्यधर्म्मावच्छिन्न बुद्धिस्वीकृत्य प्रयुक्ते पदेऽन्यधर्म्मावच्छिन्नविषयताघटितोभयसम्बन्धावच्छिन्नसङ्केतीयप्रकारताया असत्त्वात्, तत्र तदवगाहिज्ञानस्य भ्रमत्वनियमात् ।

युष्मदस्मत्स्थलेऽपीदृश्येव रीतिश्चिन्तनीया ।

अथ स्वसम्बोध्ये युष्मदः स्वोच्चारयितरि चास्मदः शक्तौ, "देव्युवाच–मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवता" इत्यादिऋष्यादिवाक्याद् देवीकर्तृकमहिषासुरकर्म्मकघाताद्यवबोधानुपपत्तिस्तत्र देव्युच्चरितत्वस्य महिषासुरसम्बोध्यत्वस्य चाभावाद्, ऋष्यादिकर्तृकसुरथकर्म्मकघातादिबोधस्य च योग्यताभ्रमादापत्तिश्च, ऋष्यादेस्तादृ

ताकविषयतात्वावच्छिन्नसांसर्गिकविषयतावद्विषयतावत्त्वसम्बन्धेन तत्पदप्रकारकघटादिपदार्थविशेष्यकज्ञानम्,

अथ वा तत्पदजन्यतद्धर्म्मावच्छिन्नविषयताशालिशाब्दबोधे स्वनिष्ठविषयतानिष्ठसांसर्गिकविषयताया परम्परया निरूपिका या जन्यत्वस्वोच्चारणानुकूलबुद्धिविषयताऽवच्छेदकावच्छिन्नविषयतावत्त्वोभयत्वावच्छिन्नसांसर्गिकविषयता तन्निरूपकयावन्निष्ठविशेष्यताकतत्पदत्वावच्छिन्नसङ्केतीयप्रकारतासम्बन्धेनार्थप्रकारकपदविशेष्यकज्ञानमित्यवधेयमित्यलं पल्लवितेन ।

ईदृश्येवरीतिरिति । उक्तानुगमप्रणालीत्यर्थः, सा चाग्रे प्रदर्शनीया ।

युष्मदस्मत्पदयोः शक्तिं निर्वक्तुमारभते–अथेत्यादि, स्वसम्बोध्ये= स्वघटितवाक्यजन्यबोधाश्रयत्वेन वक्त्रभिप्रेते, स्व युष्मत्पदम्, अस्य च शक्तावित्यनेनान्वयः, स्वोच्चारयितरि चेति । अत्र स्वपदमस्मच्छब्दपरं, देव्युवाचेति । सुरथराजर्षिणा पृष्टः मेधामहर्षिस्तमुद्दिश्य देवीमाहात्म्यं देवीमहिषासुरयोः संवादं जगाद तत्स्वरूपमित्यर्थः, वदति । तादृशवाक्यघटके युष्मत्पदेऽस्मत्पदे चत्यर्थः, महिषासुरसम्बोध्यत्वस्य= महिषासुरसम्बोध्यत्वस्य तादृशवाक्यजन्यबोधाश्रयत्वेन ऋष्यभिप्रेतत्वस्य सुरथ एव सत्त्वादिति भावः

तादृशपदार्थप्रसिद्ध्या योग्यताज्ञानस्य प्रमात्वासम्भवादाह–या

शवाक्यप्रयोक्तृत्वात् सुरथादेश्च तत्सम्बोध्यत्वादिति चेद् ?
न–तत्र तादृशानुपूर्वीप्रकारेण सामान्यप्रत्यासत्त्या देव्यादिवाक्य-
स्यापि ज्ञानाद्देवीमहिषादिषु तादृशवाक्यप्रयोक्तृत्वस्वसम्बोध्यत्वप्रति-
सन्धानादेवास्मद्युष्मद्भ्यां देवीमहिषादिप्रतीत्युपपत्तिः,
यदि च तत्र वक्त्रनुवक्तृवाक्ययोर्विभिन्नैवानुपूर्वी तदाऽनु-
वादकवाक्ये तद्व्यक्तित्वादिना विशेषदर्शनेऽप्यानुपूर्वीप्रकारेण दे-
व्युच्चरितत्वभ्रमादेव श्रोतुर्देव्यादिप्रतीतिस्वीकारेणानुपपत्त्यभावाद्,
यत्र च तादृशानुपूर्व्यवच्छेदेनापि विशेषदर्शनं तत्र नेष्यत
एव तत्प्रतीतिः,

ध्यताभ्रमादिति । समाधत्ते–नेत्यादि । तत्र=मयेत्यादिमहावाक्ये, सत-
स्यर्थो घटकत्वं, तस्य च देव्यादिवाक्यस्येत्यत्रान्वयः, अत्र वाक्यं तत्त-
त् खण्डवाक्यमतो नानुपपत्तिः, तादृशेति । सुरथादेस्तादृशतादृशानु-
पूर्वीप्रकारेण ऋष्याद्युच्चरितवाक्यश्रावणप्रत्यक्षानन्तरं देवीवाक्यस्य
सामान्यलक्षणया ज्ञानम्, इतरेषान्तु पुस्तकस्थतत्तद्वर्णचिह्नज्ञानादिना-
ऽनुभूततत्तद्वर्णस्मरणेन मनसा मत्वादिसामान्यप्रत्यासत्त्या जायमान-
निखिलमादिवर्णज्ञानसहकारेण ऋष्यादिवाक्यज्ञानोत्तरमेकदैव वा दे-
व्यादिवाक्यज्ञानं जायते, ततश्च देव्युच्चरितादृशवाक्यघटकास्मत्प-
दोच्चारणकर्तृत्वं देव्यास्तद्घटकयुष्मत्पदसम्बोध्यत्वञ्च महिषासुरादौ
प्रतिसन्दधतो निराबाधं तत्र तत्र तत्तत्पदस्य शक्तिज्ञानं सम्भवत्येवे-
ति भावः, ननु एवं यदि वक्तृदेव्या वाक्यमनुवादकमहर्षिवाक्यञ्चै-
कानुपूर्वीकं स्याद्, विभिन्नानुपूर्वीकञ्चेत् का गतिः ? इत्यत आह–यदि
चेति । विशेषदर्शनेऽपि=देव्युच्चरितवाक्यभेदनिश्चयेऽपि; ऋष्युच्चरि-
तवाक्यमिदं न देव्युच्चरितमित्यादिनिश्चय इति यावद्, आनुपूर्वीप्रकारेणे-
ति । मयेत्याद्यानुपूर्वीकं किञ्चिद् वाक्यं देव्युच्चरितमित्यादिभ्रमादि-
त्यर्थः, तथा च तत्र तादृशास्मत्पदोच्चारणकर्तृताऽवच्छेदकत्वोप-
लक्षितात्मत्वावच्छिन्नशक्तिभ्रमादेव शाब्दबोध इति भावः,
तादृशानुपूर्व्यवच्छेदेनापि=मयेत्याद्यानुपूर्व्यवच्छेदेनापि, विशेषद-
र्शनं=देव्याद्युच्चरितत्वाभावनिश्चयः,
न च यदि देव्युच्चरितवाक्यस्य विभिन्नानुपूर्व्या निश्चयः स्याद्

एवमन्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणरूपं स्वतन्त्रोच्चारणमस्मत्पदप्रवृत्तिनिमित्तानुगमकम्,

उक्तस्थले ऋष्याद्युच्चारणञ्च न तथा तस्यार्थप्रतिपादनद्वारा देव्युच्चारणाधीनत्वादिति नास्मत्शब्दादृष्यादिबोधः, स्वातन्त्र्येणाहं गच्छामीत्युच्चारणस्यापि को गच्छतीत्यादिप्रश्नवाक्यशक्तिग्राहक-

---

तदा ऋषिवाक्ये देव्युच्चरितानुपूर्व्यवच्छिन्नवाक्यभेदनिश्चयो भवितुमर्हति; स चास्माकं श्रोतुर्वाऽसम्भवीति कुतो विशेषदर्शनमिति वाच्यम्?

श्रोतुश्च कथञ्चित् सम्भवात्, अस्माकञ्च; तद्बोधकवाक्यान्तरघटितपुराणान्तरदर्शने तत्संशयसम्भवाच्च पुराणादिवाक्यविभिन्नकालिदासाद्युच्चरितवाक्ये तादृशबाधनिश्चयोदयाच्चेति,

नन्वुक्तरीत्याऽनुपपत्तिवारणेऽपि तत्रस्थास्मदादिपदेन ऋष्यादेर्बोधो दुर्वार इत्यत आह—एवमिति। यत्र स्वीयगमनप्रतिपादनेच्छया मैत्रेणाहं गच्छामीत्युक्तौ सम्यगश्रुतवता चैत्रेण किमित्युक्तमिति जिज्ञासितेन मैत्रेणाह गच्छामीति पुनरुक्त, तत्र स्वतन्त्रोच्चरितास्मत्पदेऽव्याप्तिवारणाय—अन्यदीयेति। अन्यदीयं प्रकृतास्मत्पदोच्चारणकर्त्तृभिन्नकर्त्तृकं यत् स्वार्थतात्पर्यकोच्चारण; तच्च प्रकृतास्मत्पदघटितवाक्यजन्यबोधाश्रयत्वेनेच्छाप्रयोज्योच्चारणं, तादृशञ्च प्रकृते देव्युच्चारणतदधीनोच्चारणं प्रकृते ऋष्यादिकर्त्तृकं तद्भिन्नमित्यर्थः,

अस्मत्पदेति। स्वीयान्यदीयस्वार्थतात्पर्यकोच्चारणानधीनोच्चारणकर्त्तृत्वोपलक्षितात्मत्वावच्छिन्ने शक्तिः स्वतन्त्रोच्चरितास्मत्पदस्येति भावः,

न च ऋष्याद्युच्चरितास्मत्पदस्य शक्त्यभावेन स्वार्थतात्पर्यस्यैवासम्भवात् कुतस्तद्घटितस्योपलक्षणत्वमिति वाच्यम्?

अन्यदीययादृशार्थतात्पर्यकवाक्योच्चारणं तादृशतात्पर्यविषयार्थातिरिक्तार्थतात्पर्यकत्वाभावे सति तादृशोच्चारणाधीनं यदुच्चारणं तदन्यदित्यर्थ एव पर्यवसानात्,

वस्तुतस्तु स्वतन्त्रोच्चरितैष्यादिवाक्यघटकास्मत्पदस्यापि स्वघटितवाक्यार्थकर्मकवाक्यान्तरस्थक्रियाकर्तृत्वोपलक्षितवाचकतया ऋषिकविप्रभृतिभिरुच्चरिततद्घटितवाक्यस्यापि स्वार्थतात्पर्यसत्त्वात्,

स्वार्थतात्पर्यकेत्यस्य व्यावृत्तिमाह, स्वातन्त्र्येणेति। अन्योच्चारणा-

वक्त्रोच्चारणाधीनतया स्वार्थपरत्वमुच्चारणाविशेषणम्, भरतवाक्यस्य चाहं गच्छामीत्यादिमकृतवाक्यतानुपूर्व्यविषयपरत्वाभावाच्चदुच्चारणे विशिष्टव्यतिरेकः सुघटः,

आनुपूर्व्या सजातीयं यद्वा वाक्यान्तरं तदुच्चारणानधीनत्वञ्च निवेशयितुमशक्यं, शब्दानुकरणस्थल एव समानानुपूर्वीकोच्चारणापेक्षानियमाद्,

वाक्यार्थानुवादस्थले समानार्थकवाक्यमात्रोच्चारणापेक्षणात् स्वातन्त्र्यापत्तेर्दुर्वारत्वाद्,

वस्तुतस्तु वाक्यान्तरस्योक्तिक्रियाकर्म्मताऽऽपन्नस्वघटितवाक्यार्थप्रत्यायनेच्छाऽनधीनं स्वोच्चारणमेव स्वतन्त्रोच्चारणम्,

अनुवादस्थले चेत्युवाचेतिवाक्यान्तरस्योक्तिक्रियाकर्म्मतया तदधीनत्वमित्यर्थः, असमानानुपूर्वीकवाक्योच्चारणाधीने तद्व्यावृत्तिं दर्शयित्वा समानानुपूर्वीकवाक्योच्चारणेऽपि तद्व्यावृत्तिमाह—शक्तिग्राहकवाक्येति । मया गन्तव्यं पश्चात् त्वयेत्यादिवाक्यमुच्चारितन्ततस्ताहशवचनादिदर्शनेनासमदन्वयोच्चारयितरि शक्तिं गृहीतवतो मया गन्तव्यमिति वाक्योच्चारणस्य ताहशसमानानुपूर्वीकशक्तिग्राहकवाक्योच्चारणाधीनत्वेऽप्यर्थः । आनुपूर्व्येति । अत्र तृतीयार्थोऽभेदस्तस्य सजातीयैकदेशे सजात्येऽन्वयः, शब्दानुकरणस्थल एवेति । शब्दानुवादस्थल एवेत्यर्थः, एवकारेणार्थानुवादस्थलव्यवच्छेदः, शब्दानुवादस्तु पूर्ववाक्यसमानानुपूर्वीकसमानार्थकवाक्येन पूर्ववाक्यार्थस्य शब्दान्तरेण पुनर्वचनमर्थानुवादः,

वक्ष्यमाणदोषभिया पूर्वकल्पं परित्यज्य कल्पान्तरमाह—वस्तुतस्त्विति । वाक्यान्तरस्येति । स्वघटितवाक्यभिन्नवाक्यघटकस्येत्यर्थः, स्वमात्रघटितवाक्यभिन्नस्य स्वघटितवाक्यजन्यताऽवच्छेदकमुख्यविशेष्यताभिन्नमुख्यविशेष्यताशालिशाब्दबोधजनकवाक्यत्वं,—तथा शाब्दबोधीयविषयिताकाङ्क्षावत्त्वसमूहरूपवाक्यभेदस्य प्रत्येकं पदे सत्त्वेऽपि स्वस्मिन् तादृशवाक्यान्तरार्थं, समानाकारकजातीयविषयतया येनकेन न भिन्नभिन्नज्ञानमादाय तद्दोषः, क्रियाकर्म्मताऽऽपन्नेति । तादृशक्रियाकर्मत्वविशिष्टप्रकारतानिरूपितस्वघटितवाक्यार्थविशेष्यताकोधः प्रत्ययस्तज्जननेच्छाऽनधीनमित्यर्थः, अनुवादेति । स्तुत्याद्युच्चरिते

दर्थघटितवाक्यार्थं प्रतिपादयितुमेवानुवादकोऽस्मद्घटितं वाक्यं प्रयुङ्क्ते इति न स्वातन्त्र्यम्,

प्रत्युतमपरथेत्यादौ प्रकृतवाक्यस्यज्ञानरूपक्रियाकर्म्मतया स्वं प्रतिपादयितुमेवास्मदः प्रयोगात् तदुच्चारणस्य स्वातन्त्र्यनिर्व्वाहाय वाक्यान्तरस्येति,

एतेन यत्र चैत्रेणान्यदीयाच्चैत्रः सुन्दर इत्यादि वाक्यादेव वाक्यार्थं प्रतीत्याहं सुन्दर इति प्रयुज्यते; तत्र स्वसमानार्थकवाक्योच्चारणसापेक्षत्वेऽपि न स्वातन्त्र्यक्षतिः,

न वा स्वपाण्डित्याभिमानिर्मानिपुरुषज्ञानपरस्यायमहं पण्डित इति जानातीत्यन्यदीयोच्चारणस्य स्वातन्त्र्यापत्तिः,

अथैवं रीत्याऽव्यवहितोक्तस्थलेऽहपदेनोच्चारयितृपुरुषविषयक-

मया त्वयि हत इत्यादिस्थल इत्यर्थः, तदर्थघटितेति । अस्मत्पदार्थघटितेत्यर्थः, प्रतिपादयितु=प्रतिपादनेच्छयेत्यर्थः । स्वातन्त्र्यमिति । तदुच्चारणस्येति शेषः,

ननु क्रियाकर्म्मताऽऽपन्नेत्यादिविशेषेणैवोपपत्तौ वाक्यान्तरस्येति कथम्? इत्यत आह—प्रत्युत परथेति । प्रकृतवाक्यस्येति । अस्मत्पदघटितवाक्यस्येत्यर्थः, वाक्यान्तरस्येतीति। तथा च परस्परस्यास्मत्पदघटितवाक्यजन्यास्मत्पदार्थघटितार्थबोधजनकत्वाद् न वाक्यान्तरघटकत्वमिति,

एतेनेति । वस्तुनास्त्वत्थादिकरूपादरेणेत्यर्थः, वाक्यार्थम्=अभेदेन सुन्दरान्वितस्वात्मानं, प्रतीत्य=ज्ञात्वा, प्रयुज्यत इति । तथा चाहं सुन्दर इति वाक्यप्रयोगस्य प्रयोजकवाक्यार्थज्ञानजननद्वाराऽन्यदीयतादृशवाक्योच्चारणप्रयोज्यत्वस्यावस्ततरिति भावः,

पूर्व्वकल्पऽनुपपत्तिं दर्शयित्वाऽऽपत्तिं दर्शयति–न वेति। अस्य स्वातन्त्र्यापत्तिरित्यनेनान्वयः, अस्मत्पदार्थमौनिपुरुषे तादृशज्ञानसत्त्वज्ञापनाय स्वपाण्डित्याभिमानीति, यत्तु पाण्डित्याभिमानिपुरुषीयवाक्यादेव ज्ञात्वा तादृशवाक्योच्चारणञ्चेद्? न तत्रापत्तिरतस्तद्व्यसम्प्रदर्शनाय-मौनीति । अत्र चाहं पण्डित इत्येकं वाक्यं पण्डिताभिन्नाहमित्यर्थकम्, अपरञ्चायमिति जानातीति, इतिशब्दोऽत्र तादृशवाक्यार्थपरस्तथा च पण्डिताभिन्नास्मत्पदार्थकर्म्मकज्ञानवानयमित्यर्थः,

आशङ्कते–अथैवमिति । अव्यवहितेति । स्वपाण्डित्यस्याभिमानिन

नीतिवारणेऽव्यभिचारिनिस्तेन मत्पयो दुरुपपाद एव तस्योच्चारणाभावेनास्मदवाच्यत्वादिति चेत्?

सत्यं; स्वतन्त्रोच्चारयितुः सर्वेनास्मदर्थत्वे स्यादेवैयमनुपपत्तिः, किन्तु न; स्वतन्त्रोच्चारितास्मत्पदस्यैव तद्वाचकत्वात्, निरुक्तस्वतन्त्रोच्चारणरहितस्य चास्मदः स्वघटितवाक्यार्थकर्मकवाक्यान्तरस्थक्रियाकर्तर्य्येव शक्तिः,

एवञ्च यथा त्वपि हतेऽस्मैवेत्यादौ तादृशक्रिया=देव्युवाचेतिवाक्यान्तरस्थोक्तिक्रियैव; तत्कर्तृत्वं देव्या इति पूर्वोक्तभ्रमं विनाऽ-

नुपपत्त्येति यावत्, तेन=अस्मच्छब्देन, अवाच्यत्वादितीति। स्वतन्त्रोच्चारयितृत्वेनास्मत्पदस्य वाचकत्वादिति भावः,

स्वतन्त्रोच्चरितास्वतन्त्रोच्चरितभेदेन द्विविधास्मत्पदस्य शक्तेर्द्वैविध्यं कल्पयित्वा समाधत्ते—सत्यमित्यादि। स्वतन्त्रेत्यादि। वाक्यान्तरस्थक्रियाकर्मतया स्वघटितवाक्यार्थप्रतिपादनेच्छाऽनधीनोच्चारणकर्मास्मत्पदस्यैवेत्यर्थः, तद्वाचकत्वादिति। वाक्यान्तरस्थक्रियाकर्म तया स्वघटितवाक्यार्थप्रतिपादनेच्छाऽनधीनोच्चारणकर्तृत्वोपलक्षितानामवाचकत्वादित्यर्थः, निरुक्तस्येति' वाक्यान्तरस्थक्रियाकर्मतया स्वघटितवाक्यार्थप्रतिपादनेच्छाऽधीनोच्चारणकर्मास्मत्पदस्येत्यर्थः, पूर्वोक्तभ्रम विनाऽपि=अस्याप्युच्चरितमयाशब्दीयार्थानुपूर्व्यवच्छिन्नवाक्ये देव्युच्चरितत्वभ्रमं विनाऽपीत्यर्थः,

एवं "मयः स्वमात्यः शरणं मयेथ"इत्यादिभट्टिकाव्यादिवाक्ये विभीषणादिपुरुषोच्चरितावाक्याभिप्रायस्य विशेषदर्शिनां सदा सत्त्वेऽपि तदुपदेशास्मत्पदस्य श्रान्तिना विभीषणादेर्बोधानुपपत्तेरिति, ऊध इति वाक्यान्तरस्थक्रियाकर्तृत्वात्, अत एव' विभक्तिर्लोपिश्च। मयते मयि निमज्जतु मीमनुगतमतः" इत्यादावपि मातापितादृशैरपि "इति मन्यते" इति वाक्यान्तरस्थक्रियाकर्तृत्वमादायपि बोधोदय.,

सर्वेषामपि युष्मासु प्रति देव्युच्चरितत्वेनैवादृतिरयाऽऽदे. सत्येव विज्ञापयस्मद्विभूतय इत्यत्रस्य वाक्यान्तरघटितवाक्यस्योच्चारके इति च यदेवेति वाक्यान्तरस्थदर्शनक्रियाकर्मतया तादृशवाक्यस्य घटितवाक्यार्थप्रतिपादनेच्छाधीनतया स्वातन्त्र्यविरहेण अस्मदादेरन्यस्य वेदविदां बोधकतया अनुपपत्तिः, सामान्येन वाक्यान्तरस्थदर्शनक्रियाकर्तृः युष्मासु रेव प्रतीते,

पि तत्प्रतीतिरुपपादयितुं शक्यते, स्वघटितवाक्यार्थकर्म्मकवाक्यान्तरस्थक्रियात्वञ्च तादृशार्थकर्म्मकत्वेन वाक्यान्तरप्रतिपाद्यत्वं, तेनाहं पण्डित इति विद्वांसं पश्येत्यादौ दर्शनादिक्रियाया अस्मच्छब्द-

न च तादृशवाक्यस्यानुवादकमहर्ष्युच्चरिततया तद्घटकास्मच्छब्दस्य देवीत्युवाचेतिवाक्यान्तरस्थकथनक्रियाकर्त्र्या देव्या बोधकत्वं नानुपपन्नमिति वाच्यम् ?

तद्वाक्यस्य ऋष्युच्चरितत्वेऽपि तत्समानानुपूर्व्वीकस्य तत्समानार्थकविभिन्नानुपूर्व्वीकस्य वा वाक्यस्य देव्युच्चरितत्वेन तत्र तद्दोषस्य दुर्व्वारत्वादिति चेद् ?

न-यस्मात् पश्येतिदर्शनक्रियायां तादृशपरस्परोपश्लिष्टवाक्यार्थकर्मकत्वान्वये न तात्पर्य्यम्; अपि तु स्वसजातीयद्वितीयरहितभगवत्याः कर्म्मतया भगवत्यां शक्तीनां प्रवेशनक्रियाया वा तत्र कर्म्मतयाऽन्वयतात्पर्य्यम्,

एवञ्च तादृशवाक्योच्चारणस्य वाक्यान्तरस्थक्रियाकर्तृत्वेनास्मत्पदघटिततादृशवाक्यार्थप्रतिपादनेच्छाऽधीनत्वमेव नास्ति; अतस्तत्र स्वतन्त्रोच्चरित एवास्मच्छब्दः, अहं पण्डित इति त्वं जानीहीतिवक्तृतात्पर्य्यकास्मत्पदघटितवाक्यस्थले तु वक्तुः प्रतीतिः स्वयमग्र उपपादयिष्यते,

ननु स्वघटितवाक्येत्यत्र क्रियापदेन धात्वर्थो वाच्यः; तत्र वाक्यान्तरस्थत्वं न वाक्यान्तरघटकत्वं तत्र तदभावाद्, धात्वर्थैकदेशे धातावन्वयासम्भवाच्च,

एवमहं पण्डित इत्यय जानातीत्यत्रेतिजानातीतिवाक्यान्तरस्थज्ञानक्रियाकर्त्तुरभिमानिपण्डितस्यैव स पण्डित इति देवदत्तोऽपि जानातीति तादृशवाक्यार्थकर्मताऽऽपन्नज्ञानक्रियाकर्त्तुर्देवदत्तस्यास्मच्छब्देन बोधापत्तिर्दुर्व्वारेत्यत आह—स्वघटितवाक्येति ।

अत्र क्रियेति सम्पातायातम्, अन्यथा प्रतिपाद्यत्वमित्यन्तव्याख्याया असङ्गतेः, प्रतिपाद्यत्वमित्यन्तस्य वा प्रतिपाद्यक्रियात्वमर्थः, तादृशार्थकर्म्मकत्वेनेति । अस्मत्पदघटितवाक्यार्थकर्मकत्वनिष्ठप्रकारतानिरूपितवाक्यान्तरजन्यप्रतिपत्तीयविशेष्यत्वं, न तु स्वघटितवाक्यार्थकर्म्मकत्वनिष्ठविषयताशालिवाक्यान्तरजन्यप्रतिपत्तीयविषयत्वं साक्षात्परम्परासाधारणतादृशविषयतानिरूपितविषयत्वं वेति स्वर्थतो लब्धं, तेनउक्तार्थकरणेन, विद्वांसमिति । जानन्तमित्यर्थः,

घटितवाक्यार्थविषयकत्वसम्भवेऽपि तेन रूपेण समभिव्याहृतवाक्यान्तराप्रतिपाद्यतया न तत्क्रियाकर्त्तुरस्मच्छब्दतः प्रतीतिः,

अथ—इतिपदघटितवाक्यान्तरात् क्रियाप्रतिपत्तावेव तत्कर्त्तुर्वाक्यान्तरप्रतिपाद्यक्रियाकर्तृत्वं सुग्रहं; तद्ग्रह एव च तद्घटितानुगमकरूपग्रहेणास्मच्छब्दशक्तिग्रहेऽस्मच्छब्दघटितवाक्याद्वाक्यार्थप्रतीतौ तस्येतिपदादुपस्थित्या वाक्यान्तरात् क्रियाप्रतिपत्तिरित्यन्योन्याश्रय इति चेद् ?

आशङ्कते—अथेति । इतिपदघटितेति । देवी महिषासुरमित्युवाचेति वाक्यान्तरादित्यर्थः, क्रियेति । उक्त्यादिक्रियाशाब्दबोध एवेत्यर्थः, तादृशवाक्यार्थकर्मकत्वेन क्रियायाः शाब्दबोध इति यावत्, तत्कर्त्तुः=उक्त्यादिक्रियाकर्त्तुः, वाक्यान्तरेति । तादृशकर्तृत्वरूपो विशिष्टो धर्मः, सुग्रहमिति । ग्रहविषयो भवतीत्यर्थः । तद्ग्रह एवेति । इतिपदघटितवाक्यान्तरप्रतिपाद्यक्रियाकर्तृत्वग्रहे सत्येवेत्यर्थः, तद्घटितानुगमकरूपग्रहेण=वाक्यान्तरप्रतिपाद्यक्रियाकर्तृत्वोपलक्षितात्मत्वादिधर्मग्रहेणेत्यर्थः, अत्र तृतीयाऽर्थः प्रयोज्यत्वं, तस्य चास्मच्छब्दशक्तिग्रह इत्यनेनान्वयः, अस्मच्छब्दशक्तिग्रहस्य तादृशधर्मविशिष्टविशेष्यकावगाहितया तज्ज्ञानस्य तत्र हेतुत्वाक्षतेः, अस्मच्छब्दघटितेति । मया त्वयीत्यादिवाक्याद्, वाक्यार्थेति । देवीकर्तृकमहिषासुरकर्मकहननोत्तरकालीनं भविष्यद्वर्जनकर्तृत्वापन्नदेवतारूपार्थप्रतीतावित्यर्थः, तस्य=तादृशवाक्यार्थस्य, उपस्थित्या=ज्ञप्त्या स्मरणेन; इतिशब्दस्य संनिहितबुद्धिस्थ एव शक्तत्वादिति भावः, अन्योन्याश्रय इति । अस्मच्छब्दशक्तौ तद्ग्रहमपेक्षमाणो यस्तादृशवाक्यान्तरप्रतिपाद्यक्रियाकर्तृत्वग्रहस्तमपेक्षमाणो यः स्वस्य शक्तिग्रहस्तद्विषयत्वेनास्मत्पदशक्तिर्यदि स्वग्रहसापेक्षग्रहसापेक्षग्रहिका स्यात् तदा स्वाभिन्ना स्यादित्यापत्तिरित्यर्थः,

ननु मया त्वयि हतेऽभैषीत्यादिवाक्यघटकपदास्मत्पदघटिततया तादृशवाक्यजन्यप्रतीतेरस्मत्पदशक्तिग्रहाधीनत्वमस्त्येव, तादृशवाक्यार्थपरेतिपदघटितवाक्यान्तरजन्यप्रतिपत्तेरपि तदधीनत्वं सम्भवति, किन्तु तादृशवाक्यार्थकर्मकत्वप्रकारतावाक्यान्तरजन्यप्रतिपत्तिविषयत्वेन क्रियाया ज्ञाने तदधीनत्वं कुतो मन्यत इति चेद् ?

न—तादृशक्रियाज्ञानेऽपीतिशब्दार्थास्मत्पदघटितवाक्यार्थस्य विशेषणतया भानेन तत्र तादृशविशेषणापेक्षत्वेन विशेषणज्ञानस्य त्व-

न-वाक्यान्तरप्रतिपाद्यतया वक्तृबुद्धिस्थत्वस्यैव क्रियायां विशेषणत्वोपगमात्, प्रतिपत्तेः पूर्व्वमपि प्रकरणादिना तादृशवक्तृबुद्धेर्ग्रहसम्भवेनान्योन्याश्रयाभावात्,

---

स्मत्पदशक्तिग्रहाधीनत्वेन तादृशक्रियाज्ञानस्यापि तच्छक्तिग्रहाधीनत्वाक्षतेः, एवमितिपदघटितवाक्यजन्यप्रतीतेरपि तादृशज्ञानविषयत्वेन तादृशविषयसम्पादनद्वारा तदधीनत्वस्य तत्र सत्त्वाच्चेति निगर्वः,

समाधत्ते—वाक्यान्तरेति। अस्मत्पदघटितवाक्यार्थकर्म्मकत्वनिष्ठप्रकारताकवाक्यान्तरजन्यप्रतिपत्तीयविषयताप्रकारताकवक्तृज्ञानीयविषयताऽऽपन्नक्रियाकर्त्तृत्वेऽस्मत्शब्दस्य शक्तिरिति भाव,

वक्तुस्तादृशज्ञानञ्च-बुबोधयिषया वाक्यप्रयोगं प्रति वाक्यार्थज्ञानस्य कारणतया बुबोधयिषायाः कारणेष्टसाधनताज्ञानस्य धर्मिताऽवच्छेदकज्ञानविधया वा देवीकर्त्तृकमहिषासुरकर्म्मकहननोत्तरकालीनशीघ्रभविष्यद्गर्जनकर्त्तृतावद्देवताकर्म्मकत्वनिष्ठप्रकारतानिरूपिता सती देवीकर्त्तृकत्वनिष्ठविशेष्यतानिरूपिता येतिपदघटितवाक्यजन्यप्रतिपत्तीयविषयता तद्बुभुत्सितेत्याकारकम्,

ननु तादृशार्थकर्म्मकत्वनिष्ठविषयतानिरूपितकथनक्रियानिष्ठविषयतानिरूपितकृतिनिष्ठविषयतानिरूपितदेवीनिष्ठविशेष्यताशालिज्ञानं तादृशवाक्यजन्यं भवत्वित्याकारिकेच्छैव तत्र बुबोधयिषा वाच्या;

एवञ्च तादृशज्ञानं तादृशवाक्यजन्यमित्याकारक वक्तुर्ज्ञानमपि तादृशतात्पर्य्यप्रयोजक वाच्यं, कुतस्तादृशज्ञानमादायोक्तानुगमकधर्मः सम्पादनीय इति चेद् ?

न-विनिगमनाविरहेणोक्तबुबोधयिषाद्वयमेव हेतुः कल्प्यते, अतउक्तज्ञानस्यापि तत्र सम्भवादिति भाव, तादृशवाक्योच्चारणं प्रत्युक्तबुबोधयिषायाः कारणत्वस्याप्रामाणिकत्वेन तादृशज्ञानस्य नियतसत्त्वाभावमालोच्य स्वघटितवाक्येत्यादिना पर्य्यवसितार्थस्योक्तत्वाच्चेति भाव,

प्रकरणादिनेति। तथा च तादृशशाब्दबोधात् पूर्व्वं सैन्धवमानयेत्यादाविव प्रकरणादिलिङ्गज्ञानादिना तादृशविशिष्टार्थविषयकवक्तृज्ञानविषयकज्ञानजनने बाधकाभावादित्यर्थ,

अन्योन्याश्रयाभावादिति। वाक्यान्तरजन्यप्रतिपाद्यतया तादृशविशिष्टार्थविषयवक्तृज्ञानजनने श्रोतुरपि तादृशज्ञानविषयकज्ञानजनने पूर्व्वं तादृशवाक्यजन्यप्रतिपत्तेः, तज्जनकास्मत्पदस्य शक्तिग्रहस्य चान-

स्वघटितवाक्यार्थविषयकत्वान्वितक्रियाकर्तृतया वाक्यान्तरप्रतिपाद्यत्वेन या वक्तृबुद्धिस्तद्विषयताऽवच्छेदकत्वं प्रवृत्तिनिमित्तानुगमकमिति तु सारम्,

एवञ्च बुद्धिविषयताऽवच्छेदकत्वस्य प्रवृत्तिनिमित्तानुगमकत्वमवादोऽपि सङ्गच्छते,

उच्चारणकर्तृत्वानुगमकशरीरेऽपि मिश्राणां बुद्धिस्थत्वनिवेशबीजन्तु नावधारयामः,

एवं युष्मत्पदप्रवृत्तिनिमित्तानुगमकगर्भनिविष्टं स्वसम्बोध्यत्वमपि वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थानवगाहिनी या स्वजन्यप्रतीत्याश्रयत्वेनेच्छा तद्विषयत्वम्, अनुवादकपुरुषीयवा-

पेक्षणात् वाक्यजन्यार्थप्रतिपत्त्यार्द्दीनां सर्वत्र उपस्थित्यैव तादृशविशिष्टज्ञानसम्भवादिति भावः, स्वघटितवाक्यार्थेति । स्वघटितवाक्यार्थकर्मकत्वनिष्ठविषयतानिरूपितक्रियानिष्ठविषयतानिरूपितकर्तृत्वनिष्ठविषयतानिरूपिता या वाक्यान्तरजन्यप्रतिपत्तिविषयता तत्प्रकारतानिरूपितवक्तृबुद्धीयविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नमस्मत्पदशक्यताऽवच्छेदकमित्यर्थः, सारमिति । निर्दोषत्वेन तदेवानुगमकमित्यर्थः,

एवञ्च=वाक्यान्तरप्रतिपाद्यतया वक्तृबुद्धिविषयत्वस्यानुगमकशरीरे प्रवेशे चेत्यर्थः,

उच्चारयितृत्वावच्छेदकधीप्रकारतावच्छिन्नोऽहम्पदस्य शक्तिरिति मिश्रोक्तमाक्षिपति—उच्चारणकर्तृत्वेति । एवमिति । यथा त्वयीत्यादावस्मत्पदेन तदुच्चारकमहार्थयोर्भयारणायोक्तनिवेशावत् तद्वदेव युष्मत्पदेन प्रवृत्तिस्वबोध्यस्तुत्यराजयोर्धारणार्थैतादृशविषयत्वं वाच्यमित्यर्थः, युष्मत्पदेत्यादि, अत्र विषयत्वमित्यनन्तरं वाच्यमिति पूरणीयम्,

अनुगमकेति । स्वसम्बोध्यताऽवच्छेदकेत्यर्थः, गर्भेति । घटकेत्यर्थः, वाक्यान्तरस्थेति । वाक्यान्तरस्थक्रियाकर्मत्वनिष्ठविषयतानिरूपितस्वघटितवाक्यार्थनिष्ठविषयताशून्या या स्वघटितवाक्यजन्यप्रतीतिप्रकारेच्छा तद्विशेष्यत्वमित्यर्थः, एतादृशसम्बोध्यताऽवच्छेदकत्वं स्वतश्चोच्चरितयुष्मत्पदस्य प्रवृत्तिनिमित्तानुगमकं, स्वमनुवादकानुच्चरितयुष्मत्पदम्, अत्र चानुवादकपरेच्छा च यथा त्वयीत्यादिवाक्य-

क्यार्थकर्म्मकोक्तिक्रियाघटितमहावाक्यार्थघटकयुष्मदर्थघटितावान्तरवाक्यार्थप्रतीत्याश्रयत्वेनाभिप्रायविषयत्वेऽपि तादृशाभिप्राये तादृशावान्तरवाक्यार्थस्य वाक्यान्तरस्थक्रियाकर्म्मत्वेन भानाद्,

यदि च-इतिपदघटितवाक्यार्थप्रतीतिरूपफलेच्छाऽधीना युष्मद्घटितवाक्यार्थप्रतीतिविषयिणी तादृशवाक्यार्थांशे वाक्यान्तरस्थक्रियाकर्म्मत्वानवगाहिन्यपि तादृशवाक्योच्चारणानुकूलाऽनुवक्तुरिच्छा सम्भवतीति तादृशेच्छामादायानुवादकसम्बोध्यस्य सम्बोध्यताऽऽपत्तिरिति मन्यते ?

तदा वाक्यान्तरार्थप्रतीतीच्छाऽनधीनत्वमपीच्छाविशेषणं देयमिति मया त्वयि हतेऽत्रैवेत्यादौ युष्मच्छब्दान्न सुरथादिप्रतीतिः,

---

र्थविषयकशाब्दबोधानुकूलव्यापारानुकूलातीतकृतिमती देवीत्याकारकदेव्युवाचेत्यादिमयात्वयीत्याद्यन्तमहावाक्यजन्यप्रतीत्याश्रयः सुरथो भवत्वित्याकारा, तथा चात्र तादृशेच्छीयविशेष्यत्वरूपस्यातादृशतयोक्तसम्बोध्यत्वस्य सुरथेऽसत्त्वाद् न युष्मत्पदेन तस्य बोधः,

गुरो ! त्व मामध्यापयस्वेत्यादिस्वतन्त्रयुष्मच्छब्दस्थले च स्वतन्त्रोच्चारयितुरेतादृशवाक्यजन्यप्रतीत्याश्रयो गुरुर्भवत्वित्याकारैवेच्छा; अतो गुरौ तादृशसम्बोध्यत्वस्य सत्त्वेन तस्य बोधः,

देवी महिषासुरमित्युवाचेति वाक्यान्तरं, तत्रस्थेतिपदार्थतादृशवाक्यार्थप्रकाशनाय मया त्वयीत्यादिवाक्यान्तर प्रयुज्यते, यथा तमानयेत्यादिवाक्यघटकतच्छब्दार्थव्यक्तये गौरस्तीत्यादिवाक्यान्तरं, तथा चादावित्युवाचेत्यन्तवाक्यजन्यबोधरूपफलविषयकेच्छा भवति, तदनन्तरं मया त्वयीत्यादिवाक्यजन्यबोधरूपोपायविषयकेच्छेत्यभिमन्वानः शङ्कते यदि चेत्यादि,

अथात्र महावाक्यार्थबोध फलम्, अवान्तरवाक्यार्थबोध उपाय इति मया त्वयीत्याद्यवान्तरवाक्यमात्रजन्यबोधो भवत्वित्याकाराया इच्छाया अपि तादृशवाक्योच्चारणानुकूलत्वात्तस्याश्च वाक्यान्तरस्थक्रियाकर्म्मत्वेन स्वघटितवाक्यार्थस्यानवगाहनात्तद्विशेष्यत्वमादायानुवादकसम्बोध्यस्य निरुक्तसम्बोध्यताऽऽपत्तिरित्याशङ्कते-यदि चेत्यादि । अत्र गवित्ययमाहेत्यादावितिशब्दस्य कर्म्मत्वार्थकतया गोशब्दकर्म्मताकोच्चारणकर्त्ताऽयमित्येकविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वमिव,

एवमभ्रान्तस्य ततो महिषादिप्रतीतिनिर्व्वाहाय वाक्यान्तरस्थस्वघटितवाक्यार्थकर्म्मकक्रियाकर्म्मण्यपि युष्मदः शक्त्यन्तरं स्वीकार्य्यं, तत्र देवी महिषासुरमित्युवाचेतिवाक्यस्थक्रियाकर्म्मत्वं महिषासुरादेरिति तस्यापि त्वयीत्यादिशब्दार्थतोपपत्तिः,

अत्रापि पूर्व्ववत् स्वघटितवाक्यार्थविषयकत्वान्वितक्रियाकर्म्मतया वाक्यान्तरप्रतिपाद्यत्वेन या वक्तृबुद्धिस्तद्विषयताऽवच्छेदकत्वे-

---

मया त्वयीत्यादिवाक्यस्यापि मयेत्यादिवाक्यार्थकर्म्मताकप्रतिपत्त्यनुकूलशब्दकर्त्री देवीत्येकविशिष्टवैशिष्ट्यावगाहिबोधजनकत्वमितिपक्षस्य कर्म्मत्वार्थकस्य तादृशबोधप्रयोजकाकाङ्क्षासम्पादकत्वादिति पूर्व्वोक्तरूपेच्छैव तादृशवाक्योच्चारणानुकूला; न त्ववान्तरवाक्यार्थबोधमात्रविषयिणीच्छेति विवादग्रस्ततया यदि चेदुक्तम्,

अथ वा महावाक्यार्थबोधरूपफलेच्छया तत्प्रयोजकमयात्वयीत्यादिखण्डवाक्यजन्यबोधरूपोपायविषयिका कथनक्रियाकर्म्मत्वानवगाहिनीच्छा भवति; तादृशेच्छामादाय शङ्कते-यदि चेत्यादि,

महावाक्यजन्यमहावाक्यार्थविषयकबोधेच्छायामेव तादृशवाक्योच्चारणप्रयोजकत्वं स्वीक्रियते; न तु खण्डवाक्यजन्यबोधेच्छायां मानाभावादित्यतो वा यदि चेति।

नन्वेतावता मया त्वयीत्यादौ युष्मत्पदेन सुरथादेर्बोधो मा भूत्; किन्तु महिषासुरादीनां शक्तिभ्रमाज्जन्यबोधो जायते, तत् कुतः सम्पद्यते ? इत्यत आह—एवमिति। शक्त्यन्तरमिति। स्वतन्त्रास्वतन्त्रयुष्मच्छब्दभेदेन शक्तिद्वयी स्वीकार्य्येति भावः, अत्राप्यन्यदीयस्वार्थतात्पर्य्यकोच्चारणानधीनोच्चारणत्वं स्वातन्त्र्यं, तादृशोच्चारणाधीनोच्चारणकत्वं चास्वातन्त्र्यं बोध्यम्, पूर्व्ववदिति। अत्रान्यसमच्छब्देऽस्या त्वं पण्डित इति विद्वांसं पश्यामीत्यादावप्यन्यपरयुष्मत्पदस्य दर्शनक्रियाकर्म्मणि शक्तेर्व्वारणाय स्वघटितवाक्यार्थकर्म्मत्वनिष्ठप्रकारतानिरूपिता या वाक्यान्तरजन्यप्रतिपत्तीयविशेष्यता तदाश्रयक्रियाकर्म्मण्येव शक्तिर्वाच्या, अतः पूर्व्वोक्तरीत्याऽन्योन्याश्रयापत्तिः तद्वारणाय; पूर्व्ववदुक्तनिवेशवदित्यर्थः,

स्वघटितेत्यादि। प्रतिपत्तिनिरूपिता या स्वघटितवाक्यार्थविषयतानिरूपितविधेयत्वनिष्ठविषयतानिरूपितक्रियानिष्ठविषयतानिरूपितकर्म्मत्वनिष्ठविषयतानिरूपकविषयता तादृशविषयतावती वक्तृबुद्धिः,

नानुगतानां चैत्रात्मत्वादीनां प्रवृत्तिनिमित्तत्वं बोध्यम्,

सम्बोध्यत्वघटितानुगमकशरीरे च बुद्धिविषयताऽवच्छेदकत्वनिवेशनं मिश्रोक्तमनुपादेयमेव; सम्बोध्यताऽवच्छेदके बुद्धिप्रकारकत्वस्याव्यावर्त्तकत्वात्,

अथ तात्पर्यसत्त्वेऽहमत्रास्मीति मैत्रो जानातीत्यादौ चैत्रवाक्यस्थास्मच्छब्दाच्चैत्रोऽपि प्रतीयते तत्र चैत्रस्य स्वघटितवाक्यार्थकर्मकक्रियाकर्तृत्वाभावात् तदुच्चारणस्य निरुक्तस्वातन्त्र्यत्वाभावाच्चानुपपत्तिः,

एवं चैत्र ! त्वया भुक्तमिति मया श्रुतमित्यादौ चैत्रस्य युष्मच्छब्देन प्रत्यायनात्तस्य च वाक्यान्तरस्थक्रियाकर्म्मान्यत्वाद्द निरुक्तेच्छाविषयत्वरूपसम्बोध्यत्वस्य चाभावात्तत्कथमुपपद्यतामिति चेत् ?

तर्हि; स्वातन्त्र्यमुच्चारणविशेषणं सम्बोध्यत्वघटकेच्छायां

तथा च स्वघटितवाक्यार्थनिष्ठविषयताकाविषयित्वनिष्ठविषयताकक्रियानिष्ठविषयताककर्मत्वनिष्ठविषयतानिरूपितप्रतिपत्तीयविषयतावान् चैत्रादिरित्याकारा, तादृशबुद्धिश्च पूर्वोक्तयुक्त्या शाब्दबोधात् पूर्वमावश्यकी, प्रवृत्तिनिमित्तत्वमिति । स्वघटितवाक्यार्थविषयताकविषयित्वनिष्ठविषयताकक्रियानिष्ठविषयताककर्मत्वनिष्ठविषयताकप्रतिपत्तीयविषयत्वप्रकारकवक्तृबुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य शक्तिरिति ध्येयम्,

उक्तानुगमकमाक्षिपति—अथ तात्पर्येति ।

अस्मत्पदमिदमुच्चारयितारं मां बोधयत्वित्येतादृशेच्छासत्त्व इत्यर्थः,

ननु स्वतन्त्रास्मच्छब्दस्योच्चारयितरि शक्तत्वेन तस्य बोध इत्यत आह—तदुच्चारणस्येति ।

निरुक्तेति । वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थप्रतिपादनेच्छाऽनधीनोच्चारणकर्तृत्वेत्यर्थः, वाक्यान्तरस्थक्रियाकर्म्मान्यत्वादिति । वाक्यान्तरस्थस्वघटितवाक्यार्थकर्मकक्रियाकर्मणि शक्त्यन्तरस्वीकारेऽपि न तथा निर्वाह इति भाव,

ननु तादृशशक्त्या निर्वाहासम्भवेऽपि स्वतन्त्रोच्चरितयुष्मत्पदस्य सम्बोध्यशक्ततया तेनैवोपपत्तिर्भविष्यतीत्यत आह—निरुक्तेच्छेति । वाक्यान्तरस्थक्रियाकर्मत्वेन स्वघटितवाक्यार्थानवगाहिनी या स्वज-

निरुक्तेच्छाऽधीनत्वादिविशेषणं च स्याज्यमेव, मया त्वयीत्यादौ तात्पर्य्यविरहादेवानुवादकतत्सम्बोध्ययोर्मया त्वयीत्यादिनाऽप्रतिपादनोपपत्तेः,

न चैवं बुद्धिविषयताऽवच्छेदकरूपावच्छिन्न एव युष्मदोऽस्मदश्च शक्तिरास्तां; किं सम्बोध्योच्चारयितृताऽवच्छेदकावच्छिन्ने शक्तिस्वीकारेण तात्पर्य्यैत एवातिप्रसङ्गभङ्गसम्भवादिति वाच्यम् ?

तात्पर्य्यसत्त्वेऽपि चैत्रोच्चरितादहंकरोमीत्यादिवाक्याद् मैत्रबोधयितुं प्रयुक्तात्, चैत्रं बोधयितुं प्रयुक्ताच्च त्वं गच्छेत्यादिवाक्याच्चोच्चारयितृत्वसम्बोध्यत्वभ्रमं विना मैत्रादिबोधस्यानुभवविरुद्धत्वाद्, अन्यथाऽन्यतात्पर्य्येण स्वरसतस्तथा प्रयोगापत्तेः,

इदन्त्ववधातव्यम्—अयमहं पण्डित इति जानाति इत्युवाचेत्यादिस्थले सर्व्वत्र वाक्यार्थस्य कर्म्मता न सम्भवति वाधितवाक्यार्थस्थले तदसम्भवाद् ?

न च वाधितवाक्यार्थस्थले भ्रमरूपैव तत्कर्म्मत्वप्रतीतिरिति वाच्यम् ?

स्वप्रतीत्याश्रयत्वेनेच्छा तद्विषयत्वरूपेत्यर्थः, तथा चैतद्युष्मत्पदस्य स्वतन्त्रोच्चारणाभावाद् न तादृशशक्त्या निर्व्वाह इति भावः,

त्याज्यमेवेति । तथा चास्मत्पदस्योच्चारयितरि स्वघटितवाक्यार्थकर्म्मताऽऽपन्नवाक्यान्तरस्थक्रियाकर्त्तरि च शक्तिद्वयी,

एवं युष्मत्पदस्य सम्बोध्ये वाक्यान्तरस्थस्वघटितवाक्यार्थकर्म्मकक्रियाकर्म्मण्यपि च शक्तिद्वयीति भावः,

नन्वेवं मया त्वयीत्यादावस्मत्पदेनोच्चारयितुर्युष्मत्पदेन तत्सम्बोध्यस्य सुरथस्य कथं न बोध इत्यत आह—तात्पर्य्यविरहादेवेति । अनुवादकतत्सम्बोध्ययोरिति । महर्षिसुरथयोरित्यर्थः,

सम्बोध्यापाद्यादि, इदमुपलक्षणं, तेन वाक्यान्तरस्थस्वघटितवाक्यार्थकर्म्मताऽऽपन्नक्रियाकर्तृतादृशक्रियाकर्म्मणोरपि किं शक्तिद्वयीकारेणेत्यर्थं इति ध्येयम् ।

वाधितवाक्यार्थस्थल इति । अविद्वान्नयमहं पण्डित इत्यादिवाक्यस्थले; मया वन्ध्या सुतो दृष्ट इति; देवदत्त उवाचेत्यत्र च स्थले इत्य·

विशेषदर्शिनाऽपि भ्रान्तिज्ञेन तथा प्रयोगात्तस्य च वाक्यार्थज्ञानासम्भवेन तदनुपपत्तेः,

न चाहार्य्यवाक्यार्थज्ञानादेव विनाऽपि विशिष्टवाक्यार्थबुद्धिं विशेषणप्रकारकत्वविशेष्यविशेष्यकत्वाभ्यां विशिष्टज्ञानज्ञानादेव वा विशेषदर्शी तथा प्रयुङ्क्त इति वाच्यम् ?

एवमपि विशेषदर्शिनो भ्रान्तिज्ञपुरुषीयतथाविधवाक्याच्छाब्दबोधानुपपत्तेर्जलेपत्वाचस्मात्तत्रेतिपदं न तद्वाक्यप्रतिपाद्यताऽवच्छेदकीभूततत्तद्धर्मावच्छिन्नपरम् ;

अपि तु तत्तद्वाक्यजन्यज्ञानसमानाकारकपरं, तादृशश्चेतिपदार्थोऽभेदसम्बन्धेन यथासम्भवं धात्वर्थे तत्त्वावच्छेदके च ज्ञाने विशेषणमित्येवोपगन्तव्यं; तथा च सर्व्वत्रैव युष्मदस्मद्घटितावान्तरवाक्यस्थल इतिपदं तत्परमेव, तादृशवाक्येन च मवित्यमाहेत्यादौ गवादिपदवत् स्वरूपमेवेतिशब्देन परामर्शार्थमुपस्थाप्यते; न तु

र्थः, भ्रान्तिज्ञेनेति । अयमहं पण्डित इतीत्यादौ तादृशज्ञानमपण्डिते पाण्डित्यप्रकारकमित्याकारकज्ञानादिवतेत्यर्थः, वाक्यार्थज्ञानासम्भवेनेति । परस्परार्थविशिष्टज्ञानासम्भवेनेत्यर्थः,

ननु सर्व्वत्र बाधितवाक्यार्थस्थले तादृशवाक्यार्थज्ञान इष्टसाधनतामानोत्पत्तौ मानाभावेनेच्छाऽनुदयेनाहार्य्यज्ञानासम्भवादाह—विनाऽपीति । विशेषणप्रकारकत्वेति । अत्रान्येच्छार्थप्रकारताकपदार्थनिष्ठविशेष्यताकत्वेन पाण्डित्यादिप्रकारकभ्रमज्ञानविषयकज्ञानादेवेत्यर्थः, विशेषदर्शन इति । तादृशपुरुषे पाण्डित्यं बाधनमित्यादिज्ञानवत इत्यर्थः, शाब्दबोधानुपपत्तेरिति । शाब्दबोधस्याहार्य्यत्वस्वीकारेण तस्याहार्य्यरूपस्याप्यसम्भवात्, शाब्दबोधस्याहार्य्यत्वबादिमतेऽपि सर्व्वत्र तादृशेच्छायां मानाभावेनाहार्य्यत्वासम्भवाच्चेति भावः, तद्वाक्यजन्यज्ञानेति । अत्र वाक्यजन्यत्वं तत्तज्ज्ञानविशेषपरिचायकम्, अन्यथेतिपदस्य शक्तिज्ञानात् पूर्व्वं तादृशवाक्यजन्यत्वासम्भवेन तद्रूपेण ज्ञानासम्भवात्, तादृशज्ञानन्तु प्रकरणादिनैव सम्पद्यतीति हृदयं, धात्वर्थे=जानातीत्यादौ ज्ञाऽऽदिधात्वर्थे, धात्वर्थताऽवच्छेदके=उवाचेत्यादौ प्रतिपत्त्यनुकूलशब्दरूपवक्त्रर्थताऽवच्छेदकप्रतिपत्त्यादौ, सर्व्वत्रैवेति । अहं पण्डित इत्यादौ,

युष्मदस्मच्छब्दार्थघटितो वाक्यार्थ इति सम्बोध्योच्चारणकर्त्रोरेव युष्मदस्मदोः शक्तिः,

त्वं स्थूलः, अहं स्थूलः, त्वं स्वर्गं भोक्ष्यसे, अहं स्वर्गं भोक्ष्ये,-इत्युभयत्रैव युष्मदस्मदोर्मुख्यत्वात् सम्बोध्योच्चारयितृशरीरत्वाद्-

इत्युक्तेत्यादौ चेत्यर्थः, शक्तीति ।

अत्र विवेचनीयमेतद्—युष्मदस्मदोः सर्वत्रैव सम्बोध्योच्चारयित्रोरेव शक्तत्वे मया त्वयीत्यादिवाक्यादेरुच्चारयितृत्वाभावेन तद्घटकास्मत्पदस्य देव्यादौ शक्तिज्ञानासम्भवात् शाब्दबोधाद्यनुपपत्तिः,

न च तत्रेष्टापत्तिः; तत्तत्पदानां प्रयोगस्य त्वितिपदपरामृष्टतादृशज्ञानतात्पर्यग्राहकतया सार्थक्यादिति वाच्यम् ।

तत्र तत्र सर्वानुभवसिद्धशाब्दस्यापलपितुमशक्यत्वात्, अन्यथा शब्दमात्रस्याप्रामाण्यापत्तेः, अस्मत्पदादेः शक्तिग्रहे देव्यादेरुपस्थित्यसम्भवेन तादृशतात्पर्यग्राहकत्वासम्भवाच्च, प्रकरणादिनेतिपदस्य तादृशतात्पर्यग्रहे तत्तच्छब्दप्रयोगवैयर्थ्याच्च,

न च तत्र देव्याद्युच्चारितत्वभ्रमादेव शक्तिग्रहसम्भव इति वाच्यम् ।

विशेषदर्शिनां तदसम्भवात्, "मया त्वमाप्थ" इत्यादि काव्ये विश्वामित्राद्युच्चरितत्वाभावनिश्चयेऽपि व्युत्पन्नानां शाब्दबोधोदयाच्च, युष्मदस्मत्पदघटितपुराणादिवाक्यानां शाब्दबोधजनने बहुतरासामञ्जस्यापत्तेरिति चेत् ?

अत्र नव्याः—भट्टाचार्यैरेतदापाततः उक्तं, वस्तुगत्या पूर्वोक्तद्विविधे शक्तिर्वाच्या, अहं पण्डित इत्ययं जानातीत्यादिबाधितस्थले च परागत्या इतिपदस्य तादृशज्ञानपरत्वं कल्पनीयम्,

वक्तव्यञ्च स्वघटितवाक्यजन्यज्ञानपरेतिपदघटितवाक्या-तदस्य-क्रियाकर्तृतादृशक्रियाकर्मणोश्च शक्यान्तरत्वम्, उच्चारयितर्यस्मत्पदस्य शक्तिं कल्पयित्वा तत्र स्वातन्त्र्यविशेषणं दत्तवतां मिश्राणामप्येतदनुमतं नासीति प्राहुः,

शरीरात्मरूपशक्यभेदेन तयोः शक्तिभेदमाह—त्वं स्थूल इत्यादि, सम्बोध्य इति । अवच्छेदकतासम्बन्धेन तत्पदजन्यबोधाश्रयत्वेनेच्छाविषयताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्ने युष्मत्पदस्य, स्वोच्चारणानुकूलकृत्यवच्छेदकताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नेऽस्मत्पदस्य च शक्तिरित्यर्थः, स च धर्मः शरीरनिष्ठतज्जातिविशेषः, सम्बोध्योच्चा-

शात्मनोर्द्वयोरेव युष्मदस्मदर्थत्वं बोध्यम् ।

सर्व्वे घटा रूपवन्त इत्यादौ सर्व्वपदादुद्देश्यताऽवच्छेदकघटत्वावच्छिन्नस्याशेषताप्रतीतेरशेषत्वं सर्व्वपदार्थः,

नन्वशेषत्वं न विधेयशून्यात्वृत्तितदुद्देश्यताऽवच्छेदकवत्त्वं, केवलान्वयिनो यत्र विधेयता तत्र विधेयशून्यत्वस्याप्रसिद्धेः, यत्र वा विधेयशून्य उद्देश्यताऽवच्छेदकीयसम्बन्धविशेषेण वृत्तेरप्रसिद्धिः; तत्र सर्व्वे घटा जातिमन्त इत्यादौ गत्यन्तराभावापत्तेश्च, पदान्तरादुपस्थित उद्देश्यताऽवच्छेदकघटत्वादिविशिष्टे सर्व्वपदोपस्थाप्यावि

रविशेषात्मनोस्तु तादृशयोस्तत्तच्छरीरावच्छिन्नात्मनोरेव तयोः शक्यत्वात्, अन्यथा त्वमहं वा जानामीत्यादौ विकल्पानुपपत्तेः, उभयपदजन्योपस्थितयोरात्मत्वेनात्मनोरविशेषात्,

एवमहं जानामीत्यादावात्मत्वसामानाधिकरण्येन ज्ञानादेरन्वयोपगमेन तादृशनिश्चयकालेऽहं न जानामीत्यादिप्रतीत्यापत्ते, धर्म्मिविशेषमन्तर्भाव्य प्रतिबध्यप्रतिबन्धकभावस्य तु नव्यैरस्वीकाराच्चेति दिक्।

इति युष्मदस्मत्पदशक्तिविचारविवृति ।

यद्धर्मावगाहनं सत् समग्र एवोद्देश्यविधेयभावगाहते स एव धर्म्म इति फलितम्, सर्व्वपदार्थ इति । अत्र पदार्थत्वं पदार्थताऽवच्छेदकसाधारणं तत्पदजन्यबोधविषयत्वेनेश्वरेच्छाविषयत्वं, तेनाशेषत्वस्य प्रवृत्तिनिमित्तत्वेऽपि न क्षतिः,

येन समग्र एवोद्देश्यविधेयवत्ताप्रतीतिस्तादृशाशेषत्वं निर्वक्ति—नन्वशेषत्वमिति । यत्रेति । सर्व्वे घटाः प्रमेया इत्यादौ,

ननु व्यतिरेकिविधेयस्थले तथाऽस्तु केवलान्वयिविधेयस्थले तु सर्व्वपदस्योद्देश्यताऽवच्छेदकव्यापकसमुदायत्वावच्छिन्नबोधकत्वमस्त्वित्यत आह—यत्र वेति ।

ननूद्देश्यताऽवच्छेदकताघटकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन सम्बन्धसामान्यावच्छिन्नविधेयवत्त्वं घटादिस्वाभावद्देश्यताऽवच्छेदकत्वविवक्षणे नोक्तदोष इत्यत आह—पदान्तरेति । घटादिपदा·

धेयव्याप्तिविशिष्टघटत्वाद्यवच्छिन्नस्य कथञ्चिदन्वयसम्भवेऽप्यनुभवविरोधाच्च,

घटत्वत्वाद्यनुपस्थितिदशायामपि सर्वे घटा इत्यादिवाक्यादन्वयबोधस्यानुभविकतया व्याप्यत्वेनैव घटत्वादेः सर्वपदार्थत्वस्य स्वीकरणीयतया तज्जन्यव्याप्तिबोधस्य निर्धर्म्मितावच्छेदककतया विपरीतज्ञानाविरोधित्वेनाकिञ्चित्करतापाताच्च,

नापि तदुद्देश्यताऽवच्छेदकव्यापकतवद्विधेयवत्त्वं; तदवच्छिन्ने विधेयानन्वयप्रसङ्गात्,

नापि विधेयान्वयिव्यापकतापर्य्यन्तमेव सर्वपदार्थः, नामार्थद्वयस्य भेदान्वयस्याव्युत्पन्नत्वात्,

नाप्यभेदेन रूपवदाद्यात्मकविधेयान्वयी घटत्वादिव्यापक एव तदर्थः; तथा सति सर्वे वेदाः प्रमाणमित्यादौ सर्वपदस्य प्र-

दित्यर्थः, अन्वयसम्भव इति । तदंशे तादृशव्याप्त्यधिकावगाहित्वेति भावः,

अनुभवविरोधस्य सविवादतया दोषान्तरमाह—घटत्वत्वाद्यनुपस्थितीति । विपरीतज्ञानाविरोधित्वेनेति । घटत्वं रूपाभाववद्वृत्तीति निश्चयकाले सर्वे घटा रूपवन्त इति प्रत्ययापत्त्येति भावः, तद्विधेयवत्त्वमिति । अशेषत्वमिति शेषः, स्वरूपतो घटत्वादेरुद्देश्यताऽवच्छेदकत्वं घटनिष्ठाभावाप्रयोगित्वं घटत्वत्वेन तादृशस्थले घटत्ववन्निष्ठाभावाप्रतियोगित्वं व्यापकत्वं, तदवच्छिन्ने=तादृशविधेयवदवच्छिन्ने, अनन्वयप्रसङ्गादिति । उद्देश्यताऽवच्छेदकविधेययोरैक्यादिति भावः, व्यापकतापर्य्यन्तम्=उद्देश्यताऽवच्छेदकव्यापकतामात्रम्, तस्य च विधेय एवान्वयो भवेदिति लाभाय विधेयान्वयीति विशेषणम्, भेदान्वयस्य=भेदसंबन्धेनान्वयस्य, तथा च 'रूपाभाववद्वृत्तिघटत्ववदभिन्ना घटा रूपवदभिन्ना' इत्याकारको बोध इति स्वरूपसंबन्धेन घटपदार्थादौ तस्यान्वयो न भवितुमर्हतीति भावः, रूपवदाद्यात्मकविधेयेति । मतुपः सम्बन्धार्थकतया रूपसम्बन्धिविधेयार्थः, ⁎अत्र व्याप्यता चोद्देश्यताऽवच्छेदकताघटकसम्बन्धेन, व्यापकता च विधेयताऽवच्छेदकसम्बन्धेन, अत्र च विधेयत्वं तादात्म्यसम्बन्धेन,

एवञ्च घटत्वव्यापकाभिन्नरूपसम्बन्ध्यभिन्नो घट इत्याकारक-

माणपदेनैव सामानाधिकरण्यात् तत्समानलिङ्गवचनत्वापत्तेः,

सर्व्वे घटा वर्त्तन्त इत्यादौ क्रियारूपविधेये व्यापकस्या भेदान्वये सर्व्वपदस्य नपुंसकत्वापत्तेर्व्यापकताया भेदान्वयोपगमे नामार्थनात्वर्थयोर्भेदान्वयविरहनियमभङ्गापत्तेः,

पत्तरीयन्त्र न सर्वपदार्थः; उद्देश्यताऽवच्छेदकावच्छेदेन विधे यान्वयोपगमादेव तल्लाभोपपत्तेः, किन्त्वनेकत्वमेव,

---

शाब्दबोधः, तथा सति=सर्व्वपदार्थस्य विधेयादौ विशेषणत्वे सति, समानवचनत्वादिति । अभेदेन तदर्थेन सह स्वार्थान्वयबोधसाकाङ्क्षत्वा दिति, विभिन्नप्रवृत्तिनिमित्तकस्य सत्येकधर्म्मिप्रतिपादकत्वासाधकत्वा दित्यपि व्याचक्षत,

तत्प्रमाणमिति । सर्व्वे वेदा प्रमाणमित्येव प्रयोग स्यात्, सविभक्तिक नामद्वयजन्याभेदान्वयस्थलेऽसति बाधके समानलिङ्गवचनस्यैव तन्त्र त्वात्, तथा च प्राच्यैरुक्तं—

विशेष्यस्यैव यल्लिङ्गं विभक्तिवचने च ये ।

तानि सर्व्वाणि योज्यानि विशेषणपदेष्वपि ॥ इति,

नन्वत्र वेदा इत्यनेन प्रमाणमित्यस्य कथं समानवचनलिङ्गकत्व ने ति चेद् ?

न-प्रमाणपदस्य सर्व्वदैव नपुंसकलिङ्गत्व बहुवचनबाधकसत्त्वात्, अ समानवचनकत्वस्य तु व्युत्पत्तिवादग्रन्थादौ स्वयमुपपादितत्वादिति,

धात्वर्थविधेयकस्थलेऽपि दोष दर्शयति—सर्व्वे घटा वर्त्तन्त इति । नपुंसकत्वापत्तेति । इदमुपलक्षणम्, एकवचनत्वापत्तिरपि बोध्या, तथा च सर्व्वे घटा वर्त्तन्त इति प्रयोगापत्तिरिति, क्रियाविशेषणानामेकत्व नपुंसकत्वञ्चेत्यनुशासनादिति भाव,

इदञ्च-आख्यातार्थविधेयताघटादिभाणिकारमते, अन्यथाऽऽख्यातार्था श्रयस्यैव विधेयत्वेन धात्वर्थस्य विधेयत्वासम्भवः स्यात्, तद् दाष्यात्वसार्थक्ल्पेऽप्युक्तदोषासम्भवेन दोषान्तरमाह—नमर्थेति ।

प्रकारान्तरं दूषयितुमुपक्रमयति—यत्त्विति । तल्लाभोपपत्ते =भेदान्वय लाभोपपत्तेः, उद्देश्यताऽवच्छेदकावच्छेदेनेति । उद्देश्यताऽवच्छेदकावच्छेदेन ध्रु=उद्देश्यताऽवच्छेदकव्यापकविधेयप्रतियोगिक, तच्च संसर्गमर्यादया विधेयताऽवच्छेदकसमर्पणमात्रेण, तथा च समर्पणादपि समावर्ध्य

अनेकत्वञ्च–उद्देश्यताऽवच्छेदकसमानाधिकरणभेदप्रतियोगित्वम्, अत एव सर्व्वं गगनं शब्दवदित्यादयो न प्रयोगाः,

एवञ्च सर्व्वे घटा इत्यादौ घटनिष्ठान्योन्याभावप्रतियोग्यभिन्ना-घटा इत्ययमर्थः प्रतीयते,

न चैवं घटत्वादिसामानाधिकरण्यमात्रेण विधेयान्वयतात्पर्य्येण सर्व्वे घटा नीला इत्यादिप्रयोगापत्तिः ?

सर्व्वपदार्थविशेषित उद्देश्यताऽवच्छेदकावच्छेदेनैव विधेयान्वय-नियमात्, सर्व्वं प्रमेयमित्यादौ प्रमेयादिविधेयक उद्देश्यवाचकघटत्वा-दिपदमध्याहृत्यैव प्रतीतिः, अन्यथोद्देश्यताऽवच्छेदकीभूतव्याप्यध-र्म्मानुपस्थित्या तद्व्यापकत्वार्थकत्वेऽप्यनुपपत्तेरिति,

तदपि न युज्यते–गगनादावपि द्वित्वाद्यवच्छिन्नतद्भेदसत्त्वेन सर्व्वपदस्यानेकार्थत्वमभ्युपगम्यापि सर्व्वं गगनमित्यादिप्रयोगस्य दुर्वा-रत्वात्, तत्तदुद्देश्यताऽवच्छेदकसमानाधिकरणभेदप्रतियोगिताऽवच्छेद-कत्वस्य तत्तदुद्देश्यताऽवच्छेदके सर्व्वत्र बाधितत्वेन तत्प्रतीतेः दुरु-पगमत्वात्,

---

कारेण नीलांशे घटत्वव्यापकत्वबाधात् सर्व्वे घटा नीला इति ना-म्नान्तानां बोध इति हृदयं, न प्रयोग इति । विशेषदर्शिनामिति शेषः, गगनस्यैकत्वेन गगननिष्ठभेदप्रतियोगित्वस्य गगने बाधादिति, तद्भे-दसत्त्वेनेत्यगगनभेदसत्त्वेनेत्यर्थः, गगनं न घटपटोभयमित्यादिप्रतीत्यै-कदेशावृत्तिधर्म्मावच्छेदेन व्यासज्यवृत्तिधर्म्मावच्छिन्नभेदस्वीकारात्, एवञ्च गगननिष्ठभेदप्रतियोगित्वं गगनेऽबाधितमिति,

ननूद्देश्यताऽवच्छेदकसमानाधिकरणभेदप्रतियोगिताऽवच्छेदकोद्देश्य-ताऽवच्छेदकत्वमेवानेकत्वं; तथा च सर्व्वं गगनमित्यादौ गगनत्वादेर्मा-त्रस्योद्देश्यताऽवच्छेदकतया न तद्द्वित्वाद्यवच्छिन्नभेदमादाय दोष इत्यत-आह–तत्तदुद्देश्यताऽवच्छेदकेति ।

बाधितत्वेनेति । घटत्वादौ घटत्वसमानाधिकरणभेदप्रतियोगिताऽव-च्छेदकत्वस्य बाधितत्वेनेत्यर्थः,

ननु द्वित्वाद्यवच्छिन्नभेदस्याव्याप्यवृत्तितया प्रतियोगिवृत्तित्वेन प्रतियोग्यवृत्तित्वविशेषणेनैव तद्वारणं सम्भवतीत्यतस्तद् दूषयति–सामान्यत-

सामान्यतः प्रतियोगिवृत्त्यन्यत्वस्य वृत्तिमदवृत्तित्वात्, स्वप्रतियोगिवृत्तयो ये ये तद्भेदकूटस्य दुरुपगमतया तद्विशेषणेन द्वित्वाद्यवच्छिन्नभेदव्यावृत्तेरपि हेयत्वात्,

अस्तु वा यथा कथञ्चित् तद्व्यावृत्तिः, तथाऽप्यनेकत्वमात्रस्य सर्व्वपदार्थत्वेऽवच्छेदकावच्छेदेनान्वयेऽवच्छेदकैकदेशव्यापकतया बोधस्यानुभवविरुद्धतया सर्व्वे घटा रूपवन्त इत्यादौ घटनिष्ठभेदप्रतियोगिघटत्वस्योद्देश्यताऽवच्छेदकतया शुद्धघटत्वादिव्यापकत्वभानानुपपत्त्या घटत्वसामानाधिकरण्येन रूपादिमदन्यत्वनिश्चयदशायां तादृशवाक्याच्छाब्दबोधापत्तिर्दुर्व्वारैव,

---

इति । स्वत्वानन्तर्भावनस्यार्थ, वृत्तिमदवृत्तित्वादिति । वृत्तिमन्मात्रस्यैव वृत्तित्वसत्त्वादिति, दुरुपगमतयेति । द्वित्वाद्यवच्छिन्नप्रतियोगितानां स्वप्रतियोगिवृत्तीनां भेदानामनन्ततया तत्तद्व्यक्तित्वेन तेषां योगज धर्म्मं विनाऽबोध्यतयेत्यर्थः,

ननु स्वनिरूपकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेन प्रतियोगिताविशिष्टान्यत्वस्य निवेशनीयत्वेन तज्ज्ञानस्य सुलभतया दोषान्तरमाह-तथाऽपीति । अनुभवविरुद्धतयेति पुरुषत्वसामानाधिकरण्येन पुरुषो न दुःखवानिति निश्चयानन्तरं रोगवान् पुरुषो दुःखवानिति बाधमात्रस्यैतादृशनिश्चयमात्रानन्तरं पुरुषो न दुःखवानिति तादृशबोधस्य च सर्व्वानुभवसिद्धत्वात्, धूमवद् द्रव्यं वह्निमदिति निश्चयसत्त्वे वह्न्यभाववति द्रव्यान्तरे, कमलं पुष्पं सुगन्धीति निश्चयानन्तरं पुष्पान्तरे सर्व्वस्यावच्छेदकावच्छेदेन प्रवृत्त्यभावदर्शनाच्च, एकदेशीभूतवह्नित्वपुष्पत्वाद्यवच्छेदेन तद्वत्ताभानोपगमे तादृशप्रवृत्त्युपपत्तेर्दुर्व्वारत्वादिति भावः,

दुर्वारैवेति । तादृशज्ञानजन्यबोधस्य शुद्धघटत्वव्यापकताघटितरूपघटत्वावच्छेदत्वानवगाहितया, अतस्तादृशबोधं प्रति घटत्वसामानाधिकरण्येन रूपवदन्यत्वनिश्चयस्याप्रतिबन्धकत्वात्, प्रतिबन्धकत्वाच्च तादृशव्यापकत्वावगाहितादृशबुद्धेः प्रतीति,

यदि च नीलघटो नास्तीत्यादिप्रतीतौ नीलादेस्तादृशाभावप्रतियोगिताऽवच्छेदकत्वानवगाहनेऽपि प्रतियोग्यंशे उपलक्षणविधया भानं तत्रापि तादृशानेकत्वस्य व्यापकत्वांशेऽनवगाहनेऽप्युद्देश्यताऽवच्छेदकघटकतया भानं यदि प्रामाणिकं तदाऽस्याद्—

एवं विशेष्यताऽवच्छेदकव्यापकताया विशेषणसंसर्गांशे संसर्ग-विशेषणीभूतविशेषणांशे वा भानात् सर्वेषु घटेषु रूपमित्यादौ घटत्वादेर्विशेष्यताऽनवच्छेदकत्वेन रूपादौ तद्व्यापकत्वभानं दुर्लभमापद्येत,

न च तत्र सप्तम्यर्थाधेयत्वादौ निरूपकत्वसम्बन्धावच्छिन्न-व्यापकतासम्बन्धेनैव प्रकृत्यर्थस्य घटादेरन्वयः स्वीक्रियते घटादेर्विशेष्यता च तादात्म्यसम्बन्धेन, व्यापकता च यादृशरूपावच्छिन्न-आधेयत्वादेरन्वयस्तदवच्छिन्ननिष्ठाधेयतात्वसंसर्गावच्छिन्ना, अतो-रूपनिष्ठाधेयत्वादेराधेयतात्वादिना द्रव्यादिव्यापकत्वेऽपि नातिप्रसङ्गः, रूपनिष्ठाधेयत्वादिनाऽऽधेयत्वादेः पदानुपस्थितत्वेऽपि न

एवं विशेष्यतेति। समवच्छेद्यस्थावगाहिबुद्धौ विधेयताऽवच्छेदकसंसर्गांश-उद्देश्यताऽवच्छेदकव्यापकत्वस्य भाने समवायस्यैक्यमते तस्य द्रव्यस्याव्यापकतया द्रव्यत्वावच्छेदेन द्रव्यं रूपवदिति प्रतीतेरयाथार्थ्यकतयाऽभ्रान्तस्यापि तादृशप्रतीत्यापत्तेः, विशिष्टवैशिष्ट्यावगाहिबोधे विधेयप्रतियोगित्वेन तादृशसंसर्गस्य भाने मानाभावाच्चाह— संसर्गविशेषणीभूतविशेषणांश इति। विधेयताऽवच्छेदकसंसर्गांशे विशेषणस्य विधेयप्रतियोगित्वस्य तद्घटकविधेयांशे इत्यर्थः,

तथा चावच्छेदकावच्छेदेनावगाहित्वाद्युद्देश्यताऽवच्छेदकव्यापकविधेयप्रतियोगित्वस्यैव भानात् रूपादौ द्रव्यत्वव्यापकत्वविरहेण तज्ज्ञाने भ्रम एवेति नाभ्रान्तानां तथाविधबोधः, निरूपकतासम्बन्धावच्छिन्ने तादात्म्यसम्बन्धेन प्रकृत्यर्थनिष्ठाभावीया या निरूपकत्वसम्बन्धावच्छिन्नप्रतियोगिता तदभावः,

तथा च स्वनिष्ठावच्छेदकताकसम्बन्धिनिष्ठावच्छेदकताकवृत्तिता-स्वावच्छेदकताकाभावत्वावच्छिन्नावच्छेदकताकप्रतियोगिताख्यावच्छिन्नावच्छेदकताकाभावत्वमेव सम्बन्धो; अतः स्वस्य व्यापकताघटकतया प्रथमपदार्थे स्वस्मिन् स्वप्रतियोगित्वविरहेऽपि न क्षतिः,

केचित्तु—आपाततः प्रतियोगित्वं स्वीकृत्य शङ्कितं, तदभावेनाऽपि खण्डितमित्याहुः,

तदवच्छिन्नत्वेऽपि। तथा च प्रकृत्यर्थनिष्ठाभावप्रतियोगिताऽवच्छेदकघटादिनिष्ठाधेयताख्येव सम्बन्धः, नाऽन्यथा इति। न सर्वेषु घटेषु

क्षतिः, तथा सत्यपि तादृशस्य संसर्गघटकतया भानेऽविरोधादिति वाच्यम् ?

उक्तव्यापकतायाः संसर्गत्वे मानाभावात्,

अस्तु वोद्देश्यविधेययोर्विशेष्यविशेषणता, वैपरीत्येऽपि विधेयांशे उद्देश्यताऽवच्छेदकव्यापकत्वस्योद्देश्यविधेयभावमहिम्नैव संसर्गतयैव भानम्,

भवतु चोद्देश्यस्य विशेषणतयोपस्थितस्यापि विधेये पारतन्त्र्येणान्वयो व्युत्पत्त्यविरुद्धः, नामार्थयोरपि पारतन्त्र्येण भेदेनान्वयो मा व्युत्पत्तिं विरौत्सीत्, तथाऽपि सर्वपदस्य यत्र विधेयवाचकपदसामानाधिकरण्यं तत्र विधेयताऽवच्छेदकांशे उद्देश्यस्य तद्-

---

नील इत्यादिप्रत्ययप्रसङ्ग, न क्षतिः=न तादृशशाब्दबोधानुपपत्तिरिति, मानाभावादिति । तादृशव्यापकतायाः संसर्गत्वस्यान्यत्राक्लृप्तत्वाद्,अत्र तत्कल्पने तादृशसम्बन्धघटिततात्पर्यज्ञानादेरपि कारणत्वकल्पनाऽऽपत्त्या गौरवस्यैव बाधकत्वादिति,

यत्तु यत्र मासमधीत इत्यादावनुशासनं; तत्रैव व्यापकतायाः संसर्गतया मानमिति भाव इति,

तत्तुच्छ-फलमुखगौरवं न दोषायेत्यतस्तत्स्वीकृत्य; दोषान्तरमाह—अस्तु वेति। वैपरीत्येऽपीति । अत्रोद्देश्यस्य विशेषणत्वं विधेयस्य रूपत्वादेर्विशेष्यत्वमिति वैपरीत्येऽपि, विधेयांश इति । पारतन्त्र्येणोद्देश्यमानमभिप्रेत्य, महिम्नैवेति। उद्देश्यविधेयभावप्रयोजकसामर्थ्यैवेत्यर्थः, तृतीयाऽर्थः प्रयोज्यत्वं, तस्य च मानमित्यत्रान्वयः,

ननु सप्तम्यर्थाधेयत्वविशेषणतयोपस्थितस्य घटादेर्घटत्वादिव्यापकतासम्बन्धेन विधेये रूपादौ कुतोऽन्वयः ? एकविशेषणतयोपस्थितस्यान्यत्र विशेषणतयाऽन्वयस्य व्युत्पत्तिविरुद्धत्वादित्यत आह—भवतु वेति ।

तथा च तादृशनियमः स्वातन्त्र्येणान्वय एवेति नामार्थयोर्भेदान्वयस्य व्युत्पत्तिविरुद्धत्वं स्वातन्त्र्येणान्वय एवेत्याह-नमार्थेति ।मेति। द्रव्येसर्वाणि रूपाणीत्यादौ,सामानाधिकरण्यमित्यस्य तादृशपदेनाभेदान्वयसाकाङ्क्षत्वमर्थः , विधेयताऽवच्छेदकांशे=रूपत्वादौ, उद्देश्यस्य=द्रव्यादेः,

सम्बन्धस्य वाऽनुभवसिद्धो व्याप्तिबोधो दुरुपपादः,

एवं घटे न सर्व्वाणि रूपाणि; अपि तु कानि चिदेवेत्यादौ रूपनिष्ठभेदप्रतियोगिरूपत्वावच्छिन्नाभावो घटादौ बाधित एवेत्ययोग्यताऽऽपत्तिः,

न च तादृशरूपत्वादिसामानाधिकरण्येन घटादिवृत्तित्वाभावः प्रतीयते स चाबाधित एव; नञ्समभिव्याहारस्थलेऽशेषत्वभानानुपगमे क्षतिविरहादिति वाच्यम् ?

एवं सति तत्र घटस्योद्देश्यत्वानिर्व्वाहाद्, न च तत्र रूपस्यो-

---

तत्सम्बन्धस्यान्ततत्प्रतियोगिकसम्बन्धस्य, अनुभवसिद्ध इति । अन्यथा घटे सर्व्वाणि रूपाणीत्यादिप्रयोगापत्तेः, रूपनिष्ठभेदप्रतियोगिरूपे घटवृत्तित्वस्याबाधादिति,

व्याप्तिबोध इति । व्याप्यताऽवच्छेदकत्वबोध इत्यर्थः, व्यापकता च तादात्म्येन, व्याप्यता च विधेयान्वयिवृत्तिताघटसम्बन्धेन, तथा च तादात्म्येन द्रव्यवदन्यावृत्तित्वरूपव्याप्यत्वलाभः,

अथ वा सर्व्वे घटा इत्यादौ यथा विधेय उद्देश्यताऽवच्छेदकव्यापकत्वं भासते तथा द्रव्ये सर्व्वाणीत्यादौ विधेयताऽवच्छेदकव्यापकत्वस्योद्देश्ये भानमभिप्रेत्य विधेयताऽवच्छेदके व्याप्यत्वमुक्तं, दुरुपपाद इति । तद्बोधकपदाभावाद्, उद्देश्यविधेयभावप्रयोजकसाम्यग्या व्यापकताबोधकत्वस्यैव कल्पितत्वाच्चेति भावः,

ननु यथोद्देश्यपदसमानाधिकरणसर्व्वपदस्थले उद्देश्यविधेयभावमहिम्नैव पारतन्त्र्येणोद्देश्यताऽवच्छेदकव्यापकत्वस्य विधेये भानं भवति तथा विधेयवाचकपदसमानाधिकरणसर्व्वपदस्थले विधेयताऽवच्छेदकव्यापकत्वमुद्देश्ये व्याप्यताऽवच्छेदकत्वं विधेयताऽवच्छेदकेऽवगाहते, एवञ्च तन्मते न कोऽपि दोष इत्यत आह—एवं घटे न सर्व्वाणीति । रूपनिष्ठभेदप्रतियोगीति । अत्र सर्व्वपदार्थरूपघटत्वादिसमानाधिकरणभेदप्रतियोगिविशेषितरूपपदार्थान्वितनञर्थाभावो घटादौ प्रतीयते, तत्र नञर्थाभावादावनेकत्वरूपत्वाद्यवच्छिन्नप्रतियोगिताकत्वसम्बन्धेन तादृशरूपादेरन्वयः, अतो रूपत्वावच्छिन्नेत्युक्तम् ,

उद्देश्यत्वानिर्व्वाहादिति । रूपांशे मुख्यविशेष्यताऽऽपन्नस्य स्वांशे मुख्यप्रकारताऽऽपन्नस्याधेयत्वसम्बन्धावच्छिन्नवृत्तित्वद्वारा प्रकारताऽऽपन्न-

देश्यत्वं ? प्रथममनिर्दिष्टत्वात्,

अत्रोच्यते–उद्देश्यताऽवच्छेदकव्यापकविधेयव्याप्यपर्य्याप्तिको-धर्म्मः सर्व्वपदप्रवृत्तिनिमित्तं, सर्व्वे घटा इत्यादौ तथाविधधर्म्मो-घटादिनिष्ठयावत्त्वमेव, तस्य व्यासज्यवृत्तितया तत्पर्य्याप्तेर्घटत्व-व्यापकत्वाद्रूपादिव्याप्यत्वाच्च, शब्दाद् घटत्वादिव्यापकरूपादि-व्याप्यत्वलाभे तयोरपि व्याप्यव्यापकभावोऽर्थत एव लभ्यते, द्रव्य-त्वव्यापकपर्य्याप्तेः रूपाद्यव्याप्यत्वात् सर्व्वाणि द्रव्याणि रूपवन्ती-त्यादावयोग्यता,

---

स्यैव वा स्वांश उद्देश्यत्वनियमाद्भावस्य विधेयत्वाच्चेति भावः,

प्रथमेति। उद्देश्यविधेयभावेन पर्व्वतो वह्निमानित्यादिव्यवहारादस्ति वाचकउद्देश्यवाचकपदस्य प्राङ्निर्देशावश्यकत्वात्, तथा च प्राच्यैरुक्तम्––

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेदिति,

अत एव "न्यक्कारो ह्ययमेवे"त्यादावुद्देश्यवाचकस्येदम्पदस्य परवर्त्तित्वेनालङ्कारिकाणां विधेयाप्रतिपत्तिरूपविधेयाविमर्शदोषप्रदानं सङ्गच्छते,

वस्तुतस्तु–एतद्दोषे ग्रन्थकारस्य न निर्भरः, किन्त्वेतत्कल्पे कुसृष्टिकल्पनाऽऽपत्तावेव, अत एव विधेयवाचकपदस्य नोत्तरवर्त्तित्वमावश्यकं सति तात्पर्य्ये योजनयाऽप्युत्तरवर्त्तित्वादिज्ञानेनोद्देश्यविधेयभावप्रतिपत्तिर्भवतीत्यवयवग्रन्थे स्वयमेव लिखितम्,

एतेन दध्ना जुहोतीत्यादावुत्तरवर्त्तिजुहोतेरर्थस्य; एवं "निःशेषच्युतचन्दनं स्तनतटमि"त्यादावुद्देश्यस्य स्तनतटादेरुत्तरवर्त्तित्वेऽपि न तदर्थस्योद्देश्यत्वहानिः, न वा तस्य दुष्टकाव्यत्वमित्यलं विस्तरेणेति पूर्व्वपक्षः।

घटत्वव्यापकत्वादिति । व्यासज्यवृत्तिधर्म्मप्रतियोगिकपर्य्याप्तेरधिकरणभेदेन भेदाभावादेकत्वादिति भावः, घटत्वादीति। घटत्वादिव्यापकस्वरूपादिव्याप्यत्वयोर्लाभ इत्यर्थः, पर्य्याप्ताविति शेषः, तयोरपीति। घटत्वादिरूपाद्योरित्यर्थः,

न च सर्व्वे घटा रूपवन्त इति निश्चयस्यैकदेशाव्यापकतामानानङ्गीकर्त्तृनये घटत्वावच्छेदत्वानवगाहनादप्रतिबन्धकत्वेन तदुत्तरं सामानाधिकरण्येन घटो न रूपवानिति बुद्ध्युत्पत्तिर्दुर्व्वारेति वाच्यम् ?

अगत्या सर्व्वपदार्थविशेषिततत्तद्धर्म्मावच्छिन्ने रूपादिमत्तानिश्चयस्य

उद्देश्यताऽवच्छेदकव्यापकत्वञ्च–तत्समानाधिकरणान्योन्याभावप्रतियोगिताऽनवच्छेदकत्वं, तेन रूपादिव्याप्यपर्य्याप्तेर्द्रव्यत्वादिमन्निष्ठात्यन्ताभावप्रतियोगिताऽनवच्छेदकधर्मवत्त्वेऽपि न क्षतिः, घटत्वादिव्यापकयावत्त्वपर्य्याप्तिश्च न घटादिव्यक्तिभेदाद्वियतेऽतो न घटत्वादिव्यापकताया अनुपपत्तिः,

---

स्वातन्त्र्येण प्रतिबन्धकत्वकल्पनात्,

वस्तुतस्तु–अर्थत एव=स्वतन्त्रसामग्रीवशेनैव, पारतन्त्र्येणेति शेषः, तथा च पारतन्त्र्येण घटत्वावच्छेदेन रूपवत्त्वावगाहनाच्च तदापत्तेरिति भावः,

अथ वा—अर्थत एव=तन्मूलकादनुमानत एव, लभ्यते=ज्ञायते, तथा च यद्व्यापकं यद्व्याप्यं भवति तत्तद्व्याप्यं भवतीत्युदाहरणादिति भावः,

तत्समानाधिकरणान्योन्याभावेति । उद्देश्यताऽवच्छेदक सामानाधिकरण्यञ्च तदधिकरणवृत्तित्वं, तदधिकरणत्वञ्च–उद्देश्यताऽवच्छेदकसम्बन्धेन, तेन जन्यनिष्ठयावत्त्वप्रतियोगिकपर्य्याप्तेरपि कालिकेन महाकालाव्यद्रव्यत्वाधिकरणनिष्ठान्योन्याभावप्रतियोगिताऽनवच्छेदकत्वेऽपि न सर्व्वंकालाव्यद्रव्यं जन्यमित्यादिप्रयोगः, न वा घटाद्यनुयोगिकसमवायेन द्रव्यत्ववन्निष्ठान्योन्याभावप्रतियोगिताऽनवच्छेदकघटादिनिष्ठयावत्त्वपर्य्याप्तिमादाय; सर्व्वं द्रव्यं रूपवदित्यादयोऽपि, तत्र प्रतियोगित्वञ्च-अवच्छेदकताविशिष्टान्यत्वेन विशेषणीयं, तेन तत्पर्य्याप्तिमत्पटोभयनेत्यादिभेदप्रतियोगिताऽवच्छेदकत्वेऽपि न व्यापकत्वभङ्गः, वैशिष्ट्यञ्च, स्वनिरूपितत्वस्वभिन्नावच्छेदकतानिरूपितत्वोभयसम्बन्धेन, स्वमवच्छेदकत्वं, तादृशप्रतियोगिताऽवच्छेदकत्वमपि तादृशं निवेशनीयं, तेन तद्घटवृत्तित्वविशिष्टतत्पर्य्याप्तिमद्भेदमादाय न दोषः,

ननु तद्वन्निष्ठात्यन्ताभावप्रतियोगिताऽनवच्छेदकधर्म्मवत्त्वरूपव्यापकत्वविवक्षणे का क्षतिः? इत्यत आह–तेनेत्यादि । तादृशप्रतियोगिताऽनवच्छेदकधर्म्मश्च सम्बन्धत्वादिः,

ननु घटादिनिष्ठयावत्त्वप्रतियोगिकपर्य्याप्तेर्घटादिभेदेन भिन्नत्वे चालनीन्यायेनाव्यघटनिष्ठभेदप्रतियोगिताऽवच्छेदकत्वस्यान्यघटानुयोगिकपर्य्याप्तौ सत्त्वेन व्यापकत्वं दुर्लभमित्यत आह–घटादीति । केवला

विधेयव्याप्यत्वञ्च—व्यभिचारित्वसम्बन्धावच्छिन्नप्रतियोगिताकतद्विधेयताऽवच्छेदकावच्छिन्नतत्तद्विधेयाभाववत्त्वम्, अतो विधेयताऽवच्छेदकावच्छिन्नस्य यत्र केवलान्वयित्वं तत्र नाप्रसिद्धिः, व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकस्यैव तथाविधाभावस्य प्रसिद्धत्वात्, अत्रोद्देश्यताविधेयताऽवच्छेदकघटत्वरूपत्वादीनामुपलक्षणतयाऽनुगमकं तादृशावच्छेदकत्वमेवातो न शक्त्यानन्त्यं न वाऽपूर्व्वधर्म्मव्यापकत्वभानानुपपत्तिः,

यद्यपि सामान्यत उद्देश्यताऽवच्छेदकत्वमव्यावर्त्तकमेव, उद्देश्यताऽवच्छेदकविधया स्वसमभिव्याहृतपदप्रतिपाद्यत्वञ्च तादृशपदजन्यशाब्दबोधात् प्राक् दुर्ग्रहं; तथाऽपि तादृशपदप्रतिपाद्यत्वेन वक्तृबुद्धिविषयत्वं तात्पर्य्यस्य वा विषयत्वं तथा वाच्यं, तच्च प्रकरणादिना पूर्व्वमपि ग्रहीतुं शक्यते, स्वत्वाननुगमः पूर्व्ववत् समाधेयः,

व्याप्यविधेयकस्थल उपपादयितुमाह—विधेयव्याप्यत्वञ्चेति। व्यभिचारित्वमत्र विधेयताऽवच्छेदकसम्बन्धेनाभावघटित, तेन न सर्व्वं जलं द्रव्यत्वमित्यादिप्रयोगः,

इदमुपलक्षणं—सर्व्वे नीला घटा रूपमित्यादिस्वरूपतो विधेयस्थले विधेयवन्निष्ठवृत्तित्वाभावघटितस्यैव व्याप्तित्वं बोध्यं, तावच्छिन्ननिरवच्छिन्नविधेयभेदेन शक्तिभेदस्येष्टत्वात्, केवलान्वयिधर्म्मस्य स्वरूपतो भासासम्भवेन न तत्र गतिविरहः,

नन्वेव रीत्या सर्व्वपदस्य शक्तिनिर्व्वचन उद्देश्यताऽवच्छेदकविधेयभेदेन नानाऽर्थत्वप्रसङ्ग इत्यत आह—अत्रोद्देश्येत्यादि। अपूर्व्वेति। व्यवहारादितः पूर्व्वगृहीतशक्तिकमानानुपपत्तिरित्यर्थः, अव्यावर्त्तकम्=इतराव्यवच्छेदकं, दुर्ग्रहमिति। केनापि प्रमाणेन निश्चेतुमशक्यमित्यर्थः, प्रकरणादिना—हेतुनेति यावत्, ग्रहीतुम्=अनुमातुं, तथा चेदं वाक्यं स्वजन्यप्रतिपत्तावुद्देश्यताऽवच्छेदकत्वविधेयताकत्वेन तत्तद्धर्म्मविषयताकबुद्धिप्रयोज्यं तत्तत्प्रकरणोपस्थापितत्वादित्यादिरीत्या श्रोतुरनुमितिसम्भवादिति भावः, स्व सर्व्वपदघटितं तादृशं वाक्यं, पूर्व्ववत्=अस्मच्छब्दविचारवत्, समाधेय इति। उद्देश्यताऽवच्छेदकत्वेन स्वघटितवाक्यजन्यप्रतिपाद्यस्वप्रकारकवक्तृबुद्धिविषयतासम्बन्धेन सर्व्वपदार्थविशिष्टधर्म्मव्यापकत्वे सति विधेयताऽवच्छेदकत्वेन तादृशविषयतासम्बन्धेन स-

र्व्वपदविशिष्टधर्म्मवद्वृत्त्या या पर्य्याप्तिस्तत्प्रतियोगितावत्त्वस्य प्रवृत्तिनिमित्तत्वोपपादनीय इत्यर्थः,

ननु सर्व्वे घटा गुणवन्तः; सर्व्वं द्रव्यं रूपवदित्यादिवाक्यद्वयजन्यसमूहालम्बनबोधमादाय तादृशवाक्यद्वयस्य प्रामाण्यापत्तिर्दुर्व्वारैव, द्रव्यगतघटत्वेऽपि तादृशवाक्यजन्यसमूहालम्बनबोधीयविधेयताऽवच्छेदकत्वस्य गुणत्वादावपि सत्त्वेन तद्धर्म्मावच्छिन्नव्याप्यत्वस्य सत्त्वात्,

एवं व्यापकताकुक्षौ सर्व्वपदगतानुपूर्व्वीकत्वानुगतधर्म्मपुरस्कारेण प्रवेशे सर्व्वपदवैशिष्ट्यस्य घटत्व इव पटत्वेऽपि सत्त्वेन घटमात्रतयापत्त्यादेः सर्व्वपदविशिष्टधर्म्मव्यापकत्वासम्भवेन तादृशरूपेण शक्तिर्न निर्व्वाह्येति चेत् ?

न-सर्व्वपदविशिष्टपर्य्याप्तिकधर्म्मस्यैव तत्र सर्व्वपदशक्यताऽवच्छेदकत्वात्, वैशिष्ट्यञ्च—स्वविशिष्टोद्देश्यतावत्त्वसम्बन्धेन, स्वं सर्व्वपदं, स्ववैशिष्ट्यञ्च—स्वघटितवाक्यप्रयोज्यत्वसम्बन्धेन, उद्देश्यतावैशिष्ट्यञ्च—स्वविशिष्टविधेयतावद्धर्म्मावच्छिन्नभेदप्रतियोगिताऽवच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धविशिष्टविधेयतावद्धर्म्मावच्छिन्नव्यभिचारित्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वोभयसम्बन्धेन, स्वद्वयमुद्देश्यत्वपरम्,

प्रथमस्ववैशिष्ट्यञ्च—स्वावच्छेदकत्वनिष्ठप्रकारतानिरूपितत्वस्वप्रयोजकवाक्योच्चारकपुरुषीयबुद्धिनिरूपितत्वोभयसम्बन्धेन,

द्वितीयं वैशिष्ट्यञ्च—स्वनिरूपितविधेयताऽवच्छेदकत्वनिष्ठप्रकारतानिरूपितत्वस्वप्रयोजकवाक्योच्चारकपुरुषीयबुद्धिनिरूपितत्वोभयसम्बन्धेन,

एवञ्चैकैकसमुदाय एकैकसर्व्वपदवैशिष्ट्येनोद्देश्यत्वाविधेयत्वयोर्निरूपितत्वलाभेन न पूर्व्वोक्तदोषः,

सगवत्सङ्केतोऽपि सर्व्वपदवैशिष्ट्योपलक्षितपर्य्याप्तिकधर्म्मावच्छिन्नः सर्व्वपदप्रयोज्य इत्याकारकः, स्वप्रयोज्यत्वस्वविशिष्टपर्य्याप्तिकधर्म्मावच्छिन्नविषयकत्वोभयसम्बन्धेन सर्व्वपदवान् बोधो भवत्वित्याकारको वा बोध्यः, अत्र धर्म्मपदम्-एकत्वावच्छिन्नपर्य्याप्तिकान्यत्वे सति द्वित्वावच्छिन्नानुयोगिताकपर्य्याप्तिकान्यधर्म्मपरं,-तेन सर्व्वं गगनं द्रव्यं, सर्व्वौ गगनमहाकालौ द्रव्यमित्यादयो न प्रयोगाः,

उद्देश्यविधेयभावश्च न विशेष्यविशेषणभावनियतोऽतः सर्व्वेषु घटेषु रूपमित्यादावपि घटत्वादिरूपत्वाद्योरुद्देश्यविधेयताऽवच्छेदकभावोऽक्षत एवेति न घटत्वादिव्यापकरूपत्वावच्छिन्नव्याप्यपर्य्याप्तिकयावत्त्वभानानुपपत्तिः,

इयञ्च व्युत्पत्तिरुद्देश्यवाचकपदसमानाधिकरणसर्व्वपदे, विधेयवाचकपदसमानाधिकरणसर्व्वपदस्य च विधेयताऽवच्छेदकव्यापकोद्देश्यताऽवच्छेदकावच्छिन्नसम्बन्धव्याप्यपर्य्याप्तिकयावत्त्वमर्थः, अतः काले सर्व्वे वृत्तिमन्तः, कालः सर्व्वधर्म्मवानित्यादौ सर्व्वपदेन वृत्तिमत्त्वादिव्यापककालादिसम्बन्धव्याप्यपर्य्याप्तिकं यावत्त्वं प्रतीयते,

---

नन्वेवं सर्व्वेषु घटेषु रूपमित्यत्र का गतिः ? तत्र घटस्य प्रकारतयोद्देश्यत्वाभावात्, रूपस्यापि विशेष्यतया विधेयत्वासम्भवाच्च, घटत्वव्यापकरूपव्याप्यपर्य्याप्तिकयावत्त्वावच्छिन्नस्य बोधयितुमशक्यत्वादित्यत आह—उद्देश्यविधेयेति ।

उद्देश्यवाचकेति । तत्सामानाधिकरण्यञ्च=तदर्थेन सममभेदान्वयिस्वार्थकत्वम्, विधेयताऽवच्छेदकव्यापकेति । तद्व्यापकत्वञ्च—तद्वन्निष्ठभेदप्रतियोगिताऽनवच्छेदकत्वं, तद्वत्त्वं च विधेयताऽवच्छेदकनाघटकसम्बन्धेन, नातो वृत्तिमन्मात्रवृत्तिपर्याप्तेः कालिकेन वृत्तिमत्त्वाधिकरणमहाकालनिष्ठभेदप्रतियोगिताऽवच्छेदकत्वेऽपि व्यापकत्वहानिः, न वा यत्किञ्चित्कालिकसम्बन्धेन महाकालान्यपदार्थत्वाधिकरणजन्यनिष्ठभेदप्रतियोगिताऽनवच्छेदकतद्गतपर्याप्तिमादाय काले सर्व्वे महाकालातिरिक्तपदार्था इति प्रयोगप्रसङ्ग,

उद्देश्यताऽवच्छेदकावच्छिन्नेति । तत्सम्बन्धश्च-उद्देश्यानुयोगिकविधेयताऽवच्छेदकसम्बन्धः, तद्व्याप्यत्वञ्च-प्रतियोगित्वाख्यस्वरूपसम्बन्धावच्छिन्नतदभाववदवृत्तित्व, काले सर्वे वृत्तिमन्त इत्यादौ वृत्तिमति यथा विधेयत्वमनुभवसिद्धं; तथा कालिकादिविशेषसम्बन्धावच्छिन्नमपि तद्, न तु केवलं विधेयत्वं निरनुभवाद्व्यावर्त्तकत्वाच्च,

एवञ्च कालानुयोगिककालिकविशेषणत्वाप्रतियोगिनि गगनादौ वृत्तिमन्निष्ठपर्यातेरसत्त्वेन तद्व्याप्यत्वं, शाब्दबोधोऽपि वृत्तिमत्त्वव्यापककालानुयोगिकसम्बन्धव्याप्यपर्यासिकयावत्त्वावच्छिन्नाभिन्नवृत्तिमन्तः कालवृत्तय इत्याद्याकारक ऊह्यः,

प्रतीयत इति । अन्यथैतत्कालस्यापि कतिपयवृत्तिमद्विशिष्टत्वेनेदानीं·

अथ वा स्वार्थान्वयिताऽवच्छेदकधर्म्मव्यापकतादृशधर्म्मावच्छिन्ना-न्वयितावच्छेदकधर्म्मावच्छिन्नव्याप्यपर्य्याप्तिकधर्म्मावच्छिन्नः सर्व्व-पदार्थ इत्युद्देश्यविधेयभावं विशिष्यानिवेश्य सर्व्वसाधारणैकव्युत्-पत्तिः स्वीक्रियते,

---

सर्व्वे वृत्तिमन्त'; यत्तत्कालः सर्व्ववस्मैवानित्यादिप्रतीत्यापत्तेरिति भाव',

स्वार्थान्वयिताऽवच्छेदकेति । अत्र सर्व्वपदं स्वपदार्थः, स्वार्था-न्वयिताऽवच्छेदकत्वञ्च—स्ववृत्तिग्रहजन्योपस्थितिप्रयोज्यस्वार्थनिष्ठवि-षयतानिरूपितविषयताऽवच्छेदकत्वं, तदाश्रयधर्म्मव्यापकत्वञ्च-तद्वन्नि-ष्ठान्योन्याभावप्रतियोगिताऽनवच्छेदकत्वं, तद्वत्त्वञ्च-स्वार्थान्वयिताऽव-च्छेदकताघटकसम्बन्धेन,

व्याप्तिस्तु पूर्व्वोक्तैव, तादृशधर्म्मावच्छिन्नान्वयिताऽवच्छेदकत्व-ञ्च-स्वार्थनिष्ठतादृशविषयतानिरूपितविषयतानिरूपितविषयताऽवच्छे-दकत्वं, तद्धर्म्मव्याप्यत्वञ्च-व्यभिचारित्वसम्बन्धावच्छिन्नतदभावव-त्त्वं, व्यभिचारश्च-स्वार्थान्वयिताऽवच्छेदकावच्छिन्नान्वयिताविशिष्ट-सम्बन्धावच्छिन्नप्रतियोगिताकाभावघटितो बोध्यः, तादृशान्वयिता-वैशिष्ट्यञ्च-स्वावच्छेदकत्वस्वावच्छिन्नविधेयताऽवच्छेदकत्वान्यतरस-म्बन्धेन, काले सर्व्वे वृत्तिमन्त इत्यादौ सर्व्वपदार्थान्वयत्वावच्छेद-रूपं यत्कालवृत्तित्वादिनिष्ठप्रकारत्वं तदवच्छेदकरूपादिसम्बन्धेन, सर्व्वे घटा रूपवन्तः, सर्व्वेषु घटेषु रूपमित्यादौ च तादृशविधेयताऽव-च्छेदकसम्बन्धेन व्याप्यत्वलाभार्थमन्यतरत्वेन सम्बन्धद्वयनिवेशः, मत्वर्थीयप्रत्ययस्य नामार्थयोर्भेदेनान्वये तात्पर्य्यग्राहकत्वेन समवायेन रूपस्य प्रकारता विधेयताऽपि, अतो न तत्र स्वार्थान्वयव्यापकत्वविरहहानि-रिति, सर्व्वे घटा द्रव्यमित्यादौ तु तादात्म्येन द्रव्यस्यैव विधेयत्वेन व्याप्यत्वं बोध्यम्,

अत्रापि स्वार्थान्वयिताऽवच्छेदकत्वविधया स्वसमभिव्याहृतपदप्रति-पाद्यत्वेन या वक्तृबुद्धिस्तद्विषयधर्म्मव्यापकत्वे सति स्वार्थान्वय-िताऽवच्छेदकत्वविधया स्वसमभिव्याहृतपदप्रतिपाद्यत्वेन या वक्तृबु-द्धिस्तद्विषयतादृशधर्म्मावच्छिन्नव्याप्यता वा पर्य्याप्तितत्प्रतियोगिकपर्य्या-प्त्यवच्छिन्ने सर्व्वपदस्य शक्तिर्वाच्याऽतो न पूर्व्वोक्तदोषः,

अनुगमकन्तु-स्वविशिष्टविषयतापर्य्याप्तसम्बन्धेन सर्व्वपदविशिष्ट-पर्य्याप्तिकत्वं प्रवृत्तिनिमित्तं, विषयतायां वैशिष्ट्यञ्च-स्वसमभिव्याह-रिपदप्रयोज्यस्वार्थनिष्ठत्वोभयसम्बन्धेन, प्रथमसम्बन्धनिवेशात्

अन्वयित्वञ्च विशेष्यविशेषणसाधारणं, सर्व्वं प्रमेयमित्यादौ वस्त्वादिपदाध्याहारमन्तरेण बोधोपगमे तदनुरोधेनान्योन्याभावप्रतियोगिताऽनवच्छेदकविधेयव्याप्यपर्य्याप्तिरूपाधत्त्वार्थकताऽपि सर्व्वपदस्य स्वीकार्य्या,

अथ सर्व्वं घटं वेत्तीत्यादावेतदीयज्ञानविषयत्वत्वादिना विषयताऽनन्वयात् तादृशधर्म्मो नान्वयिताऽवच्छेदकः, अन्वयिताऽवच्छेदकविषयत्वत्वाद्यवच्छिन्नव्याप्यत्वमतिप्रसञ्जकमिति तत्रापि व्युत्पत्त्यन्तरं स्वयमूहनीयम्,

---

सर्व्वे घटा इत्यादिस्थलीयं सर्व्वपदार्थं सर्व्वपदञ्चादाय न सर्व्वाणि द्रव्याणि रूपवन्तीत्यादिप्रयोगाः, सर्व्वपदार्थघटकपर्य्याप्तिविषयताया अपि सर्व्वपदजन्योपस्थितिप्रयोज्यतया तामादाय न सर्व्वाणि दधीनि द्रव्यवन्तीत्यादिप्रयोगाः,

विषयतावत्त्वञ्च—स्वनिरूपितविषयताऽवच्छेदकत्वनिष्ठविषयताकवक्तृबुद्धिविषयतावद्व्यापकत्वस्वनिरूपितविषयतानिरूपितविषयताऽवच्छेदकत्वनिष्ठप्रकारताकवक्तृबुद्धिविषयतावद्धर्म्मावच्छिन्नव्याप्यत्वोभयसंबन्धेन, संकेतोऽप्युक्तसबन्धेन सर्व्वपदवत्पर्य्याप्तिकयावत्त्वावच्छिन्नबोधकं सर्व्वपदं भवत्वित्याकारको बोध्यो; न तु स्वजन्यत्वस्वविशिष्टपर्य्याप्तिकयावत्त्वावच्छिन्नविषयकत्वोभयसम्बन्धेन बोधः सर्व्वपदवान् भवत्वित्याकारकः, तथा सति सर्व्वपदवत्पर्य्याप्तिकत्वरूपानुगतधर्म्मेण सङ्केतग्रहानुपपत्तेः, अस्तु वा कथञ्चित् तथैत्यलं पल्लवितेन,

सर्व्वं प्रमेयमित्यादौ सर्व्वं वस्तु प्रमेयमिति यदि वस्त्वादिपदमध्याह्रियते; तदा सर्व्वे घटा इत्यादिसमशीलतया तत्स्थलीयव्युत्पत्त्यैवोपपत्तिर्भवेदत आह—अध्याहारमन्तरेणेति।

अतिप्रसञ्जकेति। यत्किञ्चिद्घटज्ञानदशायामपि सर्व्वं घटं वेत्तीत्यादिप्रयोगापत्तिरित्यर्थः,

व्युत्पत्त्यन्तरमिति। स्वार्थान्वयिताऽवच्छेदकत्वेन वक्तृतात्पर्य्यविषयधर्म्मव्यापकत्वे सति स्वोच्चारणप्रयोजक यत्स्वघटितवाक्यजन्यस्वार्थान्वय्यन्वयिकर्म्मताकक्रियाकर्तृत्वप्रकारकप्रतिपत्तीयतादृशविषयताऽऽश्रयत्वेन वक्तृतात्पर्य्ये तदीयतादृशविषयताऽऽश्रयकर्तृनिष्ठस्वविशिष्टस्वार्थान्वय्यन्वयिकर्म्मताकक्रियाकर्म्मताव्याप्या या पर्य्याप्ति-

अत्र न सर्वाणि रूपाणीत्यादौ नञर्थप्रतियोगिविशेषणार्थक-सर्वपदस्य स्वार्थान्वयिताऽवच्छेदकरूपत्वादिव्यापकपर्याप्तिनिरूप-रूपान्तरार्थकतया तदर्थावच्छिन्नाभाव एव भासते,

व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकस्तादृशाभावो घटा-दावबाधित एवेति नायोग्यता,

---

स्वनिरूपितप्रतियोगिताऽवच्छेदकतावच्छिन्ने तादृशनञर्थाभावः, सर्वत्र स्वपदं सर्वपदपरम्, अनुगमकश्च रूपं सर्वपदार्थः, वैशिष्ट्यञ्च-स्वार्थान्वयिताऽवच्छेदकत्वेन यत्किञ्चित्तत्पदार्थविषयतानिष्ठभेदप्रतियोगिताऽवच्छेदकत्वसम्बन्धावच्छिन्नावच्छेदकताकभेदवत्त्वविशिष्टविषयताकत्वस्वाव्याप्यत्वोभयसम्बन्धेन, विषयतायां स्ववैशिष्ट्यञ्च-स्वार्थनिष्ठविषयताकविषयताकप्रतियोगिकत्वस्य निष्ठविषयताकविषयताश्रयत्वस्वजन्यप्रतियोगित्वस्वार्थान्वय्यन्वयकत्वकर्मकविषयकत्वनिष्ठविषयतानिष्ठत्वोभयप्रयोजककत्वकत्वतापर्याप्त्यधिकरणविषयताऽऽश्रयवृत्तित्वाश्रयत्वोभयसम्बन्धेनेति नव्याः,

द्वितीयाऽर्थकर्मत्वविषयताया आधेयतासम्बन्धेन घटत्वान्वयेन पारतन्त्र्येण स्वाश्रयपदार्थविशिष्टत्वसम्बन्धेन घटत्वस्याप्यन्वयोऽभ्युपेयते, स्वाश्रयत्वञ्च-स्वसमानकालीनतत्पुरुषीयज्ञानविषयत्वसम्बन्धमात्रे नानुपपत्तिरिति कश्चित्,

वस्तुतस्तु सर्वे घटं वेत्तीत्यादौ ज्ञानादेः तत्कालीनतत्पुरुषीयज्ञानविषयताप्रतियोगिकस्वरूपसम्बन्धेन घटकर्मत्वस्यान्वयोपगम आवश्यकः, अन्यथा ज्ञानत्वावच्छेदेन घटविषयित्वस्य बाधेन तदवच्छेदेनान्वयोपगमासम्भवात्, ज्ञानत्वसामानाधिकरण्येनान्वयोपगमावश्यकत्वे तदानीमयं घटं न वेत्तीत्यादिप्रयोगापत्तेः, तदानीं पुरुषान्तरे घटज्ञानसत्त्वेन ज्ञानत्वावच्छेदेन घटविषयित्वाभावस्याप्यन्वयासम्भवात्, तथा च स्वार्थान्वय्यन्वयिताऽवच्छेदकसंसर्गताऽवच्छेदकव्याप्यत्वं पर्याप्तौ, अनुगमकं यत्किञ्चित्तत्पदार्थविषयत्वेन सम्बन्धज्ञानकमपि बोध्यम्,

सर्वे वेत्तीदृश इत्यादौ बहुत्वादिपदाध्याहारं विना प्रतिपाद्यकत्वे सामान्यतोऽन्योन्याभावप्रतियोगिताऽनवच्छेदकत्वे सति ज्ञानविषयत्वव्याप्यपर्याप्तिकत्वार्थमपि प्रवृत्तिनिमित्तं सर्वपदस्यावश्यकमिति,

नञ्समभिव्याहारस्थले पूर्वोक्तव्युत्पत्त्याऽनिर्वाहाद् व्युत्पत्त्यन्तरमाह-अत्र न सर्वाणीति ।

न चाव्यासज्यवृत्तिगुणत्वादिपर्य्याप्तेरपि रूपत्वादिव्यापकतया गुणत्वादिसाधारणरूपत्वादिव्यापकपर्य्याप्तिकधर्म्मावच्छिन्नाभावो न घटादाविति कथमत्र योग्यतेति वाच्यम् ?

अव्यासज्यवृत्तिगुणत्वादेरेकैकवृत्तिधर्म्मावच्छिन्नपर्य्याप्तिकूटस्यैव सर्व्वाणि रूपाणि गुणा इति प्रतीत्याऽवगाहनात्, सर्व्वसाधारणैकपर्य्याप्तौ मानाभावात्, प्रत्येकवृत्तिधर्म्मावच्छिन्नपर्य्याप्तिषु रूपत्वादेर्निरुक्तव्यापकत्वाभावात् सर्व्वं द्रव्यं न रूपवदित्यादौ द्रव्यत्वादिव्यापकयावत्त्वसामानाधिकरण्यमभावस्य प्रतीयतेऽतो नायोग्यता,

अनुयोगिविशेषणावच्छेदेनैव नञाऽभावः प्रत्याय्यते-द्रव्यं न रूपवदित्यादिप्रयोगादर्शनादिति कथमेतदुपपद्यतामिति तु नाशङ्कनीयम् ?

व्यासज्यवृत्तिधर्म्मविशेषितानुयोगिकाभावबोधे तथा नियमोपगमात्,

यत्तु स्वरूपसम्बन्धात्मकमभावानुयोगिताऽवच्छेदकत्वमनुयोगिविशेषणे नञ्पदजन्याभावप्रतीत्या गृह्यते,

द्रव्यत्वादौ न तादृशं रूपवद्भेदाद्यनुयोगिताऽवच्छेदकत्वमतो न

कथमत्र योग्यतेति ।

ननु रूपत्वव्यापकपर्य्याप्तिकत्वस्य रूपमात्रगततया घटादौ सत्त्वेन तदवच्छिन्नाभावमादाय तादृशप्रतीत्युपपत्तौ कथमत्र योग्यतेति शङ्कनमयुक्तमिति वाच्यम् ?

वृत्तिमदव्यापकपदार्थगतपर्य्याप्त्यवच्छिन्नाभावमादाय काले न सर्व्वे धर्म्मा इति प्रतीत्यापत्तिवारणाय स्वार्थान्वयिताऽवच्छेदकव्यापकपर्य्याप्त्यवच्छिन्नप्रतियोगिताकसामान्याभावस्य नञा बोधाभ्युपगमेन तत्र तादृशसामान्याभावासत्त्वेन योग्यताविरहात्,

पर्य्याप्तिकूटस्यैवेति । तादृशपर्य्याप्तिस्यैवेति यावत्, अवगाहनादिति । विशेषताऽवच्छेदकत्वनाऽऽत्मकसंसर्गतयेति भावः, निरुक्तेति । अन्योन्याभावघटितेत्यर्थः, अत इति । द्रव्यत्वव्यापकयावत्त्वसामानाधिकरण्यावगाहनादित्यर्थः, तथाचैतत्कत्वघटितावच्छेदकावगाहने स्वयोग्यता स्यादिति भावः, तथा नियमोपगमादिति । अनुयोगिताऽवच्छेदकावच्छेदेनाभावावगाहनियमोपगमादित्यर्थः, यत्त्विति । स्वरूपसम्बन्धरूपमतिप्रसक्त

द्रव्यं न रूपवदित्यादयः प्रयोगाः, व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावाभ्युपगमेन च सर्व्वं द्रव्यं न रूपवदित्यादिप्रयोगा उपपादनीयाः,

न च व्यासज्यवृत्तिधर्म्मावच्छिन्नानुयोगिताकाभावाभ्युपगमे कस्यापि रूपादेः सर्व्वघटादिपर्य्याप्तिर्नास्तीति सर्व्वघटत्वावच्छिन्नेऽपि रूपादिमद्भेदसत्त्वेन सर्व्वे घटा न रूपवन्त इत्यादिप्रयोगापत्तिरिति वाच्यम् ?

रूपादिपर्य्याप्तित्वेनानुगतपर्य्याप्तीनामनतिप्रसक्तेन घटादिनिष्ठयावत्त्वादिनाऽप्यवच्छेदात्, तदवच्छेदेन रूपादिमद्भेदवृत्तौ विरोधाद्, द्रव्यत्वादिव्यापकयावत्त्वस्य चातिप्रसक्ततया रूपादिपर्य्याप्त्यवच्छिन्नानामप्यनवच्छेदकतया तदवच्छेदेन रूपादिमद्भेदवृत्तावविरोधादिति,

तदसद्-उक्तरीत्योपपत्तौ प्रतियोगिताऽवच्छेदकादिमति तच्छून्यसाधारणव्यासज्यवृत्तिधर्म्मावच्छेदेनान्योन्याभावादिवृत्तौ मानाभावात्, तादृशाभावोपगमे प्रतिबन्धकसमवहितेऽपि देशे व्यासज्यवृत्तिधर्म्मावच्छिन्नानुयोगिताकप्रतिबन्धकाभावबलात् कार्य्योपत्तेः, तत्र कारणताऽवच्छेदककोटौ विशेषणान्तरं प्रक्षिप्यापत्तिवारणे तु गौरवाद्,

त्वेन तदसम्भवादिति भावः,

व्यासज्यवृत्तिधर्म्मस्याभावानुयोगिताऽवच्छेदकत्वेऽतिप्रसक्तत्वं न बाधकं, सर्व्वं द्रव्यं न नित्यमित्यादिप्रयोगदर्शनादित्यत आह-व्यासज्यवृत्तीति। नास्तीति। तथा च घटनिष्ठयावत्त्वस्य रूपपर्य्याप्त्यनुयोगिताऽवच्छेदकत्वं न सम्भवतीति भावः,

यदुक्तं दूषयति-तदसदिति। उक्तरीत्येति। सर्व्वत्वसामानाधिकरण्यमात्रमानेनैवेत्यर्थः, प्रतिबन्धकसमवहिते-दाहादिप्रतिबन्धकमण्यादिविशिष्टे, व्यासज्यवृत्तीति। तदधिकरणतदनधिकरणगतयावत्त्वावच्छेदेनेति भावः, विशेषणान्तरं-व्यासज्यवृत्तिधर्म्मावच्छिन्नानुयोगिताकत्वाभावादिरूपमित्यर्थः,

गौरवादिति। अतिरिक्ताभावकल्पनेन गुरुधर्म्मस्य कारणताऽवच्छेदक

अथ सर्व्वं द्रव्यं न रूपवदित्यादौ द्रव्यत्वादिव्यापकपर्य्याप्तौ विधेयीभूतरूपवद्भेदव्याप्यत्वस्य बाधितत्वादयोग्यत्वं दुर्व्वारमेवेति चेद् ?

न तत्र विधेयव्याप्यत्वभानानुपगमात्, खण्डशो विभिन्नशक्त्युपगमेन क्व चित्तदंशपरित्यागे विरोधविरहात्,

सर्व्वं गगनमित्यादिप्रयोगाभावाद्य यावत्त्ववदनेकत्वमपि सर्व्वपदार्थः,

तच्च स्वार्थभेदान्वयोद्देश्यताऽवच्छेदकसमानाधिकरणभेदप्रतियोगित्वमेव,

भेदश्च समानाधिकरण्यनिरूपकत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टान्यो ग्राह्यो नातो द्वित्वाद्यवच्छिन्नभेदमादायातिप्रसङ्गः,

एतादृशोभयधर्म्मावच्छिन्ने शक्तिरेकैवातो नैकधर्म्मं परित्यज्या-

---

त्वेन चेत्यर्थ, खण्डश इत्यादि स्वार्थान्वयिताऽवच्छेदकव्यापकत्वे स्वार्थान्वयिताऽवच्छेदकावच्छिन्नान्वयिताऽवच्छेदकावच्छिन्नव्याप्यत्वे पर्य्याप्तिप्रतियोगितावच्छेदकावच्छिन्ने च पृथक्शक्तिस्वीकारेणेत्यर्थ, व्युत्पत्तिवैचित्र्याच्च पृथक् शक्त्युपस्थापितस्य स्वार्थान्वयिताऽवच्छेदकव्यापकत्वस्य तादृशव्याप्यत्वस्य च, शक्यताऽवच्छेदकैकदेशे पर्य्याप्तावन्वय उपगम्यते, प्रधानान्वयस्थले च शक्यत्रयस्यैव विशेष्यविशेषणभावेनान्वयबोधसामग्रीणां परस्पर सहकारित्वोपगमाद् नैक परित्यज्यापरस्य बोध, तथा च सर्व्वं द्रव्य रूपवदित्यादयो न प्रयोगा, नञर्थविधेयस्थले च स्वार्थान्वयिताऽवच्छेदकधर्म्मावच्छिन्नव्याप्यत्वान्वयबोधे सामग्र्यपेक्षत्व न कल्प्यते, अत एक परित्यज्यापरान्वयबोधेऽपि न क्षति,

सर्व्वपदार्थ इति। सर्व्वपदप्रवृत्तिनिमित्तमित्यर्थ,

ननु गगने यावत्त्वस्यापर्य्याप्तत्वात् तादृशयावत्त्वावच्छिन्ने शक्त्यैव तादृशप्रयोगापत्तिविरहेण कुत शक्त्यन्तर कल्पनीयमिति चेद् ?

न-घटादिगगनगतयावत्त्वमादाय तादृशप्रयोगापत्तेर्दुर्व्वारत्वात्, समुदायस्य प्रत्येकानतिरिक्तत्वेनैकस्यापि यावत्त्वाधिकरणत्वाच,

ननु सर्व्वपदस्यानेकत्वावच्छिन्ने शक्त्यन्तरस्वीकारे तदर्थमादाय सर्व्वं द्रव्यं रूपवदित्यादिप्रयोगस्य स्वार्थान्वयिताऽवच्छेदकव्यापकत्वार्थमादाय सर्व्वं गगन द्रव्यमित्यादिप्रयोगस्य चापत्तिर्दुर्व्वारैवेत्यत आह-एतादृशेत्यादि।

परमादाय बोधः कदा चिदपीति न कतिपयानेकतात्पर्य्येणाशेषैकतात्पर्य्येण वा सर्व्वपदं मयुज्यते,

चैत्रो दधि भुङ्क्ते, मैत्रः पयो भुङ्क्ते, देवदत्तो घृतं भुङ्क्ते, विष्णुमित्रः सर्व्वमेवेत्यादौ सर्व्वपदेन प्रत्येकं दधिपयोघृतानां भोजनकर्म्मतया प्रतिपादनाद्, यद्रूपावच्छिन्ने पदान्तरोपस्थाप्यार्थे स्वार्थान्वयः; तद्रूपावच्छिन्नान्वितया यद्यद्धर्म्मावच्छिन्ना उपक्रान्ताः प्रत्येकं तावद्धर्म्मावच्छिन्नेषु सर्व्वपदस्य शक्त्यन्तरमङ्गीकार्य्यं,-मुपक्रान्तैकधर्म्मावच्छिन्नान्वययोग्यताविरहे वाक्यस्याप्रामाण्यात्तादृशस्थले तथाविधसकलधर्म्माणामेवान्वयिताऽवच्छेदकतया भाननियमः,

तन्निर्व्वाहिका च तथाविधयावद्धर्म्मप्रकारकं बोधं जनयतु

शक्तिरेकैवेति । पुष्पवन्तपदरीत्या ज्ञेयः, शाब्दबोधोऽपि सर्व्वे घटा रूपवन्त इत्यादौ घटत्वव्यापकरूपत्वाव्यपर्य्याप्तिकयावत्त्वावच्छिन्नघटत्व समानाधिकरणप्रतियोगिताविशिष्टान्यभेदप्रतियोगित्वावच्छिन्नाभिन्नाः घटा रूपवन्त इत्याद्याकारकः,

सर्व्वपदस्य व्युत्पत्त्यन्तरमाह—चैत्र इत्यादि । पदान्तरोपस्थाप्यार्थ इति । पदान्तरम् अमूपदादि, कर्म्मतासम्बन्धेन प्रकृत्यर्थस्यान्वयवादिमते भुजादिधातोस्तदुपस्थाप्यार्थे कर्म्मत्वादौ स्वार्थान्वयः, स्वार्थान्वयितया स्वघटितवाक्यजन्यप्रतिपत्तिविषयत्वेन वक्तृतात्पर्य्यविषयताऽवच्छेदको यो धर्म्म इति लाभः,

सामान्यतो विषयतानिवेशाच् चैत्रेण दधि मैत्रेण दुग्धं देवदत्तेन पयो भुज्यते, विष्णुमित्रेण सर्व्वम् इत्यादेरपि संग्रहः, चैत्रेण दधि मैत्रेण पयो भुज्यते विष्णुमित्रः सर्व्वं भुङ्क्ते इत्यादयस्तु न प्रमाणं, तद्रूपावच्छिन्नान्विततया तद्रूपावच्छिन्नविषयतानिरूपितविषयतया तृतीयार्थोऽभेदः, तस्य चोपक्रान्तपदार्थैकदेशे विषयतायामन्वयः,

पतञ्चोपक्रान्तस्य चैत्रादेः सर्व्वपदस्य शक्यत्ववारणाय दत्तम्; उपक्रान्ता इति । पूर्व्वकालोच्चारितवाक्यजन्यप्रतिपत्तिविषया इत्यर्थः, तथाविधयावद्धर्म्मेति । दधित्वप्रकारताकविशेष्यताकं पयस्त्वप्रकारताकविशेष्यताकं घृतत्वप्रकारताकविशेष्यताकं बोधमित्यर्थः, सङ्केते दधित्वप्रकारताकविशेष्यत्वादेः "खले कपोतन्यायेन" युगपद्भानं; तथा च द-

सर्व्वपदमित्याकारकसङ्केतरूपा विलक्षणशक्तिरेव, तादृशशक्तिज्ञानेनैकधर्म्मप्रकारकबोधजननेऽपरापरतथाविधधर्म्मप्रकारकबोधसामग्र्याः पुष्पवन्तपदशक्तिज्ञानेन चन्द्रत्वसूर्य्यत्वयोरेकतरप्रकारकबोधजननेऽपरप्रकारकबोधसामग्र्या इव प्रयोजकत्वोपगमात्,

न च प्रक्रान्तानां दध्यादीनां प्रत्येकमन्वये वाक्यभेदापत्त्या साहित्यप्रकारेण तावत्पदार्थवाचकत्वमेव सर्व्वपदस्य किन्नोपेयत इति वाच्यम् ?

ध्यादिविषयकसमूहालम्बनबोध एव सङ्केतविषयः, अतस्तादृशवाक्यजन्यबोधोऽपि समूहालम्बनरूप; अत एवाग्रे वाक्यभेदकथनमपि सङ्गच्छते, विलक्षणेति । वैलक्षण्यञ्च—दध्यादिपदस्य नानाशक्तिमपेक्ष्य; तादृशनानाविशेष्यतानिष्ठनानाप्रकारताकैकविशेष्यताशालित्वम्, एवञ्च विशेष्यताया ऐक्येन शक्तेरैक्यम्,

ननु दधित्वादितत्तद्धर्म्मप्रकारक बोध जनयत्वित्याद्याकारकसङ्केतस्य शक्तित्वे, चैत्रो व्याकरण, मैत्र शिक्षा, देवदत्तो वेदमधीते, विष्णुमित्र सर्व्वमित्यादेरसग्रह, तत्रानुचितशक्त्यन्तरकल्पने शक्तिभेदापत्तेः, इष्टापत्तौ च यद्रूपावच्छिन्ने पदान्तरोपस्थाप्यार्थे इत्याद्यनुगतबोधकवाक्याभिधानस्यानुचिततया वैयर्थ्यापत्तिरिति चेद् ?

न—सर्व्वपदविशिष्टविषयताऽवच्छेदकयावद्धर्म्मविशिष्टबोध जनयत्वित्याकारक एव तात्पर्य्यात्,

विषयताया सर्व्वपदवैशिष्ट्यञ्च स्वार्थान्वयितया स्वजन्यप्रतिपत्तिविषयत्वेन वक्तृतात्पर्य्यविषयताऽवच्छेदकावच्छिन्नविषयतानिरूपकत्वस्वोच्चारणप्रयोजकवाक्यजन्यबोधीयत्वोभयसम्बन्धेन, स्वपद सर्व्वपदपरम्,

यावद्धर्म्मवैशिष्ट्यञ्च—स्वनिष्ठप्रकारताकविशेष्यताकत्वसम्बन्धेन चैत्रो दधि भुङ्क्ते इत्यादिवाक्यप्रयोजकत्वस्यानुभवसिद्धत्वाच्च तादृशसम्बन्धाप्रसिद्धि, तादृशयावत्त्व शक्यताऽवच्छेदक उपलक्षणतया निविष्टमतो न तदंशमन्तर्भाव्य शाब्दबोध,

प्रयोजकत्वोपगमादिति । यादृशधर्म्मावच्छिन्नस्यागादिबोधकपदसमभिव्याहार सर्वपदे तत्र तद्धर्म्मावच्छिन्नबोधकसामग्र्यपेक्षत्व न कल्प्यते, अतो विष्णुमैत्रो दधि विहाय सर्व्वमेवेत्यादौ नानुपपत्ति, साहित्यधीविशेषविषयत्वम्, अतिरिक्तपदार्थ इति मतविशेष,

साहित्यविशिष्टान्वयस्य समभिव्याहृतपदार्थे यत्र बाधस्तत्रापि तथा प्रयोगाद्, वाक्यभेदस्य गत्यन्तरविरहेणेष्टत्वाद्, अत एव प्रत्येकं पुत्रपश्वादिरूपफलकामकर्त्तव्यतया; यज्ञक्रतूनभिधायाभिहितेन सर्व्वेभ्यो दर्शपूर्णमासावित्यनेन मिलितानां तावत्फलानां दर्शपूर्णमासकर्त्तव्यताप्रयोजककामनाविषयत्वं न प्रतिपाद्यते, प्रकृतवाचिना सर्व्वनामपदेन मिलितत्वेन फलानुपस्थापनाद्, अपि तु प्रत्येकमेवेति, प्रत्येकफलकामस्यैव तत्राधिकार इति योगसिद्ध्यधिकरणसिद्धान्तोऽपि सङ्गच्छते ।

गत्यन्तरविरहेति । न च यवखदिरपलाशांश्छिनत्तीत्यादौ यवकर्म्मकच्छेदनस्य खदिरादिकर्म्मकच्छेदनस्य भिन्नत्वेनैकस्मिन् भेदे खदिरादिसमुदायकर्म्मत्वस्य बाधेनान्वयासम्भवात्; तत्तत्कर्म्मकच्छेदनकर्त्तृत्वस्य पृथक्पृथगन्वयेन वाक्यभेदापत्तिमाशङ्क्य; छेदनत्वावच्छिन्ने प्रत्येककर्म्मत्वस्यान्वयेन तत्र प्रत्येककर्म्मत्वनिष्ठप्रकारताकविशेष्यताया भेदेऽपि तादृशतादृशविशेष्यताऽवच्छेदकतानां परस्परावच्छेद्यावच्छेदकभावमङ्गीकृत्य; व्युत्पत्तिवादादौ स्वयं वाक्यभेदं परिजहार; तद्वदत्रापि भोजनत्वावच्छिन्ने दध्यादिकर्म्मत्वस्यान्वयेनैकवाक्यत्वसम्भवे कुतो गत्यन्तरविरह इति वाच्यम्?

अथ कथञ्चिदेकवाक्यतासम्भवेऽपि सर्व्वेभ्य इत्यत्रैकवाक्यत्वस्याङ्गीकर्त्तुमशक्यत्वात् तेन प्रत्येकं पश्वादिकामनाविशिष्टे कर्त्तृत्वस्यैव प्रतिपादनाद्, यज्ञः ससोमकः, क्रतुरसोमकोऽतो यज्ञक्रतूनिति, योगसिद्ध्यधिकरणेति । सर्व्वेभ्य इत्यत्र ल्यब्लोपे पञ्चमी, निमित्तार्थकचतुर्थी वा तथा च सर्व्वाणि पश्वादिचतुर्दशफलान्युद्दिश्य दर्शपौर्णमासौ यागौ कुर्य्यादित्यर्थः, अत्रैकदैव पश्वादिसमुदायविषयककामनया तादृशयागानुष्ठाने कथं न फलसिद्धिरिति संशये; सिद्धान्तसूत्रं—"योगसिद्धिर्वाऽर्थस्योत्पत्त्ययोगादि"ति, वाशब्दः सिद्धान्तसूचकः, अर्थस्य=पश्वादिफलस्य, योगेन=प्रयोगभेदेन, सिद्धिः=उत्पत्तिः, उत्पत्त्ययोगात्=उत्पत्तौ सर्व्वेभ्य इति विधिवाक्येऽयोगात्, साहित्याभावात्=साहित्याप्रतिपादनादिति यावत्, योगः=साहित्यम्,

ननु सर्व्वेभ्य इति विधिवाक्येन कामनाया फलान्तराविषयकत्वाप्रतिपादनात् कथं समुचितफलकामनया तादृशयागाचरणं न फलसाधकमिति चेद्?

किम्पदस्य जिज्ञासिते शक्तिः, अत एव स्वीयजिज्ञासाज्ञापनाय किंपदघटित प्रश्नवाक्य प्रयुज्यते,

तत्रोद्देश्यवाचककिम्पदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकधर्म्मावच्छिन्नविधेयतानिरूपितोद्देश्यताऽवच्छेदकत्वेन वक्तृजिज्ञासितो धर्म्मः प्रवृत्तिनिमित्तम् , उपस्थाप्यताऽवच्छेदकत्वान्तमुपलक्षणतयाऽनुगमक, शाब्दबोधे तदभानात् ,

एवञ्च कः पचतीत्यादितः पाककृतित्वावच्छिन्नविधेयतानिरूपितोद्देश्यताऽवच्छेदकत्वेन वक्तृजिज्ञासितो यो धर्म्मस्तद्वान् पचतीत्याकारकोऽन्वयबोधः, किञ्चिद्धर्म्मावच्छिन्नोद्देश्यकपाककर्त्तृत्वविधेयकज्ञान भवत्वित्याकारकजिज्ञासायास्तादृशबोधविषयकतया तादृशेच्छाविषयीभूतज्ञानजनकाद् ब्राह्मण पचतीत्युत्तरवाक्यात्त न्निवृत्तिरिति तादृशप्रश्नानन्तर तथैवोत्तर प्रयुज्यते,

न चैवं प्रमेयः पचतीत्युत्तरवाक्यमेव न कथ तादृशप्रश्नानन्तरं-

न-पुत्रकामो दर्शपौर्णमासौ कुर्य्यादित्यादिवाक्येन पुत्रकामनाऽऽदि विशिष्ट तादृशयागकृतेरन्वयेन विशिष्टबोधमर्य्यादया तादृशकृतौ पार तन्त्र्येण पुत्रकामनाया जन्यत्वसम्बन्धेन पुत्रविषयकत्वस्य च स्वप्रयो ज्यत्वस्वेतराविषयत्वाप्रयोज्यत्वोभयसम्बन्धेनान्वयोपगमाद्, अन्यथा यागमात्रस्यैव नानाविधफलकामनयाऽऽचरणे नानाविधफलजनकत्वा पत्तेरित्यल विस्तरेण ।

इति सर्व्वशब्दशक्तिविचारटीका ।

अत एवेति । जिज्ञासाया किम्पदप्रवृत्तिनिमित्तावच्छेदकत्वादेवेत्यर्थः, स्वसमभिव्याहृतेति । स्व किम्पद, समभिव्याहृतत्व=स्वजन्यप्रतिपत्तिजनकत्व, पदोपस्थाप्येति । पदोपस्थाप्यत्वञ्च पदप्रतिपाद्यत्व, तेन पाककृतित्वावच्छिन्नस्य केनापि पदेनोपस्थित्यसम्भवेऽपि न क्षति , अवच्छेदकत्वेनेति । अत्र तृतीयाऽर्थो विषयत्व; तस्य च निरूपितत्वसम्बन्धेन जिज्ञासित इत्यत्र क्तप्रत्ययार्थे ज्ञानकर्म्मत्वरूपाविषयत्वेऽन्वय , यस्य च शाब्दबोधीयप्रकारतया भान तस्यैव तत्र विशेषणत्व शाब्दबोधेऽपि तस्यैव प्रकारतयाऽवगाहनमिष्यत आह—शाब्दबोध इति ।

शाब्दबोध इति । स्वविषयज्ञानीयपाककृतित्वावच्छिन्नविधेयतानिरूपितोद्दे

इति वाच्यम्?

प्रयुज्यते; तज्जन्यज्ञानस्यापि तादृशेच्छाविषयत्वादिति वाच्यम्? जिज्ञासाविषयीभूतविधेयन्यूनवृत्तिधर्मावच्छिन्न एव तादृश किंपदस्य शक्त्युपगमात्, अभेदेन स्वार्थान्वितोद्देश्यवाचकपदान्त रसमभिव्याहृतकिंपदशक्यताऽवच्छेदकगर्भे च स्वार्थाभेदान्वयिताऽ तावच्छेदकत्वोपलक्षितधर्मन्यूनवृत्तित्वमपि धर्मांशे विशेषणं देयम्, अतः को ब्राह्मणः पचतीत्यादिप्रश्नानन्तरं चैत्रः पचतीत्याद्या कारकमुत्तरवाक्यं प्रयुज्यते, न तु मनुष्यः पचतीत्यादिकं, मनुष्यत्वादेर्ब्राह्मणत्वाद्यन्यूनवृत्तित्वात्, तदवच्छिन्नोद्देश्यकत्वेन ज्ञानविषयकेच्छायास्तत्राप्रतीतेः,

एवं यत्रोद्देश्यताऽवच्छेदके किंपदार्थस्याभेदेनान्वयस्तत्र तद

श्यताऽवच्छेदकत्वविषयतानिरूपिता या वक्तृज्ञानेच्छीयविषयता तद स्वान् पाककृतिमानित्यन्वयबोध इत्यर्थः, न्यूनवृत्तीति । तत्त्वञ्च—विधेय समानाधिकरणभेदप्रतियोगिताऽवच्छेदकत्वे सति तत्सामानाधिकर ण्य, न तु तद्व्याप्यत्व, तेन क पचतीति प्रश्नानन्तरं श्याम· पचती त्युत्तरवाक्यमपि सङ्गच्छते, तादृशोत्तरवाक्यस्याप्रामाण्ये व्याप्यत्वमे व तदिति ध्येयम्, तादृशकिंपदस्येति । उद्देश्यवाचककिम्पदस्येत्यर्थ, न्यूनवृत्तित्वमपीति । अपिना स्वसमभिव्याहृतप्रतिपाद्यताऽवच्छेदकावच्छिन्न विधेयताकोद्देश्यतानिरूपिताभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदक त्वेन वक्तृजिज्ञासितत्व समुच्चीयते, तथा च स्वार्थान्वयिताऽव च्छेदकत्वोपलक्षितधर्मन्यूनवृत्तित्वे सति तादृशावच्छेदकत्वेन जि ज्ञासितो धर्मोऽभेदेन स्वार्थान्वितोद्देश्यवाचकपदान्तरसमभिव्याहृत किम्पदस्य प्रवृत्तिनिमित्त, जायते च को ब्राह्मण· पचतीत्यादिना पाककृतित्वावच्छिन्नविधेयताकोद्देश्यतानिरूपिताभेदसम्बन्धावच्छि न्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितो ब्राह्मणत्वन्यूनवृत्तिश्च यो धर्मस्तद्वदभिन्नो ब्राह्मणः पाककृतिमानित्याद्यन्वयबोध·,

प्रयुज्यते च को ब्राह्मण पचतीति वाक्य ब्राह्मणत्वन्यूनवृत्तिकिं चिद्धर्मावच्छिन्नाभेदसम्बन्धावच्छिन्नावच्छेदकताकब्राह्मणत्वावच्छिन्नो द्देश्यतानिरूपितपाककृतित्वावच्छिन्नविधेयताशालि ज्ञानं मयास्विति ज्ञापनाय,

तत्रेति । तादृशवाक्य इत्यर्थः, तात्पर्यार्थ भदकत्व, तस्य चोत्तरस्य·

न्वयिताऽवच्छेदकावच्छिन्ने विशेषणताऽऽपन्नतदन्वयिताऽवच्छेदकधर्मन्यूनवृत्तिधर्मावच्छिन्नोद्देश्यताऽवच्छेदकताकप्रकृतविधेयज्ञानगोचरेच्छा किंपदेन बोध्यते, अत कति घटा सन्तीत्यादौ डतिप्रत्ययार्थसङ्ख्याऽऽदौ किंपदार्थस्य जिज्ञासितधर्मावच्छिन्नस्याभेदनान्वयात्, संख्यात्वन्यूनवृत्तिदशत्वत्वाद्यवच्छिन्नोद्देश्यताऽवच्छेदकताकबोधजनक दशत्वसंख्यका घटाः सन्तीत्याद्युत्तरं प्रयुज्यते,

यत्र चोद्देश्यताऽवच्छेदकीभूतविभक्त्यर्थे भेदेन किंपदार्थो

किमिति शब्देनान्वय, तदन्वयिताऽवच्छेदकावच्छिन्ने=किंपदार्थान्वयिताऽवच्छेदकावच्छिन्ने विशेषणताऽऽपन्नो यस्तदन्वयिताऽवच्छेदकधर्म्मन्यूनवृत्तिधर्म्मे इत्यन्वय,

बोध्यत इति। शक्यताऽवच्छेदकघटकतयेति भावः, तथा चाभेदेन स्वार्थान्वयिताऽवच्छेदकधर्म्मन्यूनवृत्तित्वे सति स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकधर्म्मावच्छिन्नविधेयताकोद्देश्यतानिरूपितस्वार्थान्वयिताऽवच्छेदकावच्छिन्नावच्छेदकतानिरूपितभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितो धर्म्म उद्देश्यताऽवच्छेदकेऽभेदेनान्वयिस्वार्थककिंपदस्य शक्यताऽवच्छेदकम्, कति घटा इत्यादि। एतद्देशवृत्तितात्वावच्छिन्नविधेयताकोद्देश्यतानिरूपितपर्याप्तिसम्बन्धावच्छिन्नसंख्यात्वावच्छिन्नावच्छेदकतानिरूपितभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितधर्म्मवदभिन्नसङ्ख्यावन्तो घटा एतद्देशवृत्तय इत्यन्वयबोधस्तत्रेति यावत्, दशत्वसंख्यक इति।

ननु डतिप्रत्ययस्य सङ्ख्यावाचकत्वे तस्या घटादौ पर्याप्तिसम्बन्धेन कति घटा सन्तीत्यादिप्रश्नवाक्येन जनितबोधे प्रकारतया भानमुपगम्यते, दशत्वसंख्यका इत्याद्युत्तरवाक्येन जनितबोधे च दशत्वसंख्याविशिष्टस्याभेदो घटादौ भासते, एवञ्च जिज्ञासाविषयज्ञानं न तादृशवाक्येन जन्यत इति चेद्?

न, यतो दशत्वसंख्यका इत्याद्युत्तरवाक्यजज्ञानानन्तरं मनसैव तादृशज्ञानजननात्तन्निवृत्ति,

अथ वा डतिप्रत्ययस्य सङ्ख्याविशिष्ट एव शक्ति, डतिप्रत्ययार्थसङ्ख्याऽऽदावित्यत्रार्थशब्दस्य च प्रवृत्तिनिमित्तपरत्वम् अतो नानुपपत्ति, अतएव दश घटाः सन्तीत्यादिवाक्यादपि तादृशजिज्ञासानिवृत्तिर्दृश्यते, अत्र दशत्वसंख्यका इत्यपि पाठः क्वचित्, स च दशपदस्य दशत्वपर

न्वयः कस्य पुत्रः सुन्दरः इत्यादौ; तत्र यादृशसम्बन्धेन यदवच्छिन्ने तदन्वयस्तत्र तादृशसम्बन्धेन विशेषधर्मावच्छिन्नविशेषिततदवच्छिन्ननिष्ठोद्देश्यताऽवच्छेदकताकमकृतविधेयज्ञानगोचरेच्छा प्रतीयते,

एवं विधेयवाचककिम्पदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकत्वोपलक्षितधर्मावच्छिन्नोद्देश्यतानिरूपितविधेयताऽवच्छेदकतया जिज्ञासितो यो विशेषधर्मस्तदवच्छिन्ने शक्तिः,

अयं कः इत्यादावित्यादावित्यन्तथावच्छिन्नांशे विधेयताऽवच्छेदकत्वेन तथोपपादनीय इति,

यदवच्छिन्न इति । पष्ठ्यर्थसम्बन्धत्वाद्यवच्छिन्न इत्यर्थः, तदन्वयः-किंपदार्थान्वयः, तादृशसम्बन्धेनेत्यस्य विशेषितेत्यनेनान्वयः विशेषेति । किम्पदार्थान्वय्यन्वय्यनुयोगिककिम्पदसमभिव्याहृतविभक्त्यर्थसम्बन्धे प्रतियोगित्वव्याप्यत्वं तत्त्वम्, प्रतीयत इति शाब्दताऽवच्छेदकघटकतयेति भावः, तथा च सुन्दरत्वावच्छिन्नविधेयताकपुत्रत्वावच्छिन्नोद्देश्यताऽवच्छेदकतानिरूपितसम्बन्धत्वावच्छिन्नावच्छेदकतानिरूपितसम्बन्धत्वावच्छिन्नावच्छेदकताकनिरूपितत्वसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितपुत्रानुयोगिकसम्बन्धप्रतियोगित्वव्याप्यधर्मावच्छिन्ननिरूपितसम्बन्धवत्पुत्रः सुन्दराभिन्न इत्यन्वयबोधः, इच्छा च पुत्रनिष्ठसम्बन्धप्रतियोगित्वव्याप्यकिञ्चिद्धर्मावच्छिन्नसम्बन्धवत्पुत्रत्वावच्छिन्नोद्देश्यताकसुन्दरत्वावच्छिन्नविधेयताशालि ज्ञानं भवत्वित्याकारिका,

प्रवृत्तिनिमित्तञ्च-उद्देश्यताऽवच्छेदकविभक्त्यर्थेन भेदान्वयिकिम्पदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकावच्छिन्नविधेयताकोद्देश्यताकभेदसम्बन्धावच्छिन्नावच्छेदकताकभेदसम्बन्धावच्छिन्नावच्छेदकत्वेन वक्तृजिज्ञासितो यः स्वार्थान्वय्यनुयोगिकस्वसमभिव्याहृतविभक्त्यर्थसम्बन्धप्रतियोगित्वव्याप्यो धर्मः स इति,

विशेषधर्म इति । अत्र विशेषत्वं तादृशोद्देश्यताकविधेयताऽवच्छेदकत्वेन वक्तृज्ञानविषयत्वं, तच्च प्रकरणादिना ज्ञायते,

एवञ्चाय क इति प्रश्नस्य यदेदन्त्वावच्छिन्ने प्राणित्वादिना विधेयस्य वक्तृज्ञानमस्ति, न तु मनुष्यत्वादिनेति प्रकरणादिना निश्चीयते, तदाऽयं मनुष्य इत्याद्युत्तरं, यदा तु मनुष्यत्वेन ज्ञानमास्ति न तु ब्राह्मणत्वादिना तदाऽयं ब्राह्मण इत्युत्तरं प्रयुज्यते,

जिज्ञासितधर्मवानित्याकारको बोधः, तेन तद्विषयकजिज्ञासाविषयीभूतज्ञानजनकत्वायं ब्राह्मणइत्याद्युत्तरवाक्यं तादृशप्रश्नानन्तरं प्रयुज्यते,

एवं यत्र विधेये विधेयताऽवच्छेदके वा किंपदार्थस्याभेदेन भेदेन वाऽन्वयः; इदं किं द्रव्यं ? किं धनं ? भवतः पुत्राः कति ?, भवान् कस्य पुत्रः ? इत्यादौ; तत्र रीतिः पूर्ववदूहनीया,

---

यत्तु—स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकीभूतावच्छेदकन्यूनवृत्तित्व विधेयत्वम्, इदन्त्वस्य च ब्राह्मणभिन्नसाधारणतया सामान्यधर्मत्वञ्चेति कथनम् ;

तत्तुच्छम्—इदन्त्वस्याननुगतत्वात्, अन्यथेदन्त्वस्य कथञ्चिदनुगतत्वेन मनुष्यत्वादिसमनीलतयाऽयं क इति प्रश्नस्य मनुष्यो ब्राह्मण इत्याद्युत्तरञ्च प्रयुञ्जीत, पूर्ववदूहनीयेति । इदं किं द्रव्यमित्यादौ विधेयवाचकपदसमानाधिकरणकिम्पदस्य स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकावच्छिन्नोद्देश्यतानिरूपितस्वार्थाभेदान्वयिताऽवच्छेदकावच्छिन्नविधेयतानिरूपिताभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितः स्वार्थान्वयिताऽवच्छेदकव्याप्यधर्मः प्रवृत्तिनिमित्तम्,

प्रतिपत्तिश्चेदन्त्वावच्छिन्नविशेष्यताकद्रव्यत्वावच्छिन्नाभेदसम्बन्धावच्छिन्नविधेयताकाभेदसम्बन्धावच्छिन्नावच्छेदकताऽवच्छेदकत्वेन वक्तृजिज्ञासितद्रव्यत्वव्याप्यधर्मवदभिन्नद्रव्याभिन्नामिदमित्याकारिका, तादृशजिज्ञासाऽनन्तरञ्च—इदं पृथिवी द्रव्यमित्युत्तरञ्च प्रयुज्यते,

पदार्थविभाजकधर्मावच्छिन्नविशेषणबोधककिम्पदमुदाहृत्य, धनत्वादिविशेषधर्मावच्छिन्नविशेषणबोधककिम्पदमुदाहरति—किं धनमिति । अत्र पूर्वस्येदम्पदं योजनीयम्,

विधेयांशे विशेषणबोधक किम्पदमुदाहृत्य विधेयताऽवच्छेदकांशेऽभेदसम्बन्धभेदसम्बन्धभेदेन विशेषणबोधक किम्पदमुदाहरति—भवतः कतीत्यादि,

अत्र स्वसमभिव्याहृतपदोपस्थाप्यताऽवच्छेदकावच्छिन्नोद्देश्यताकस्वार्थान्वयान्वयिताऽवच्छेदकावच्छिन्नविधेयतानिरूपितावच्छेदकत्वेन जिज्ञासितः स्वार्थान्वयिताऽवच्छेदकन्यूनवृत्तिश्च यो धर्मः तदवच्छिन्ने तादृशकिम्पदस्य शक्तिरित्यादिरीत्या ज्ञेया सेत्यर्थः,

"किमिन्दुः किं पद्मम्" इत्यादौ चान्वयिकिमो वाशब्दस्येव वितर्कोऽर्थः, वितर्कश्च प्रयोक्तुः सम्भावनाऽऽत्मकज्ञानं, तदर्थस्य च विशेष्यतासम्बन्धेन प्रथमाऽन्तपदोपस्थाप्ये विशेष्ये प्रकारितासम्बन्धेन च तत्र विशेषणस्य चन्द्रादेरन्वयः, नामार्थेनाव्ययार्थस्य भेदान्वयेऽविरोधात्,

---

किमिन्दुरित्यादि—

किमिन्दुः ? किं पद्मं ? किमु मुकुरबिम्बं ? किमु मुखं ?
किमब्जे ? किं मीनौ ? किमु मदनबाणौ ? किमु दृशौ ? ।
खगौ वा ? गुच्छौ वा ? कनककलशौ वा ? किमु कुचौ ?
तडिद्वा ? तारा वा ? कनकलतिका वा ? किमबला ? ॥

इति पूर्णम्,

संभावनेति । सम्भावना चात्रैकधर्मिकविरुद्धकोटिद्वयावगाहिज्ञानरूपसंशय एव न तूत्कटकोटिकज्ञानम्; अत एव काव्यप्रकाशादौ—

"अयं मार्तण्डः किं ? स खलु तुरगैः सप्तभिरितः
कृशानुः किं ? सर्वाः" इत्यादि सन्देहालङ्कारोदाहरणमपि सङ्गच्छते,

संशयत्वञ्च-प्रकारताविशिष्टप्रकारताशालिज्ञानत्वं पर्यवसितम्, प्रकारतावैशिष्ट्यञ्च-स्वतादात्म्यस्वविशिष्टप्रकारताकाभाववत्त्वावच्छिन्नविशेष्यतावच्छिन्नप्रकारताकविशेष्यतानिरूपितत्वोभयसम्बन्धेन, स्ववैशिष्ट्यञ्च—स्वावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नस्वावच्छेदकावच्छिन्नत्वोभयसम्बन्धेन, भेदत्वञ्च-तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्,

एवं चेदमिन्दुर्न वेत्यादिसंशयस्यापि संग्रहः,

प्रकारितावच्छिन्नप्रकारिताशालिज्ञानत्वमिति के चित्, तदर्थस्येति । किम्पदार्थस्येत्यर्थः, विशेष्य इति । अध्याहृतत्वम्पदार्थे, चेति । किम्पदार्थसम्भावनाया इत्यर्थः, इदञ्चापाततः,

वस्तुतस्तु-किम्पदार्थतावच्छेदकतादृशप्रकारतायामेवाधेयत्वसम्बन्धेनेन्द्वादेरन्वयः, तेन पदार्थान्तरे संशय एव चेदमिन्दुरित्याकारोपगमकः, तादृशज्ञानमादाय न किमिन्दुरित्यादिप्रयोगः,

अविरोधादिति । तथा चाख्यातातिरिक्तनामार्थयोरेव भेदान्वयो न स्वीक्रियत इति भावः,

अत्र नव्याः-अत्राव्ययपदं निपातपरं, तेन द्रव्यवाचकपदयोरभेदान्वय एव किशब्दस्य चादिगणान्तर्गतत्वेन निपातत्वादिति प्राहुः,

कुत्साऽर्थकमपि क चित् किंपदं, यथा किंगौरित्यादौ,

यत्र विशेषणवाचकपदमपि प्रथमाऽन्तं तत्राभेदसम्बन्धावच्छिन्नप्रकारिता ससर्गः, यत्र च प्रकृत्यर्थविशेष्यतया स्वार्थबोधकविभक्त्यन्तं विशेषणपदं; तत्र किंपदासत्त्वे तादृशविभक्त्यन्तसमुदायार्थस्य विशेष्ये यादृशसम्बन्धेनान्वयस्तादृशसंसर्गावच्छिन्नप्रकारितैव तादृशार्थस्य किंपदार्थे संसर्गः, अतः किमिन्दुरित्यादावभेदेन चन्द्रादिप्रकारिका, धनमिद किं चैत्रस्येत्यादावाश्रयत्वादिसम्बन्धेन चैत्रस्वत्वादिप्रकारिका सम्भावना नियमतः प्रती

ननु किम्पदार्थसम्भावनायां प्रकारितासम्बन्धेनेन्द्वादेरन्वये किम्पदार्थसम्भावनायाश्चेदम्पदार्थमुखादौ विशेष्यतासम्बन्धेनान्वये च स्वीकृत इन्दुपदेदम्पदार्थो सामानाधिकरण्यासम्भवेनेद जल किं नादेयमित्यादौ जल किं नादेया इमे, घटा' किं नील इत्यादिरेव प्रयाग स्यात्, समानाधिकरणयोरेव विशेष्यविशेषणवाचकपादयो समानलिङ्गवचनकत्वनियमादिति चेद् ?

न-समानाधिकरणविशेषणविशेष्यबोधकपदयो समानलिङ्गवचनकत्वनियमवत् प्रकारितासम्बन्धेन यदर्थस्य किम्पदार्थादिसम्भावनायामन्वयस्तस्याश्च विशेष्यतासम्बन्धेन यदर्थेऽन्वय तादृशपदयोरप्य सति बाधके समानवचनलिङ्गकत्वकल्पनाद्,

न च व्युत्पत्तिकल्पनमपसिद्धान्ततया हेयमिति ? लोहितबर्हि जानातीत्यादावेतत्तुल्यव्युत्पत्ते स्वयमेव कल्पितत्वाद्, एव किमिन्दुरित्यादौ प्रकारितासम्बन्धेनेन्द्वादिविशिष्टसम्भावनाया विशेष्यतासम्बन्धेन मुखादावन्वयबलात् पारतन्त्र्येण स्वनिरूपितप्रकारित्वावच्छिन्नविशेष्यताकत्वसम्बन्धेनेन्द्वादेर्मुखादावन्वयाद्, अयमिन्दुर्न वा मुखञ्च सुन्दर न वेति समूहालम्बनसशयमादाय मुख इद किमिन्दुरिति न प्रयोग,

ननु प्रकारितासम्बन्धेनेन्द्वादे सम्भावनायामन्वयोपगम इद सयोगादिसम्बन्धेनेन्दुमन्न वेत्यादिसशयस्यापि किम्पदेन बोध स्याद् ? इष्टापत्तौ च तादृशबोधानन्तर मुखादाविन्द्वादिसाधर्म्यप्रत्ययेन तादृशवाक्यस्य काव्यत्वहानि, आलङ्कारिकमते तु व्यञ्जनया तत्प्रतीतिरिति ध्येयम्,

कुत्साऽर्थकमपीति। प्रवृत्तिनिमित्ततयेति भाव, कुत्सितार्थकमिति

यते, किमिन्दुरित्यादौ सम्भावनाबोधोत्तरं तत्प्रयोजकाह्लादकत्वादिसाधर्म्यप्रतीतिस्त्वर्थादिति ।

स्यादित्यतस्तादृशसंशयव्यावृत्तय आह—यत्र विशेषणेति । अर्थादितीति । तादृशबोधानन्तरं सम्वलितमानससामग्र्या इति तु यावत्, अन्यथा किराङ्गेत्यादौ कर्म्मधारयसमासानुपपत्तिः स्यात्, किं गौरिति । कुत्सितत्वञ्च-प्रकृष्टहलवहनयोग्यत्वविरहादीति,

एवं "नमस्तस्मै कस्मै चिदमिते"त्यत्र, "कोऽपि गोपतनय" इत्यत्र, "दधत्यन्तस्तत्त्वं किमपी"त्यादौ च किम्पदस्यानिर्व्वचनीयविशेषधर्म्मके शक्तिर्व्वाच्या तथा च कस्मै चिदित्यादेरनिर्व्वचनीयविशेषधर्म्मावच्छिन्नायेत्यर्थः; विशेषत्वञ्च-तत्तन्मात्रवृत्तित्वम्, अनिर्व्वचनीयत्वञ्च शब्दानिर्देश्यत्वम्, अतस्तादृशधर्म्मस्य योगजमात्रजन्यप्रत्यक्षविषयत्वेऽपि न क्षतिः, "कश्चित् कान्ताविरहगुरुणेत्यादौ" "कोऽपि ब्राह्मणो वर्त्तते" इत्यादौ चोभयावृत्तिधर्म्मावच्छिन्ने शक्तिरपि किम्पदस्य वाच्या, उभयावृत्तित्वञ्च—स्वप्रतियोगिवृत्तित्वस्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वरूपोऽनुगतधर्म्मः प्रवृत्तिनिमित्तताऽवच्छेदकः,

एवञ्च "पार्थान्यः कः शूर" इत्यादौ,

"कः संनद्धे विरहविधुरां त्वय्युपेक्षेत जायां-
न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिरि"-

त्यादौ च शूरादिपदस्य, उपपूर्व्वेक्षादिधातोश्च विरोधसम्बन्धेन शूरादिभिन्ने, उपेक्षाऽऽद्यभावे च लक्षणा,

कल्प्यते च—तादृशकिम्पदघटितवाक्यस्यावच्छेदावच्छेदेनान्वयोपयोगित्वं, तथा च पार्थान्याभिन्नोभयावृत्तिधर्म्मावच्छिन्नः शूराभिन्न इत्याद्याकारकः, पराधीनवृत्तिकजनभिन्नोभयावृत्तिधर्म्मावच्छिन्नो जायाकर्म्मकोपेक्षाभावाश्रय इत्याद्याकारकश्च बोधः, अपिशब्दसमभिव्याहृतकिम्पदस्थले च न विरुद्धे लक्षणा, न वाऽवच्छेदावच्छेदेनान्वयोपयोगित्वञ्च कल्प्यते, कल्प्यते च सामानाधिकरण्येनैवान्वयस्त्वदन्यः कोऽपि ददातीत्यादौ त्वद्भिन्नः कश्चिज्जनो दानकर्तृत्ववानित्याकारकतादृशान्वयस्य सामानाधिकरण्येन,

एवञ्च—सामानाधिकरण्येन वह्निविरहनिश्चयदशायामपि तादृशबोधो जायत एव,

केचित्तु—पार्थान्यः कः शूर इत्यादावन्योन्याभावप्रतियोगिताऽवच्छेदकपर्य्याप्तिकयावत्त्वावच्छिन्ने किम्पदस्य शक्तिं कल्पयित्वा पार्थ-

तत्पदप्रतिपाद्यतया वक्तृबुद्धिविषयताऽवच्छेदकत्वोपलक्षितधर्म्मावच्छिन्ने यत्पदस्य शक्तिः, अत एव यत्पदेनार्थप्रत्यायने नियमतस्तत्पदापेक्षा, तत्पदसमभिव्याहारज्ञानं विनोक्तानुगमकधर्म्मग्रहेण शक्तिपरिच्छेदस्यैवासम्भवात्, तच्छब्दजन्यप्रतिपत्तिपूर्व्वमपि तत्प्रतिपाद्यतया वक्तुरभिसन्धिः प्रकरणादिना सुग्रह इति न तच्छब्दजन्यप्रतीतेर्यत्पदशक्तिग्रहेऽपेक्षा,

इयञ्च व्युत्पत्तिः प्रक्रम्यमाणपरामर्शकयच्छब्दस्य चैत्रः समागतो यस्तत्रावलोकित इत्यादौ चैत्रादिपदेनाप्युपस्थापितस्य तस्य यच्छब्देन बोधनाद्, अत एव–

"साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताऽधिके"

भिन्नान्योन्याभावप्रतियोगिताऽनवच्छेदकपर्य्याप्तिकयावत्त्वावच्छिन्नः शूरामिन्न इत्याद्यन्वयबोधं कल्पयन्तीत्यास्तां विस्तरः ।

इति किम्पदशक्तिविचारविवृतिः ।

वक्तृबुद्धीति। घटस्तत्पदजन्यबोधीयविषयतावान् भवत्वित्याद्याकारकतात्पर्य्यजनकं यत् तत्पदजन्यबोधीयविषयतावान् घटो मदिष्टसाधनमित्यादिवक्तृज्ञानं तदीयतत्पदजन्यबोधीयविषयत्वनिष्ठप्रकारताकविशेष्यताऽवच्छेदकत्वोपलक्षितधर्म्मावच्छिन्न इत्यर्थः, शक्तिपरिच्छेदस्यैव=शक्तिग्रहस्यैव, वक्तुरभिसन्धिरिति। वक्तृबुद्धिरित्यर्थः,

ननु तत्पदजन्यप्रतिपत्तिश्च तत्पदघटितवाक्यजन्या, तत्पदघटितवाक्यञ्च यत्पदघटितमतो यत्पदस्य शक्तिग्रहे तत्पदजन्यप्रतीत्यसम्भवेन तादृशप्रतीतिघटितानुगमकधर्म्मज्ञानं कुतः ? परस्परसापेक्षत्वेनान्योन्याश्रयश्चेत्यत आह–

प्रकरणादिनेति । प्रक्रम्यमाणेति । पूर्व्वपदानुपस्थापितवक्तृबुद्धिविषयपरामर्शकत्वं, बोधनादिति । तथा च चैत्रस्तद्देशाधिकरणातीतदर्शनविषय इति पृथगन्वयबोधः,

साधु चन्द्रमसीति ।

साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताऽधिके।
उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः ॥

इति सम्पूर्णम्,

अन्वयार्थ.–अभिरामताऽधिके चन्द्रमसि सति पुष्करैः पद्मैः कृतमा-

इत्यादौ तत्पदासत्त्वेऽपि न दोषः, पूर्व्वप्रक्रान्तस्य कृतपदो-पस्थाप्यव्यापारस्यैवाभेदेन मीलनान्वयितया यच्छब्देन बोधनात्,

एवं "यं सर्व्वशैला" इत्यादावपि तदनुरोधेन पूर्व्वप्रयुक्तपदो-पस्थापितेऽपि तस्य शक्त्यन्तरं स्वीकरणीयम्, अतिप्रसङ्गश्च स्वप्र-योजकबुद्धिस्थत्वमन्तर्भाव्यैव वारणीयः,

---

चरणं साधु सम्यक्, तत्किमित्यत आह-यद् मीलितं तादृशाचरणं मील-नमिति, अयिमि कामिनीमुखे सति; उद्यता उद्गच्छता तेन चन्द्रेण अनुष्ठितमाचरणम् अर्थादुद्गमनरूपं साहसं सहसा कृतं; न तु विवे-चनया तथा च तदनुचितं न साध्विति पर्य्यवसितम्, कृतपदोपस्थाप्येति । एवञ्च व्यापाराभिन्नं मीलनमित्यन्वयबोधः,

यत्तु-कृष्णभट्टेन साधुकरणाभिन्नं मीलनमित्यन्वयबोध उक्तः,

तत्तुच्छं-कृतपदोपस्थाप्यव्यापारस्यैवेत्यस्यासङ्गत्यापत्तेः, व्यापा-रमात्रप्रतिपादनेन चरितार्थत्वाच्चेति । यं सर्व्वशैला इति । यं हिमालय-नामकं पर्व्वतमित्यर्थः, तदनुरोधेनेति । तच्छब्दं विनाऽपि यच्छब्देन चैत्रव्यापारादिबोधानुरोधेनेत्यर्थः, पूर्व्वप्रयुक्तेति । स्वोच्चारकपुरुषकर्तृ-कपूर्व्वकालोच्चरितेत्यर्थः,

ननु यथा हिमाद्रयः प्रक्रान्तस्तथा तोयनिधिरपि; कुतस्तस्यापि यं-सर्व्वशैला इत्यादौ यत्पदेन न बोधः ? इत्यत आह-अतिप्रसङ्गेति । स्वप्र-योजकबुद्धिविषयताऽवच्छेदकत्वे सति पूर्व्वपदजन्योपस्थितिविषयताऽव-च्छेदको यो धर्म्मस्तदवच्छिन्नेऽपि यत्पदस्य शक्तिरिति, स च धर्म्मो-यो ब्राह्मणायाऽऽयुरेव त्वं ददेन्न यावद्दिग्ध्यादावुभयावृत्तित्वेन तत्तद्-किल्वादिः,

एवं यो यो धूमवान् स वह्निमानित्यादौ महानसत्वमहानसाव-त्वादिः, स च प्रकरणादिनैव ज्ञायते; अत एव "काञ्चिदपादौ यत्र दानं-तदनन्वयितिम्दितमि"त्यत्र यत्पदार्थप्रकारेण दानाभावेऽन्वय इति जगदीशेनोक्त, तत्र यत्पदार्थस्यानपाद्यभिन्यस्मांवच्छिन्न एव इति भावः, तथा च तोयनिधेः प्रक्रान्तत्वेऽपि न बुद्धिस्थत्वम्, अतो न तत्र यत्पदेन तस्य बोधः; केवलवह्निविषयकबुद्ध्या यच्छब्दप्रयोगे तेन न तस्य बोधः; अतः प्रक्रान्तत्वमप्युपलक्षणतया बोध्यम् ।

संकेतश्च—स्वविशिष्टधर्म्मावच्छिन्नविषयकत्वसम्बन्धेनायसम्ब-न्धेन यत्पदविशिष्टबोधो भवत्वित्याकारकः, स्वपदं यच्छब्दपरं, स्वत्वस्य संसर्गपरिचायकतया नानुगमः, स्वैविशिष्टञ्च-स्वोच्चारकपुरुषकर्तृक-

अदसश्च परोक्षविषये शक्तिः।

स्वशब्दस्य समभिव्याहृतपदोपस्थाप्ये शक्तिः, समभिव्याहृतत्वन्त्वेकवाक्यघटकत्वम्,

अथैवं चैत्रः स्वपुत्रं पश्यतीत्यादाविव स्वं चैत्रपुत्रः पश्यति चैत्रभ्राता वा स्वपुत्रं पश्यतीत्यादौ न कथं स्वशब्देन चैत्रः प्रत्याय्यते ? मुख्यविशेष्यवाचकताव्युत्पत्त्यभ्युपगमे स्वपुत्रदर्शिनं चैत्रं मैत्रः पश्यतीत्यादौ चैत्रपुत्रबोधानुपपत्तिः,

---

स्याच्च घटत्वेन हेतुत्वे पक्षमात्रवृत्तित्वाभावेनासाधारणोदाहरणासङ्गतिरिति, सोऽयं देवदत्त इत्ययं जानातीत्यादिप्रत्यभिज्ञाबोधकवाक्ये तत्पदमनुभूतार्थकम्, इदम्पदञ्च प्रत्यक्षविषयपरं, तथा चानुभूताभिन्नप्रत्यक्षविषयाभिन्नो देवदत्त इत्याकारकज्ञानवानिति तज्जन्यबोधः,

परोक्षेति। लौकिकप्रत्यक्षभिन्नज्ञानविषयेऽदःशब्दस्य शक्तिरित्यर्थः, तथा च "देवोऽसौ विरतप्रपञ्चरचनाकल्लोलकोलाहलः" इत्यादौ परमेश्वरस्य लौकिकप्रत्यक्षाविषयत्वेऽप्यलौकिकप्रत्यक्षविषयत्वमादायासावित्यादिना तस्य बोधः,

वस्तुतस्तु 'क्रमादमुं नारद इत्यबोधि सः' "दधति परममी सायका निष्पतन्तः" इत्यादयो लौकिकप्रत्यक्षविषयेऽपि भूरितरप्रयोगदर्शनात्, अतिसन्निकृष्टनिष्ठलौकिकविषयताभिन्नप्रत्यक्षीयविषयताविशिष्टेऽदसः शक्तिर्वाच्या, परोक्षपदं तादृशविषयताशालिप्रत्यक्षपरम्, अत एव मिश्रैर्व्यवहितप्रत्यक्षविषयेऽदसः शक्तिरित्युक्तं, शाब्दिकैरपि—

"अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादि" ति गीतम्,

सन्निकृष्टत्वन्तु वक्तृनिरूपितं, नारदादेः किञ्चिद्दूरस्थत्वेन न तादृशविषयत्वानुपपत्तिरित्यलं पल्लवितेन।

एकवाक्यघटकत्वमिति। स्वप्रयोज्यविषयतानिरूपितविषयताप्रयोजकत्वमिति पर्यवसितार्थः, एवमिति। स्वशब्दस्य तादृशपदोपस्थाप्ये शक्यत्व इत्यर्थः, स्वं चैत्रपुत्र इत्यत्रासमस्तस्वपदे आपत्तिं दर्शयित्वा; समस्तस्वशब्दे आपत्तिं दर्शयति—चैत्रभ्राता वेति। चैत्रः प्रत्याय्यत इति। इदन्तु तत्पुरुषे लक्षणाऽनङ्गीकर्त्तृमते बोध्यम्, अन्यथा चैत्रपुत्र इत्यादौ चैत्रपदेन चैत्रसम्बन्धिन एवोपस्थापनाच्चैत्र इत्यस्यासङ्गतिः स्यात्,

न चावान्तरवाक्यार्थबोधे चैत्रस्य मुख्यविशेष्यतया नैयमनुपपत्तिरिति वाच्यम् ?

अन्तराऽप्यान्तरवाक्यार्थबोधमन्तरेणाह्नत्यैव विशेष्ये विशेष-

मुख्यविशेष्येति । स्वघटितवाक्यजन्यबोधीयमुख्यविशेष्यताऽवच्छेदकावच्छिन्नवाचकतास्वीकार इत्यर्थः, तथा च चैत्रपुत्र इत्यत्र चैत्रादेर्मुख्यविशेष्यत्वाभावान्न तस्य बोध इति भावः, चैत्रपुत्रेति । स्वपुत्रेतिवाक्येनेति शेषः, तत्र मैत्रस्यैव मुख्यविशेष्यतया भानादिति, मुख्यविशेष्यतयेति ।

अन्वयान्तरवाक्यञ्च—स्वपुत्रदर्शिनं चैत्रमित्यन्तं; तेन च द्वितीयाऽर्थकर्मत्वमुख्यविशेष्यस्वपुत्रदर्शिचैत्रप्रकारक एव बोधो जायते, संख्याकालातिरिक्तधर्मस्यार्थस्य प्रकृत्यर्थविशेष्यतया भाननियमात्, तथा च चैत्रे मुख्यविशेष्यत्वविरहेण कुतः स्वपदेन तस्य बोध इति चेत् ?

न—सुबर्थकर्मत्वादिकं प्रकृत्यर्थविशेषणतयैव भासत इति प्राचीनमतलम्ब्यैवोक्तत्वात्,

ते तु ग्रामं गच्छतीत्यादौ गमनाद्यर्थे कर्मत्वाऽऽधारग्रामादेः कर्मत्वासम्बन्धेनान्वयं वदन्ति, लिखितञ्चैतत् स्वयमेव मञ्जूषादर्पणिकायाम्,

यत्तु—अवान्तरवाक्ये कर्मत्वाविवक्षणेनैकत्वप्रकारकत्वाद्यंशमुख्यविशेष्यकबोधसम्भव इत्यभिप्रायेण तदुक्तमिति;

तदसत्—अवान्तरवाक्यजन्यबोधे कर्मत्वभाने महावाक्यजन्यबोधे तद्भानानुपपत्तेः महावाक्यार्थबोधोपपत्तय एवावान्तरवाक्यार्थबोधकल्पनाच्चेति,

आहृत्यैवेति । महावाक्यघटकप्रत्येकपदजन्यप्रत्येकपदार्थोपस्थित्यव्यवहितोत्तरमेवेत्यर्थः, विशेष्ये विशेषणेति । शाब्दबोधो हि द्विविधः—विशिष्टवैशिष्ट्यावगाही; उपलक्षितावगाही च, तत्र विशिष्टवैशिष्ट्यावगाहिज्ञानं प्रति विशेषणतावच्छेदकप्रकारेण विशेषणज्ञानस्य हेतुतया तत्सम्पादनार्थं महावाक्यघटकखण्डवाक्यजन्यबोध आवश्यकः, उपलक्षितावगाहिज्ञाने च विशेषणज्ञानस्याजनकतया महावाक्यघटकप्रत्येकपदार्थां उपस्थिताः "खले कपोतन्यायेन" एकं विशेषणम् अपरञ्च विशेष्यमिति रीत्या युगपदन्वयन्ते, तत्र कुत्र कस्य चिद् विशेषणत्वं कस्य चिद्विशेष्यत्वमिति नियमस्त्वाकाङ्क्षादिवशादुपपद्यत इति भावः,

इत्थं विशिष्टवैशिष्ट्यावगाहि कुत्र चिदुपलक्षितावगाहि ज्ञानमित्यत्र

णमिति रीत्या महावाक्यार्थबोधे यत्र तात्पर्य्यं तत्रैव तदनुपपत्तेर्दु-र्व्वारत्वात्,

न च स्वार्थस्य साक्षात् परम्परया वा यदर्थे विशेषणत्वं तादृशार्थबाधकृताव्युत्पत्तेर्नायं दोष इति वाच्यम् ?

एवमपि स्वपुत्रश्चैत्रेण दृश्यत इत्यादौ चैत्रपुत्रबोधानुपपत्तेः, स्वसमभिव्याहृतक्रियाऽन्वयिवाचकत्वमपि न विचारं सहते; परम्परया क्रियाऽन्वयित्वस्य चैत्रभ्राता स्वं पश्यतीत्यादौ चैत्रादिसाधारणत्वात् साक्षात् क्रियाऽन्वयित्वस्य चैत्रः स्वं पश्यतीत्यादावप्यभावात् तत्र विभक्त्यर्थद्वारैव नामार्थधात्वर्थयोर्भेदान्वयस्य व्युत्पन्नत्वात्,

क्रियाऽन्वयिप्रत्ययार्थे साक्षादन्वयित्वविवक्षणान्न दोष इति चेद्?

तात्पर्य्यस्य नियामकतयाऽऽह—यत्र तात्पर्य्यमिति । विशेषणत्वमिति । विशेष्यतया वक्त्रभिप्रेतत्व, तथा च स्वार्थनिष्ठप्रकारताकविशेष्यताऽवच्छेदकत्वेन वक्त्रभिप्रायविषयतावद्धर्म्मावच्छिन्ने स्वशब्दस्य शक्तिरिति तु पर्य्यवसितार्थ, नायं दोष इतीति । स्व चैत्रपुत्र पश्यतीत्यादौ स्वपदार्थे चैत्रपुत्रादेर्विशेष्यतया स्वपुत्रदर्शनमित्यादौ च स्वार्थे चैत्रादेर्विशेष्यतया च स्वपदेन तस्य तस्य बोध इति भाव,

क्रियाऽन्वयीति । तत्त्वञ्च—क्रियानिष्ठविषयतानिरूपितविषयतावत्त्व, साक्षादन्वयित्वेति । तच्च न प्रत्ययार्थविषयतानिरूपितविषयतानिरूपितविषयताशून्यत्वे सति प्रत्ययार्थनिष्ठविषयतानिरूपितविषयतावत्त्व वाच्य, तथा सति स्वपुत्रदर्शिन चैत्र मैत्र इत्यादौ दृशधातूत्तरेनप्रत्ययार्थकर्त्तृनिष्ठविषयतानिरूपितचैत्रपदोत्तरद्वितीयाऽर्थविषयतानिरूपितविषयतायाश्चैत्रे सत्त्वेन तादृशविषयताशून्यत्वविरहात् तद्बोधानुपपत्ते',

न चेनप्रत्ययार्थनिष्ठविषयतानिरूपितत्व चैत्रनिष्ठविषयतायामेव, न तु कर्म्मत्वनिष्ठविषयताया स्वीक्रियते व्यवहितत्वादिति वाच्यम् ?

तथा सति परम्पराक्रियाऽन्वयित्वस्य दुर्व्वचतया पूर्व्वग्रन्थासङ्गते , साक्षादित्यस्य कथनासङ्गतेश्च,

न च साक्षान्निरूपितत्व परम्परानिरूपितत्वञ्चातिरिक्तमेवेति वाच्यम्? मानाभावादिति चेत् ?

सत्य—स्वनिरूपितनिरूपकत्वस्वनिरूपितत्वान्यतरत्वं तद्, विशेष्यताऽऽदौ प्रकारताऽऽदिनिरूपितत्वमेव न तु तन्निरूपकत्व, प्रकारता-

एवमपि स्वव्यापकवह्निसमानाधिकरणधूमवान् पर्व्वत इत्यादौ स्वशब्देन धूमादिपरामर्शानुपपत्तिवारणमशक्यमेव,

एवं चैत्रेणानीतं स्वपुत्रं मैत्रः पश्यतीत्यादौ चैत्रपुत्रबोधापत्तिवारणमपि,

न च स्वपदार्थो यदर्थघटितविशेषणस्य विशेष्यताऽवच्छेदककोटौ यदर्थस्य विशेषणकोटौ वा निविशते; स एव पदार्थः स्वशब्दवाच्यः, चैत्रपुत्रः स्वं पश्यतीत्यादौ चैत्रस्य भ्राता स्वपुत्रं पश्यतीत्यादौ च स्वपदार्थश्चैत्रस्य विशेषणकोटौ चैत्रघटितार्थस्य धर्म्मिताऽवच्छेदककोटौ वा न निविशत इति नातिप्रसङ्गः, चैत्रावलोकितं स्वपुत्रं मैत्रः पश्यतीत्यादौ चैत्रपदस्य चैत्रकर्त्तृके लक्षणया चैत्रः पदार्थैकदेशो न तु पदार्थ इति स्वशब्दाच्च तत्प्रतीतिः, चैत्रेणावलोकितमित्यादौ तु तात्पर्य्यसत्त्व इष्यत एव ततस्तत्प्रतीतिः, स्वपु-

ऽऽद्रावपि विशेष्यताऽऽदिनिरूपकत्वमेव, न तु तन्निरूपितत्वम् अन्यथा बहुतरासामञ्जस्यापत्तेः, एवञ्च नानुपपत्तिलेशोऽपीति ध्येयम्,

धूमादिपरामर्शेति । तत्र धूमे क्रियाऽन्वयिप्रत्ययार्थे साक्षादन्वयित्वविरहादिति,

ननु समानाधिकरणेतिबहुव्रीहिघटकल्युट्प्रत्ययस्य लक्षणयाऽधिकरणसम्बन्धिलाक्षणिकतया तादृशसम्बन्धिनोऽभेदेन धूमाद्यन्वयेन क्रियाऽन्वयिप्रत्ययार्थे साक्षादन्वयित्वस्य तत्र सत्त्वेन नानुपपत्तिरित्यतो दोषान्तरमाह—चैत्रेणानीतमिति । चैत्रपुत्रेति । आनयनक्रियाऽन्वयितृतीयाऽर्थकर्त्तृत्वे साक्षादन्वयित्वस्य चैत्रे सत्त्वादिति भावः,

यदर्थघटितेति । विशेषणस्येत्यत्र षष्ठ्यर्थः प्रकारताकत्वं, तस्य चोत्तरवर्त्तिविशेष्यतायामन्वयः; कोटावित्यनन्तरं निविशत इति योजनीयं, तथा च स्वार्थनिष्ठावच्छेदकताकविशेष्यतानिरूपितप्रकारताऽवच्छेदकत्वेन वक्त्रभिप्रेते स्वशब्दस्यैका शक्तिरिति स्वार्थनिष्ठप्रकारताकविशेष्यत्वेन वक्त्रभिप्रेते चापरा शक्तिरिति चैत्रेण स्वपुत्रो दृश्यत इत्यत्र चैत्रः स्वपुत्रं पश्यतीत्यत्र स्वव्यापकवह्निसमानाधिकरणधूमवानित्यादौ च; स्वशब्देन चैत्रधूमादेर्बोधोपपत्तिः,

अतिप्रसङ्गवारणं दर्शयति—चैत्रपुत्र इत्यादि, न तत्प्रतीतिरिति । न चैत्रप्रतीतिरित्यर्थः, चैत्रकर्त्तृकस्य स्वपदार्थत्वाच्च प्रतीतिरिति भावः,

त्रदर्शिचैत्रधनमित्यादौ चैत्रपुत्रदर्शिचैत्रसम्बन्धित्वाद्यवच्छिन्ने चैत्रान्तस्य वाक्ये लक्षणाविरहे पूर्वभागं परित्यज्य तादृशलक्ष्यार्थपरस्य केवलचैत्रादिपदस्यैव वा तत्र लक्षणया तत एव चैत्रपुत्रादिप्रतीत्युपपत्तिरिति वाच्यम् ?

एवं सति चैत्रस्य भ्रात्रा स्वपुत्रो दृश्यत इत्यादौ स्वपदेन चैत्रप्रतीत्यापत्तेर्दुर्वारत्वाद्,

मैवं—साक्षात् परम्परया वा यः स्वार्थस्य विशेष्यः; यश्च समभिव्याहृतक्रियाकारकपदार्थस्तदुभयत्रैव स्वपदस्य शक्तिः, स्वव्यापकवह्निसामानाधिकरण्यं धूम इत्यादावस्तीति क्रियाऽध्याहाराद्

नतु तत्पुरुषे तत्तद्विभक्त्यर्थविशिष्टे प्रकृतिपदं यदि लाक्षणिकं तदा स्वपुत्रदर्शिचैत्रधनमित्यादौ कुतः स्वपदेन चैत्रादेर्बोधः? तत्र चैत्रादिपदानां चैत्रसम्बन्ध्यादौ लाक्षणिकत्वादित्यत आह—स्वपुत्रेति । चैत्रान्तस्येति । शाब्दिकमताभिप्रायेण,

सिद्धान्तमारभते—मैवमिति । मतुपो भेदसम्बन्धेनान्वयतात्पर्यग्राहकत्वं न तु सम्बन्धार्थकत्वमिति मते तादात्म्येन शुक्लस्वधान् घट इत्यादौ स्वपदार्थे साक्षाद्विशेष्यस्य घटस्य बोधाय साक्षादिति । स्वव्यापकवह्निसमानाधिकरणो धूमः स्वलक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिका सिद्धिरित्यादौ च; स्वपदेन धूमसिद्ध्यादेर्बोधनार्थं—परम्परयेति । चैत्र स्वं पश्यति चैत्रेण स्वपुत्रो दृश्यत इत्यादौ चैत्रमभिवन्दते स्वपुत्र इत्यादौ स्वपदेन चैत्रादिबोधार्थं—समभिव्याहृतक्रियेति । चैत्रभ्राता स्वपुत्रं पश्यति चैत्रभ्रात्रा स्वपुत्रो दृश्यत इत्यादौ चैत्रस्य तु पदार्थस्य विशेष्यत्वाभावेन समभिव्याहृतक्रियाकारकपदार्थत्वाभावेन च न स्वपदेन बोधः, क्रियाकारकत्वञ्च—क्रियाऽन्वितविभक्त्यर्थान्वयित्व, तच्च चैत्रभ्रातर्य्येवेति बोध्यम्,

ननु स्वव्यापकवह्निसमानाधिकरणधूमवानित्यादौ वह्न्यादेरपि स्वपदार्थस्य परम्परया विशेष्यतया तस्य कुतो न बोधः?

एवं देवदत्ताय स्वपुत्रं ददाति मैत्रो देवदत्ते स्वपुत्रं पश्यति मैत्र इत्यादौ देवदत्तादेः समभिव्याहृतक्रियाकारकपदार्थतया स्वपदेन तस्य बोधप्रसङ्ग इति,

न च स्वार्थस्य यद्धर्मावच्छिन्नविशेष्यः, यच्च समभिव्याहृतक्रियाकर्तृका-

धूमस्य समभिव्याहृतक्रियाकारकत्वमक्षतमेवेति न स्वपदात्तत्प्रतीत्यनुपपत्तिः,

एवं "कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारिता गुणः" इत्यादावपि क्रियाऽध्याहारात् स्वपर्य्यायनिजपदात् कलशादिप्रतीतिः, स्वव्यापकवह्निसामानाधिकरण्यं धूमस्येत्यादयश्च न प्रयोगाः,

---

एवं तथा च स्वव्यापकत्वादौ धूमादिरेव सम्बन्धिविशेष्यः, स एव च कर्तृकारकमतो न वह्न्यादेस्तादृशबोध इति वाच्यम्?

तथा सति स्वव्यापकवह्निसमानाधिकरणधूमवान् पर्वत इत्यादौ स्वव्यापकवह्निसामानाधिकरण्यं धूमेऽस्तीत्यत्र धूमस्य बोधानुपपत्तेरिति चेद्?

न—स्वपदजन्यबोधत्वेन वक्तृतात्पर्य्यविषयत्वे सति तादृशविशेष्यो यः, यच्च तादृशकारकं तदुभयत्रैव स्वपदस्य शक्तत्वेन वह्निरित्यादौ तादृशतात्पर्य्यविषयत्वाभावात्,

अथैवं सति तादृशवक्तृतात्पर्य्यविषय एव शक्तिकल्पनेनातिप्रसङ्गवारणसम्भवे विशेष्यत्वादिनिवेशस्य वैयर्थ्यमिति चेद्?

न—चैत्रभ्राता स्वपुत्रं पश्यति, चैत्रस्य गेहे मैत्रः स्वपुत्रं पश्यतीत्यादौ स्वपदस्य चैत्रादौ वक्तृतात्पर्य्यविषयत्वसत्त्वेऽपि चैत्रादिबोधाविरहात् स्वव्यापको वह्निरस्त्यत्रेव यदा स्वव्यापकवह्निसमानाधिकरणो धूम इत्यादावपि स्वपदस्य वह्नौ तात्पर्य्यमस्ति, न तु व्याप्तौ तदा वह्निबोध इष्ट एवेति ध्येयम्,

कलश इत्यादि । शेषार्थस्तु—

"स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रममातनोति यद्" इति,

निजस्य स्वस्य हेतुर्निमित्तकारणं यो दण्डस्तज्जन्यः चक्रभ्रमकारित्वं गुणो धर्मः कलसे कार्य्यरूपे किमु? अस्तीत्यन्वयः, तस्य च नाशादितस्त्वेन तादृशधर्मः सम्भाव्यत इत्यर्थः, कारणगुणः कार्य्यगुणमारभत इति न्यायात्,

नतु तादृशधर्म्मो दमयन्त्याः स्तनवृत्तित्वमेव सम्भाव्यते न तु कलसवृत्तित्वम् इत्यतस्तदुपपादयति—स इति । स कलसरूपदमयन्त्या उच्चकुचावुपगतस्तयोः भवन् प्रभाझरे कान्तिप्रवाहे मादृशकस्य भ्रमं भ्रान्तिमातनोति यद् यस्मादित्यर्थः,

अथ वा यदिति—आतनोतीतिक्रियाविशेषणं, तथा च तादृशक्रियैव निजहेतुदण्डजचक्रभ्रमकारितागुणत्वेन सम्भाव्यत इति,

इदन्तु चिन्त्यते-यद्रूपेण समभिव्याहृतपदादुपस्थितिस्तद्रूपावच्छिन्नस्य स्वपदार्थत्व एकेन ब्राह्मणेन ब्राह्मणान्तरपुत्रदर्शनदशाया ब्राह्मण स्वपुत्र न पश्यतीत्यादिप्रयोगानुपपत्तिः, अन्वयिताऽवच्छेदकावच्छिन्नाभावस्य विशेष्ये बाधात्, समभिव्याहृतपदार्थनिष्ठतत्तद्व्यक्तित्वावच्छिन्नस्य तदर्थत्वेऽपि वह्निकालीनद्रव्यवति ह्रदादौ स्वाव्यापकवह्निकालीनद्रव्यं नास्तीति प्रयोगानुपपत्तिः, तत्र द्रव्यपदस्यापि लक्षणया तत्तद्व्यक्तित्वावच्छिन्नपरत्वे महानसादावपि तथाप्रयोगापत्तिस्तथाविधयत्किञ्चिद्व्यक्त्यभावस्य तत्राबाधात्, तादृशसमभिव्याहृतस्थले यद्यद्व्यक्तिव्यापकता वह्नेस्तत्तद्व्यक्तित्वावच्छिन्नाभावकूट एव नियमतः प्रतीयत इति चेद् ?

न—तथाविधसकलव्यक्तिनिष्ठतत्तद्व्यक्तित्वाना युगसहस्रेणापि ज्ञातुमशक्यत्वात्, कदा चित् कस्य चिज् ज्ञानसम्भवेऽपि कतिपयतत्तद्व्यक्तित्वमात्रोपस्थितिदशाया कतिपयाभावमात्रगोचरप्रतीतेरभ्युपगन्तव्यतया तादृशनियमस्य सुदूरपराहतत्वादिति,

अत्र केचिद्-ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ स्वपदं ब्राह्मणत्वावच्छिन्नार्थकमेव, विशेष्यीभूतब्राह्मणत्वाद्यवच्छिन्ने च स्वपदार्थघटितस्य ब्राह्मणपुत्रदर्शनकर्तृत्वादिरूपविशेषणस्य न केवल-

अन्वयिताऽवच्छेदकेति। स्वपदेन ब्राह्मणत्वेन ब्राह्मणस्योपस्थित्या ब्राह्मणपुत्रकर्म्मकदर्शनाश्रयतात्वावच्छिन्नाभावस्य, विशेष्ये कर्त्तरि ब्राह्मणे, समभिव्याहृतेति । समभिव्याहृतपदजन्योपस्थितिप्रकारवृत्त्युभयावृत्तित्वरूपसामान्यधर्म्मोपलक्षिततत्तद्व्यक्तित्वावच्छिन्नस्येत्यर्थः,

एवञ्च तत्तद्व्यक्तित्वभेदेन न शक्त्यानन्त्य, न वाऽपूर्व्वव्यक्तिभानानुपपत्ति-, स्वपुत्रमित्यत्र स्वपदेन तात्पर्य्यवशात् तत्तद्दर्शनकर्तृत्वाभावस्य ब्राह्मणे सत्त्वेन नायोग्यतेति भावः, प्रतियोगिताऽवच्छेदकावच्छिन्नाधिकरणत्वसत्त्वसूचनाय—वह्निकालीनेति ।

तत्तद्व्यक्तित्वावच्छिन्नाभावकूट एवेति । इदञ्च तात्पर्य्यसत्त्वे सकृदुच्चरितशब्दस्याप्यनेकार्थगमकतामङ्गीकृत्यैव, अन्यथा सकृदुच्चरितद्रव्यपदेनानन्ततत्तद्द्रव्यव्यक्तित्वावच्छिन्नानां कथमपि बोधासम्भवाद्, अङ्गीकर्त्तव्यञ्चैतत् । असर्व्वज्ञपुरुषीयतादृशवाक्यस्य प्रामाण्यान्यथाऽनुपपत्त्ये-

स्याश्रयत्वादिसम्बन्धेनान्वयः; अपि त्वाश्रयत्वस्वनिरूपकदर्शनविषयपुत्रजनकत्वोभयसम्बन्धेनैव, एवञ्च तत्र नञा तादृशोभयसम्बन्धावच्छिन्नतदभाव एव प्रत्याय्यतेऽतो नोक्तदोष इति वदन्ति ।

एकशब्दस्य कैवल्यादिविशिष्टे शक्तिः, कैवल्यञ्च-स्वसजातीयद्वितीयराहित्यं, तच्च--स्वसजातीयनिष्ठभेदाप्रतियोगित्वं, स्वसजाती-

---

ति भावः, स्वेनादृश्यमानपुत्रस्यान्यकर्तृकदर्शनकाले स्वपुत्रं पश्यतीति वारणायाश्रयत्वेति प्रथमसम्बन्धः,

स्वनिरूपकेति । स्वं तिङर्थाश्रयत्वादि, चैत्रेण स्वपुत्रो दृश्यत इत्यादावाख्यातार्थविषयत्वस्याश्रयत्वस्वनिरूपकदर्शनकर्तृजन्यत्वोभयसम्बन्धेन पुत्रादावन्वयः, चैत्रः स्वधनं पश्यतीत्यादौ स्वाश्रयत्वस्वनिरूपकदर्शनविषयधनस्वामित्वोभयसम्बन्धेनान्वयः, स्वव्यापकवह्निकालीनद्रव्यवान् पर्वत इत्यादौ तु स्वपदं तत्तद्धूमव्यक्तिपरं, तादृशद्रव्यस्य पर्वतादौ संयोगः, स्वांशे परम्परया विशेषणवह्निनिष्ठव्यापकतानिरूपकतत्तद्व्यक्तिप्रतियोगिकसंयोगश्चैतदुभयसम्बन्धेन तत्तद्व्यक्तिप्रतियोगिसंयोगेन चान्वयेऽतो ह्रदस्तादृशद्रव्यवान्, तादृशोभयसम्बन्धावच्छिन्नत्वस्य ह्रदवृत्तित्वे विरहेण ह्रदे तादृशद्रव्यमित्यादयस्तु न प्रयोगाः, अपि तु ह्रदे तादृशद्रव्यं नास्तीत्यादय एव,

केचित्तु—स्वव्यापकवह्निकालीनस्य तादात्म्यं स्वांशे विशेषणवह्निनिष्ठव्यापकतानिरूपकताश्रयत्वञ्चैतदुभयसम्बन्धेन द्रव्येऽन्वयाद् न तादृशापत्त्यनुपपत्ती इत्याहुः,

वदन्तीति । अस्वरससूचनाय, तद्बीजञ्च-ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ स्वपदार्थस्य ब्राह्मणत्वाद्यवच्छिन्नस्य यस्य ब्राह्मणस्य पुत्रोऽप्रसिद्धस्तमादायापि ब्राह्मणः स्वपुत्रं न पश्यतीत्यादिप्रयोगापत्तिः, निरुक्तोभयसम्बन्धेन ब्राह्मणपुत्रकर्मकदर्शनाश्रयत्वाभावस्य तत्र सत्त्वात् ,

अत्र ब्रूमः-ब्राह्मणः स्वपुत्रं पश्यतीत्यादौ ब्राह्मणादिपदानां देवदत्तादिपरत्वम्; अन्यथाऽव्यावर्त्तकताऽऽपत्तेः, स्वव्यापकवह्निकालीनद्रव्यं ह्रदे नास्तीत्यादौ द्रव्यादिपदानां धूमादिपरत्वमपि वाच्यं, तत्र तत्र स्वपदस्यापि तत्तद्धर्मावच्छिन्नवाचकत्वं विवक्षणीयमतो न कोऽपि दोषः पदमादधातीति ध्येयम् ।

भेदाप्रतियोगित्वमिति । भेदश्च स्वनिरूपकत्वस्वसामानाधिकरण्योभयसम्बन्धेन प्रतियोगिताविशिष्टान्यत्वेन विशेषणीयः; तेन नोभयभेदादिकमादाय कैवल्याप्रसिद्धिः, उदासीननिष्ठभेदप्रतियोगित्वमादायाऽसिद्धिवारणाय—स्वसजातीयेति ।

यत्त्वञ्च–उद्देश्यविशेषणवाचकैकशब्दात् कैवल्यघटकत्वेन प्रकृतविधेयत्वरूपं प्रतीयते, तथा चाद्यायमेको भुङ्क्ते इत्यादावेतद्देशाधिकरणकभोजनकर्तृनिष्ठभेदाप्रतियोग्ययमद्य भुङ्क्ते इत्याद्याकारकबोधः, शक्यताऽवच्छेदकानुगमश्चोक्तदिशा चिन्तनीयः,

अयं फलमेकं भुङ्क्ते, फलमेकं भुञ्जानस्तिष्ठतीत्यादौ विधेयत्वावच्छेदककोटिप्रविष्टार्थैकपदाच्च यादृशार्थविशेषणताऽऽपन्ने यदवच्छिन्ने स्वार्थान्वयिनो विशेषणत्वं तादृशार्थानुयोगिकान्वय-

---

प्रतीयत इति । तथा च विधेयत्वेन स्वसमभिव्याहृतपदप्रतिपाद्यवन्निष्ठभेदाप्रतियोगिन्युद्देश्यविशेषणवाचकैकशब्दस्य शक्तिरिति, इदमुपलक्षणं, क्वचिच्च स्वसमभिव्याहृतपदप्रतिपाद्यविधेयविशिष्टस्यान्वयिनाऽवच्छेदकरूपेणापि साजात्यं बोध्यं, तेन शूद्रेणाप्यसमभोजनकाल एको ब्राह्मणोऽन्नं भुङ्क्ते इत्यादिप्रयोगोपपत्तिः,

चिन्तनीय इति । परिष्कार्य इत्यर्थः, एवञ्च स्वसमभिव्याहृतपदजन्यप्रतिपत्तीयविधेयत्वेन वक्त्रभिप्रायविषयताऽवच्छेदकत्वानुगतधर्मः स एवोपलक्षणतया शक्यताऽवच्छेदकानुगमकः,

नन्वेवमपि स्वत्वस्यानुगमकघटकत्वेऽननुगमतादवस्थ्यं, तद्घटकत्वे समभिव्याहृतपदजन्यप्रतिपत्तीयविधेयताऽवच्छेदकत्वस्य भोजनकर्तृत्वादावपि सत्त्वादप्रसिद्धिरिति चेद् ?

न—एकपदविशिष्टबोधे प्रवाहस्याकारकसङ्केतस्वीकारात्. वैशिष्ट्यञ्च—स्वजन्यत्वस्वसमभिव्याहृतपदजन्यप्रतिपत्तीयविधेयताऽवच्छेदकत्वेन स्वोच्चारकपुरुषीयेच्छाविषयत्वोपलक्षितधर्मावच्छिन्नवन्निष्ठभेदाप्रतियोगित्वप्रकारताशालित्वोभयसम्बन्धेन, स्वत्वस्य सम्बन्धाघटकतया नाननुगमः तत्तदेकशब्दस्य सम्बन्धाघटकतया समभिव्याहृतविधेयताऽवच्छेदकत्वस्य तत्तद्भोजनकर्तृत्वादावेव सत्त्वान्नाऽप्रसिद्धिः अधिकन्तु सूक्ष्मविवेकेनानुसन्धेयम्, एवमुत्तरत्रापि,

भुङ्क्ते इत्यादिप्रयोगद्वयम् एकपदार्थस्य विधेयताऽवच्छेदककोट्युद्देश्यताऽवच्छेदककोटिप्रविष्टभेदेनानुगम, यादृशार्थेति । एतत्कर्तृकभोजनत्वाद्यवच्छिन्नेऽर्थः, यदवच्छिन्न इति । धर्मितावच्छेदकावच्छिन्न इत्यर्थः, स्वार्थान्वयिन इति । एकपदार्थान्वयिफलादेरित्यर्थः,

अथ यादृशार्थपदेनैतत्कर्तृकभोजनत्व धर्मो न शक्यते यस्मात् तादृशार्थवत्त्वात् भोजनस्य फलं फलेऽधिकरणस्यान्वयोऽवगाहते, न स्वतद्वृत्तित्व फले फलेऽधिकरणावगाहन इति चेद् ?

न एतस्य धात्वर्थमुख्यविशेष्यकान्वयबोधस्यादिशब्दकथन उक्तत्वात्,

प्रतियोगित्वविशिष्टतद्रूपावच्छिन्नान्वयप्रतियोगित्वरूपसाजात्यं प्र
तीयते; अतस्तत्रैतत्कर्त्तृकभोजनादिनिष्ठसंसर्गप्रतियोगिकर्म्मत्वा-
दिनिष्ठसंसर्गप्रतियोगिनिष्ठभेदप्रतियोगित्वं फलादौ प्रतीयते,
एकसमानार्थकमात्रादिपदस्थलेऽप्येतादृशी रीतिरिति कृतं पल्लवितेन।

इति शक्तिवादे विशेषकाण्डः।

अथ वा स्वसमभिव्याहृतप्रथमाऽन्तपदोपस्थाप्यार्थनिष्ठवृत्तिनिरू-
पकत्वविशिष्टधात्वर्थताऽवच्छेदकावच्छिन्नविशेषणताऽऽपन्न इत्यत्र ता-
त्पर्य्याद्,

वस्तुतस्तु–स्वसमभिव्याहृतधात्वर्थान्वितप्रत्ययार्थो यद्धर्म्मावच्छि
न्नेऽन्वेति तद्धर्म्मावच्छिन्नकर्त्तृकतद्धात्वर्थताऽवच्छेदकावच्छिन्ने यदर्थो-
ऽन्वेति; तादृशधात्वर्थताऽवच्छेदकावच्छिन्नानुयोगिकान्वयप्रतियोगि
तद्धर्म्मावच्छिन्नानुयोग्यन्वयप्रतियोगित्वमेव साजात्यं वक्तव्यं, तेन फल-
मेकं भुञ्जानेन स्थीयत इत्यादौ नानुपपत्तिः,

अत्रेदमालोचनीयम्—अयं फलमेकं भुङ्क्ते; एकेन रथेन कुमार्य्यौ-
गच्छन्तीत्याद्यविकशब्दस्य स्वार्थान्वयिताऽवच्छेदकावच्छिन्नप्रतियोगिकभे-
दप्रतियोगित्वम्; अभावश्च खण्डशोऽर्थः, तादृशाकाङ्क्षाज्ञानबलाच्चै
तत्कर्त्तृकभोजनकर्म्मताऽऽपन्नफलनिष्ठभेदप्रतियोगित्वप्रतियोगिकस्वरू-
पसम्बन्धावच्छिन्नप्रतियोगितायद्वकुमारीकर्त्तृकगमनकरणताऽऽपन्नान्य
भेदप्रतियोगित्वप्रतियोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगित्वादिस्व-
रूपेणैकपदार्थस्य फलनिष्ठभेदप्रतियोगित्वस्य तदर्थाभावेऽन्वयोऽप्यु-
पेयते, एवं रीत्या परिष्कारे न दोषलेशोऽपि; न चोक्तधर्मस्य यद्व-
त्तत्पदघटितत्वेनानुगमस्य दुष्करत्वेऽपि क्षतिः;

मात्रादिपदस्थल इति। यथाऽत्रायं मात्रो भुङ्क्ते इत्यादि, आदिनैका-
किकेवलादिपरिग्रहः, अयं फलं मात्रं केवलं वा भुङ्क्ते इत्यादौ तु मा-
त्रपदमवधारणार्थकत्वेन फलान्याकर्म्मकभोजनादिकर्मपरं; तस्य चा-
भेदेन फलादावन्वयः, तथा च फलेतराकर्म्मकभोजनकर्म्माभिन्नफलक-
र्म्मकभोजनानुकूलकृतिमानित्यन्वयबोधः, अत्र मात्रादिपदार्थताऽवच्छे-
दकस्य तादृशकर्म्मत्वस्य पारतन्त्र्येण भोजनादावन्वयोपगमेन यदा
चैत्रो घटं पटञ्च पश्यति मैत्रस्तु तद्घटमेव तदा चैत्रो घटमात्रं पश्य-
तीत्यादौ न प्रयोगः,

अथ वा भुजादिधातोः फलेतराकर्म्मकभोजनाद्यर्थकत्वं विवक्ष्यते,
मात्रादिपदन्तु तदर्थे तात्पर्य्यग्राहकमित्यास्तां विस्तरः।

इति शक्तिवादविवृतौ विशेषकाण्डः।

अथ सविवृतिके शक्तिवादे

परिशिष्टकाण्डः ।

*गवादिशब्दात् संस्थानरूपाकृतेरपि बोधस्यानुभविकतया गोत्वादिजातिवत् साऽपि तद्वाच्ये विशेषणं, तस्याश्च वाच्यविशेषणत्वेऽपि न प्रवृत्तिनिमित्तता; साक्षात् सम्बन्धेन वाच्यवृत्तित्वाभावात्, अवयवसंयोगरूपायास्तस्याः सामानाधिकरण्येनैव गवादौ सत्त्वात्, अत्र शक्त्या जात्याकृत्योरेकतरविनिर्मोकेणाप-

---

विशेष्यविशेषणभावेन जातिव्यक्त्योर्गवादिपदानां शक्तिकल्पनेनातिप्रसङ्गादिरूपदोषविरहादाह-बोधस्यानुभविकेति। तथा चानुभूयमानसंस्थानभानान्यथाऽनुपपत्तेरेव तत्र शक्तिः कल्प्यतेति भावः, साक्षात्सम्बन्धेनेति। यन्निष्ठसंसर्गतायां प्रतियोग्यनुयोगिविषयतानिरूपितत्वं स एव साक्षात्सम्बन्धः, तादृशसम्बन्धस्यैव प्रवृत्तिनिमित्ततालक्षणघटकतया प्रवेशः, संस्थानव्यक्त्योः साक्षात्सम्बन्धाभावं दर्शयितुमाह-सामानाधिकरण्येनेति । समवायिसमवेतत्वघटितसामानाधिकरण्यसम्बन्धेनेत्यर्थः, तत्र सामानाधिकरण्यघटकप्रथमाऽधिकरणतानिष्ठसांसर्गिकविषयतायां संस्थाननिष्ठप्रकारतानिरूपितत्व, गवादिनिष्ठविशेष्यतानिरूपितत्वञ्च वृत्तित्वनिष्ठसांसर्गिकविषयतायामस्तीत्यतो न साक्षादिति भावः,

स्थानाविरहात् लाघवाच्चोभयविशिष्टे गवादिपदस्यैकैव शक्तिः स्वीक्रियते, शक्यविशेषणभेदेऽपि पुष्पवन्तादिपदवद् धेन्वादिपदवच्च शक्त्यैक्यस्य दुरपवादत्वाद्,

एकविशिष्टापरावच्छिन्ने शक्तिरिति तु न सद्; विशेष्यविशेषणभावे विनिगमनाविरहाद् गवार्थांशे साक्षादुभयप्रकारकबोधस्यानुभवसिद्धस्य दुरुपपादत्वाच्च, यत्र केवलाकृतिविशिष्टे गवादिपदतात्पर्यं यथा पिष्टकमय्यो गाव इत्यादौ; तत्र शुद्धगोत्वाद्यवच्छिन्नपरे धेन्वादिपद इव लक्षणैव, जात्याकृतिविशिष्टायां व्यक्तौ शक्तेरैक्यं "जात्याकृतिव्यक्तयस्तु पदार्थ" इति न्यायसूत्रे बहुवचनमुपेक्ष्य पदार्थ इत्येकवचनान्त निर्देशतो महर्षेरप्यनुमतम् ।

नन्वेकतरविनिर्मोकेणापरमात्रविरहस्य परस्परमात्रसामग्रीसहकारित्वोपगमेनापि निर्वाहाद् न तत्रैकशक्तिकल्पनमत आह—लाघवाच्चेति ।

ननु हर्य्यादिपदेषु शक्यविशेषणभेदेन शक्तिभेद एव दृष्ट, अत्र कुत उभयविशिष्ट एका शक्तिरित्यत आह—शक्यविशेषणेति ।

नन्वेतेन विशेषणभेदेऽपि यत्र धर्म्मिभेदस्तत्रैव कथञ्चित् शक्तेरैक्यं भवत्वेतद्धर्म्मिणि [illegible] कुत ? इत्यत आह—धेन्वादिपदवच्चेति । विनिगमनाविरहादिति । शक्तिद्वयापत्तेरिति शेष, केवलाकृतिविशिष्ट इति । विलक्षणावयवसंयोगविशिष्ट इत्यर्थः, गोत्वजातिविरहसूचनाय-पिष्टकमय्य इति । लक्षणैवेति । मृण्मयगवादौ गां प्रोक्षय गामानयेत्यादिव्यवहाराभावेन तत्र मुख्यत्वाभावात्, तथा च पारमर्षं सूत्रं "व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः" जातिरिति पदार्थ इत्यनुषक्तेनान्वितम्, अप्रसङ्गात्=प्रयोगविरहात्,

इत्येकवचनान्तमिति । अयमाशयः—सूत्रस्थपदार्थशब्दोत्तरैकवचनेन विवक्षितैकत्वस्य पदार्थशब्दार्थैकदेशे पदार्थत्वेऽन्वय पदार्थे तद्बाधात्; तथा च जात्याकृतिव्यक्तयः पदशक्यतैकयन्त इत्यर्थः, तत्र व्यक्तय इत्यन्तविशेष्यवाचकशब्दगतबहुवचनस्य विवक्षितबहुत्वसंख्याविशिष्टैकत्व संख्यायाः पदार्थ इति विशेषणपदगतैकवचनेनाविवक्षणात्तत्रैकवचनोपपत्तिरिति तादृशसंख्याया अविवक्षास्थल एव समानवचनकत्वनियमात्, अन्यथैकवचनानुपपत्तिरिति, सूत्रकृत्तु जात्याकृत्योर्विशेषणत्वस्य [illegible] विशेष्यत्वस्य सूचनायेति भाष्यकारादयः ।

मीमांसकास्तु गवादिपदानां जातिरेव वाच्या, न तु व्यक्तिराकृतिर्वा,

व्यक्तिशक्तिमतेऽपि स्वरूपतस्तस्या ग्रहासम्भवेन शक्तिज्ञानप्रकारीभूतायां जातौ शक्तेस्तदवच्छेदकताया वाऽवश्यकल्पनीयतया व्यक्त्यादौ तत्कल्पनायां गौरवात्; प्रयोजनविरहाच्च,

व्यक्तिशक्तिमते च जातेरुपलक्षणत्वासम्भवः प्रागेव दर्शितः, यथा व्यक्तिशक्तिमते जात्यंशे शक्तिस्तदवच्छेदकता वा तद्विशेषणानवच्छिन्नैव तथा जातिशक्तिमतेऽपि सा तथैवेति न गोत्वत्वादिप्रवेशाद् गौरवशङ्काऽपि,

न हि जातिशक्तिमतेऽपि शाब्दबोधे सा किञ्चिद्धर्मप्रकारेण भासते; येन प्रकारलाभार्थं प्रकारविशेषमन्तर्भाव्य शक्तिः कल्पनीया, अपि तु स्वरूपत एव,

अथानुमानादिना गोत्वादौ शक्तिग्रहो भवन् धर्मितावच्छेदकज्ञानस्यानुमानादिनाऽजननाच्छाब्दज्ञानस्य विपरीतज्ञानाविरो-

---

मीमांसकमतविशेषमुपन्यस्यति—मीमांसकास्त्विति । वाच्येति । शक्येत्यर्थः, स्वरूपतः=किञ्चिद्धर्मप्रकारेण, तस्या इति । व्यक्तेरित्यर्थः, व्यक्त्यादाविति । व्यक्तौ तत्कल्पने च न्यायमते शक्तेराधिक्येन गौरवमिति भावः,

सप्रयोजनगौरवस्यादोषत्वादाह—प्रयोजनेति ।

ननु जातिशक्तिमत इव व्यक्तिशक्तिमतेऽपि गोत्वादिजातयः शक्तेः तज्ज्ञाने चोपलक्षणतया भासमानाः शाब्दबोधे भासन्त इति न तत्र शक्यत्वं, न वा तदेकत्वं कुतो गौरवमित्यत आह—जातेरुपलक्षणेति । दर्शित इति । घटादिपदानां घटत्वाद्युपलक्षिते शक्तत्वे द्रव्यत्वाद्युपलक्षितेऽपि शक्तत्वेन घटादिपदेभ्यो द्रव्यत्वाद्यवच्छिन्नस्याप्यन्वयबोधापत्त्यादि दूषणमिति, सा=शक्तिः, तथैवेति । निरवच्छिन्नैवेत्यर्थः, अनुपदर्शितेति । अनुमानञ्च गोत्वादिः शाब्दबोधे कादाचित्कमानत्वोपलक्षितविषयतोपदर्शितसम्बन्धवद्, गोत्वत्वात्, यन्नैवं तन्नैवमित्यादिरूपम्, आदिना मनःप्रत्यक्षादिपरिग्रहः,

अनुमानशब्दाभ्यां निर्धर्मितावच्छेदकज्ञानाजननेऽपि गत्यन्तरं कथञ्चित् सम्भवमाह—अथानुमानेति । विपरीतज्ञानाविरोधितया तद्वि-

धितयाऽनुपयुक्तत्वाच,

एवञ्च तादृशधर्म्मस्य शक्यताऽवच्छेदकत्वं दुर्व्वारमेव, शक्तिग्राहकमानेन धर्म्मिताऽवच्छेदकांशे तदवच्छेदकताग्रहे बाधकाभावाद्,

यदि चावच्छेदकताग्रहेऽपि शक्तिविषयस्तदंशे भ्रमस्तु कल्प्यते विषयबाधेनावच्छेदकत्वमेव शक्तिग्राहकमानेन न गृह्यत इत्येव वा स्वीक्रियते, तदा प्रतियोगित्वकारणत्वादीनामपि तुल्ययुक्त्याऽवच्छेदकत्वविलयप्रसङ्गः, तत्राप्येवं सुवचत्वात्,

प्रतियोगित्वादिबुद्धेरवच्छेदकत्वावगाहित्वमनुभवसिद्धं यदि; तदा शक्तिधियस्तदवगाहिता न तथेति वचसि को वा श्रद्दधाति ? विशेषाभावाद्, मा भूद् वा गोत्वत्वादिकमवच्छेदकं शक्तेस्तथाऽपि शक्तिज्ञानकारणताया गुरुशरीरगोत्वत्वादेर्धर्म्मिताऽवच्छेदकताऽऽत्मकविषयतानिवेशाद् गौरवं दुर्व्वारमेव,

---

ग्रहज्ञानाप्रतिबन्धकतयाऽनुपयुक्तत्वाद् निर्धर्म्मिताऽवच्छेदकज्ञानस्य कारणत्वे गोत्वं गोपदशक्यत्वाभाववदित्यादिनिश्चयकालेऽपि गोपदशक्यत्ववदित्यादिज्ञानोदयेन शाब्दबोधापत्तिरिति भावः,

एवञ्चेति । गोत्वत्वादिना गोत्वादेः शक्तिज्ञानावच्छेदकत्वे चेत्यर्थः, शक्तिग्राहकमानेनेति । शक्तिविषयकज्ञानेनेत्यर्थः, तदवच्छेदकताग्रहे=शक्त्यवच्छेदकताभाने, अथ वा शक्तिग्राहकमानेनेत्यनन्तरं शक्तिग्रह इति पूरणीयम्, अत्र तृतीयाऽर्थो जन्यत्वं, तस्य च शक्तिग्रह इत्यत्रान्वयः, एतेन तृतीयाया अनुपपत्तिरित्यपि निरस्तं, बाधकाभावादिति । विषयबाधादिनिश्चायकाभावादित्यर्थः, यद्धर्म्मं धर्म्मिताऽवच्छेदकीकृत्य यदवगाहते ऽसति बाधके तत्र तदवच्छेदकत्वमपीति नियमाद्,

अथ वा यद्धर्म्मावच्छिन्नं यदवगाहयति यत् तत् तत्राऽसति बाधके तदवच्छेदकत्वं ग्राहयति, अधिकरणताग्राहकमानवदिति नियमादिति भावः । अवच्छेदकताग्रहेऽपीति । अवच्छेदकताभानेऽपीत्यर्थः । भ्रम इति । गुरुभिन्नमीमांसकमते भ्रमस्वानङ्गीकारात्, तन्मतेऽप्याह—विषयबाधेनेति । अवच्छेदकताया शक्तिनिरूपितत्वबाधेनेत्यर्थः । तदवगाहितेति । अवच्छेदकत्वावगाहितेत्यर्थः, न तथा=अनुभवसिद्धा, श्रद्दधातीति । प्रामाण्यं स्वीकरोतीत्यर्थः, तुष्यतु दुर्जनन्यायेनाह—मा भूदिति । निवेशादिति । कारणीभूते गौ र्गोपदशक्येति ज्ञाने गोत्वत्वस्य धर्म्मिताऽवच्छेद

व्यक्तिशक्तिवादिनान्तु-स्वरूपतो गोत्वादिनिष्ठधर्म्मिताऽवच्छेदकत्वस्यैव निवेशादिति चेद् ?

न-पदविशेषणताऽऽपन्नशक्तौ निरूपितत्वसम्बन्धेन शक्तिसम्बन्धेन पदे वा स्वरूपतो गोत्वादिप्रकारिकाया एव शक्तिधियः स्वीकारात्, न हि समवायेनैव जातेः स्वरूपत प्रकारतेति नियमः प्रामाणिकः, घटं जानामीत्यादौ प्रकारितासम्बन्धेन स्वरूपतो घटत्वादीनां ज्ञानाद्यंशे प्रकारत्वोपगमात्, समवायेन धर्म्मिविशेषणताऽऽपन्नस्यैव सम्बन्धान्तरेणाप्यत्र स्वरूपतो भानमित्यपि न नियमः, प्रामाण्यस्य परतो ग्राह्यतामतेऽयं घट इत्याकारकस्य स्वरूपतो घटत्वादिज्ञानस्यानुव्यवसाये प्रकारितायां तत्सम्बन्धेन ज्ञाने

कत्वेन प्रवेशादिति भावः, गोत्वांशेति । गोत्वापेक्षया गवेतरावृत्तित्वादिघटितस्य गोत्वत्वस्य गुरुशरीरत्वादिति,

पदविशेषणताऽऽपन्नेति । गोपदं गोत्वे शक्तमित्याद्याकारिका निरूपितत्वसम्बन्धावच्छिन्नगोत्वनिष्ठप्रकारताकशक्तिनिष्ठप्रकारताकपदनिष्ठविशेष्यताका शक्तिधीरित्यर्थः । पदे वेति । पदविशेष्यकशक्तिसम्बन्धावच्छिन्नगोत्वप्रकारिका पदं गौरित्याद्याकारिकेत्यर्थः । स्वीकारादिति । तथा च तादृशज्ञानस्यैव शाब्दबोधजनकतया तदवच्छेदककोटौ गोत्वाद्यप्रवेशेन लाघवमेवेति भावः,

ननु स्वरूपतो जातिनिष्ठप्रकारतायाः समवायातिरिक्तसम्बन्धावच्छिन्नत्वानियमेऽपि कुतस्तादृशज्ञानस्वीकारसम्भव ? इत्यत आह—न हीति । तादृशनियमे व्यभिचारं दर्शयति-घटं जानामीत्यादि, प्रकारितासम्बन्धावच्छिन्नघटत्वनिष्ठप्रकारतानिरूपितज्ञाननिष्ठविशेष्यतावच्छिन्नप्रकारतानिरूपितात्मनिष्ठविशेष्यताकप्रत्यक्षमित्यर्थः, प्रकारत्वोपगमादिति । अन्यथा द्रव्यत्वादिमात्रेण घटविषयकज्ञानमादाय घटं जानामीत्यनुव्यवसायापत्तेरिति भावः,

प्रामाण्यस्य स्वतो ग्राह्यमतेऽयं घट इत्याकारकज्ञानस्यैव प्रामाण्यग्राहकतया तद्घटं हि: प्रामाण्यसंशयानङ्गीकारेणानुव्यवसाये घटत्वादिविशिष्टघटादिरेव भासते, तदाकारोऽपि घटं जानामीत्यादि, अत-समवायेन धर्मिविशेषणताऽऽपन्नघटत्वादेः प्रकारितया भानं सम्भवत्येव, परत इति । संशयादिप्रयुक्तानन्तरपरतोऽनुमानाश्रित इत्यर्थः,

वा धर्म्मिविशेषणताऽनापन्नस्य घटत्वादेर्भानात्,

अस्तु वा प्रकृतेऽपि गवादिविशेषणताऽऽपन्नस्यैव गोत्वादेः शक्तौ निरूपितत्वसम्बन्धेन; पदे वा शक्तिसम्बन्धेन स्वरूपतः प्रकारता, गवादेश्च शक्तौ पदे वा स्वसमवेतनिरूपितत्वस्वसमवेतवाचकत्वरूपपरम्परासम्बन्धेन प्रकारता; तादृशी च गवादिविषयता न शाब्दबोधजनकताऽवच्छेदिकेति परम्परासम्बन्धेन प्रकारताया जनकताऽवच्छेदकत्वापेक्षया साक्षात्सम्बन्धावच्छिन्नप्रकारतायास्तथात्वे लाघवेन व्यक्तिशक्तिसिद्धेर्नावकाशः,

अथ जातिशक्तिमतेऽपि शाब्दबोधे व्यक्तिभानमावश्यकं गौर्नष्टा, गौर्जाता, गामानयेत्यादौ समभिव्याहृतपदार्थान्वयस्य जातौ बाधात् परम्परासम्बन्धेन तदन्वयोपगमेऽप्यन्वयिताऽवच्छेदकतया गोत्वत्वादिभानापत्तेः, शक्तौ गोत्वत्वाद्यन्तर्भावापत्तेश्च, न हि स्वरूपेण पदार्थस्य पदार्थान्तरान्वयान्वयितया भानं कैश्चित् स्वीक्रि

एतन्मतेऽयं घट इत्यादिज्ञानस्यानुव्यवसाये प्रकारितया निरूपितत्वसम्बन्धेन प्रकारितासम्बन्धेन वा ज्ञाने घटत्वादेर्भानमावश्यकं न तु घटत्वविशिष्टघटादेः, अन्यथा तदुत्तरम् इदं ज्ञानं घटे घटत्वप्रकारकं घटत्वाभाववति घटत्वप्रकारकं न वेति संशयानुपपत्तेरिति भावः,

नन्वेतावताऽपि प्रामाण्यस्य स्वतो ग्राह्यत्वमते धर्म्मिविशेषणताऽऽपन्नस्यैवेत्यादिनियमे व्यभिचाराभावेन कुतस्तादृशशक्तिधीस्वीकारसम्भव ? इत्यत आह—अस्तु वेति । अस्य च प्रकारताद्वयेनान्वयः, गवादेरिति । अस्य च तादृशप्रकारता तु पारतन्त्रीया, गवादेश्चेति । अस्य च तादृशप्रकारता स्वातन्त्रीया, तथा च शक्तिज्ञानन्तु स्वसमवेतनिरूपितत्वसम्बन्धेन गोमच्छक्तिमत्पदमित्याकारकं, स्वसमवेतनिरूपितशक्तिसम्बन्धेन गोमत्पदमित्याकारकं वेति । समभिव्याहृतपदार्थेति । नाशप्रतियोगित्वाद्यन्वयस्येत्यर्थः, गोत्वत्वादिभानापत्तेरिति । तादृशवाक्यात् शाब्दान्वयाऽनुपपत्त्या गोत्वत्वादिभानस्वीकारापत्तेरित्यर्थः, शक्ताविति । गोत्वस्य शक्यतावच्छेदकत्वे शक्तिज्ञानेन तद्रूपेण तदनुपस्थितौ तद्रूपेण शाब्दबोधानुपपत्तेः, प्रकारान्तरेण गोत्वत्वाद्युपस्थितेः शाब्दबोधहेतुत्वे जातित्वादिना गोत्वस्योपस्थितिकालेऽपि तादृशवाक्यात् जातिर्नष्टेत्यादिशाब्दबोधापत्तेरिति भावः,

यते, स्वीकुरु वा प्रकारतया स्वरूपेणोपस्थितजातेर्भानं; विशेष्यतया तज्ज्ञानन्तु न सम्भवत्येव, निर्धर्मितावच्छेदककस्य शाब्दबोधस्य प्रवृत्त्याद्यनुपयोगितया तत्स्वीकारासम्भवाद्,

एवञ्च जातिमात्रवाचकत्वेनाभ्युपगतपदस्यापि व्यक्तिबोधजनकतायामविवादाद् व्यक्तिशक्तिर्ध्रुवैव शक्तिभ्रमाजन्यलक्षणाग्रहाजन्यतद्बोधकजनकताया एव तच्छक्तिसाधकत्वाद्; अन्यथा जातावपि शक्त्यसिद्धिप्रसङ्गाद्,

एवं शक्तेरीश्वरसङ्केतरूपत्वे व्यक्तिबोधकतायाः पदेऽनाधितत्वेनेश्वरेच्छाविषयतया तस्या अपि शक्यत्वं दुरपह्नवं, न हि मीमांसकैर्भगवान्नानुमन्यत इत्येतावतैव तादृशशक्त्यनवकाशस्तत्साधकबहुतरमानसत्त्वेन तदुपन्यासस्यापि निरुक्तेरत्रापाताद्,

एवं ज्ञाने पदानां शक्तिरित्येतादृशमतेऽपि व्यक्तिज्ञानजननसमर्थपदस्य जाताविव व्यक्तावपि वाच्यत्वं दुरपह्नवमेव, शक्तिनिरूपकज्ञानविषयत्वरूपस्य तस्याप्यविशेषेण जातिव्यक्त्योः सत्त्वादिति चेद् ?

ननु स्वरूपतः पदार्थस्य प्रकारतया पदार्थान्तरान्वये न किञ्चिद्बाधकं तादृशज्ञानस्य विपरीतज्ञानविरोधित्वात् प्रवर्तकत्वाच्चेत्यत आह– स्वीकुरु वेति । ध्रुवैवेति । अस्याऽवश्यंभावेत्यर्थः, शक्तिसाधकत्वादिति । यत्पदं शक्तिभ्रमं लक्षणाग्रहञ्च विनैतत्पदानुपस्थाप्यपदार्थान्वयबोधजनकं तत् तदर्थशक्तमिति व्याप्तेः, अन्यथा=तादृशव्याप्त्यनभ्युपगमे । शक्त्यसिद्धेरिति । साधकान्तराभावादित्यर्थः । ईश्वरेच्छाविषयतयेति । तत्तत्पदजन्यबोधविषयार्थेनेश्वरेच्छाविषयत्वेनेत्यर्थः, तस्या अपि=व्यक्तेरपि । दुरपह्नवमिति । वारयितुमशक्यमित्यर्थः । तत्साधकबहुतरेति । क्षितिः सकर्तृका कार्यत्वादित्याद्यनुमानं, "द्यावाभूमी जनयन् देव एक आस्ते विश्वस्य कर्ता भुवनस्य गोप्ता" इत्यादिश्रुतिश्च, ईश्वरसाधकप्रमाणमिति भावः, तदुपन्यासस्यापि=ईश्वरानङ्गीकारेण तादृशशक्त्यनवकाशोद्भावनस्यापीत्यर्थः, शक्तिनिरूपकज्ञानेति । शक्तिनिरूपकताविशिष्टज्ञानविषयेत्यर्थः, तथा च शक्तिनिरूपकविषयत्वेति लाभः, तेन स्वात्मादौ नातिव्याप्तिः, जन्य इव प्रयोज्येऽपि निरूपकत्वस्वीकारादिति भावः ।

न-व्यक्तिशक्तावस्माकं न वैमत्यम्; अपि तु व्यक्तिशक्तिज्ञा-
नत्वेन हेतुतायामेव, अत एव व्यक्त्यंशे कुब्जा शक्तिरिति गीयते,
तदंशे तज्ज्ञानानपेक्षणात्, अत एव व्यक्तेर्न वाच्यता, न हि श-
क्तिधीविषयतामात्रेण वाच्यता, तादृशविषयताया अन्वयसाधार
ण्यात्; अपि तु यद्विषयकत्वेन शक्तिज्ञानस्य तद्विषयकशाब्दधीजन-
कत्वं तत्त्वमेव वाच्यताव्यवहारनियामकम्, अन्वयांशे कुब्ज-
शक्तिसत्त्वेऽपि यथा तद्विषयकत्वं शक्तिज्ञानजनकतायां नावच्छे
दकं; तथा व्यक्त्यंशे तत्सत्त्वेऽपि तद्विषयकत्वस्य शक्तिज्ञानजन-

---

कुब्जशक्तिवादिमतं दूषयितुं सिद्धान्तच्छलेनाह—व्यक्तीति। तथा
च गामानयेत्यादौ सामानाधिकरण्यसम्बन्धेन कर्मत्वादौ गोत्वादेरन्वय
व्याहतमित्यर्थः। वैमत्यमिति। अनभिप्रायमित्यर्थः, व्यक्तिशक्तिज्ञानत्वेन हेतु-
तायामिति। अस्य वैमत्यमित्यनेनान्वयः। कुब्जेति। वाच्यत्वव्यवहारा-
जनिकेत्यर्थः, तदंश इति। व्यक्त्यंश इत्यर्थः, तज्ज्ञानानपेक्षणादिति। शक्ति-
ज्ञानानपेक्षणात्, तथा च पदं गोत्वज्ञानशक्तमित्याकारकज्ञानमेव हेतु-
रिति भावः, अत एवेति। जनकताऽवच्छेदककोटौ व्यक्तित्वाप्रवेशादित्य-
र्थः, शक्तिधीविषयतेति। शक्तिनिरूपकज्ञाननियतविषयतामात्रेणेत्यर्थः,
अन्वयसाधारण्यात्=सम्बन्धसाधारण्यात्, शाब्दबोधे जातिव्यक्ती
इव पदार्थसम्बन्धोऽपि नियमतो भासते, अतस्तस्यापि वाच्यत्वाप-
त्तिरिति भावः, यद्विषयकत्वेनेति। अत्र तृतीयाऽर्थोऽवच्छेद्यत्वं, तस्य च
शाब्दधीजनकत्वेऽन्वयः, तथा यद्विषयकशाब्दधीजनकत्वं यन्निष्ठाव-
च्छेदकताकविषयितानिष्ठावच्छेदकताकमित्यर्थः,

एतन्मते गोत्वज्ञानशक्तिमत्पदविशिष्टज्ञानस्यैव कारणात्, तत्र-
ज्ञाने गोत्वस्य विषयतया शक्तौ तादृशज्ञानस्य निरूपितत्वसम्बन्धेन
विशेषणत्वं, तथा च गोत्वनिष्ठविषयतानिष्ठावच्छेदकताकज्ञाननिष्ठवि-
षयतानिष्ठावच्छेदकताकशक्तिनिष्ठविषयतानिष्ठावच्छेदकताकपदनिष्ठ
विषयतानिष्ठावच्छेदकताक जनकत्वमिति,

एतच्चान्तरा भासमानप्रकारताविशेष्यतयोरभेदमते, वाच्यत्वव्य-
वहारनियामकं=वाच्यपदेन तत्प्रतिपादनप्रवृत्तिनियामकं, जनकतावत्त्व
मेव व्यवहारनियामकमिति तु पर्यवसितार्थः, तद्वत्त्वञ्च—स्वनिरूपि-
तशाब्दधीवच्छिन्नावच्छेदकतानिरूपितविषयतानिष्ठावच्छेदकताकत्व-

कतायामनवच्छेदकत्वाच्च व्यक्तौ तद्व्यवहारः, तद्विषयकत्वस्य शाब्दधीविशेषणत्वाद् गवादिपदशक्तिज्ञानस्य गोत्वादिज्ञानविषयकत्वेन गोत्वादिशाब्दधीहेतुत्वेऽपि न गवादिपदस्य गोत्वादिज्ञानवाचकत्वापत्तिः,

वस्तुतो यद्विषयकत्वविशिष्टज्ञानविषयकत्वेन शक्तिज्ञानस्य शा-

च्छेदकतावच्छेदकत्वनिरूपितजनकतानिरूपितविषयित्वनिष्ठावच्छेदकतावत्त्वोभयसम्बन्धेन, व्यवहारप्रयोजकधर्मशरीरनिविष्टतद्विषयकत्वेत्यस्य फलमाह—तद्विषयकत्वस्येति । गोत्वादिज्ञानवाचकत्वापत्तिरिति ।

ननु गोत्वविषयकशाब्दबोधस्य मितिमात्रविषयकतया समूहालम्बनात्मकतया वा गोत्वज्ञानविषयकत्वसत्त्वेन यद्विषयकत्वनिवेशेऽपि कुतो गोत्वज्ञानवाचकत्वापत्तिवारणम् ?

न च ज्ञानस्य त्रितयविषयकत्वस्वीकाराद् मुख्यविशेष्यताद्वयशून्यत्वनिवेशाच्च न तथाऽऽपत्तिरिति वाच्यम् ?

गौर्गोत्वज्ञानवत्पुरुषेणानीयत इति शाब्दधीमादाय तद्दोषतादवस्थ्यात्,

न च यद्विषयकशाब्दधीजनकत्वमित्यत्र यद्विषयकत्वावच्छिन्नशाब्दधीनिष्ठजन्यताकजनकत्वमिति निवेश्य वारणीयमिति वाच्यम् ?

तथा सति यद्विषयकत्वावच्छिन्न शाब्दधीनिष्ठजन्यत्वं तत्त्वमेव वाच्यत्वमिति निवेशेनैव दोषाभावात् शेषवैयर्थ्यापत्तेरिति चेत् ?

न—शाब्दबोधे मुख्यविशेष्यताद्वयशून्यत्वस्य निवेशाद् यद्विशिष्टविषयतायाश्च मुख्यविशेष्यतावदवच्छेदकतान्यतरात्मकत्वस्य च निवेशात्,

तद्विषयकत्वमनिवेश्य लघुनिवेशेन वारयति—वस्तुत इति । यद्विषयकत्वविशिष्टेति । विषयतया यद्विशिष्टज्ञानविषयकत्वेनेत्यर्थः,

अथ वा यद्विषयकत्वविशिष्टं यज्ज्ञानविषयकत्वं तेनेत्यर्थः, तथा च यन्निष्ठावच्छेदकताकविषयित्वनिष्ठावच्छेदकताकज्ञानत्वावच्छिन्नविषयित्वनिष्ठावच्छेदकताकं शाब्दधीजनकत्वं तत्त्वमेव वाच्यताव्यवहारनियामकमित्यर्थः,

ननु गोत्वविषयकशाब्दत्वावच्छिन्नं प्रति गोत्वज्ञानजनकशक्तिज्ञानत्वेन कारणत्वे कारणतावग्रहात् पूर्वं शक्तौ तादृशकारणत्वग्रहो दुर्घटः, तद्घटितकारणताऽवच्छेदकाग्रहे कारणताग्रहोऽपि दुर्घट इत्यन्योन्याश्रय इत्यतो लाघवाच्चाह—

ब्दधीजनकता; यद्विषयकत्वेन वा शाब्दधियः शक्तिज्ञानजन्यता तत्त्वमेव तथा,

एतेन ज्ञानत्वज्ञानस्यापि ज्ञानपदवाच्यताऽऽपत्तिः, शक्यज्ञान विषयत्वेनैव ज्ञानपदशक्तिज्ञानस्य ज्ञानत्वेन ज्ञानत्वज्ञानविषयकशाब्दधीजनकत्वादिति पराऽस्तम्,

कारणत्वस्य कार्यत्वस्यावच्छेदकगर्भे गोत्वादिविषयकत्वस्य निवेशाद् गोत्वादेर्वाच्यतोपपत्तिः, एवञ्च गौर्गोपदशक्येत्याकारिकाऽपि शाब्दबोधोपयोगिशक्तिधीः सम्भवति व्यक्त्यंशे शक्तेरबाधेनान्यथाख्यातित्वापत्तिविरहात्, तादृशज्ञानस्य शाब्दधीहेतुत्वेऽपि गोत्वधर्मिताऽवच्छेदककशक्तिज्ञानत्वेन व्यक्तिविषयतामनन्तर्भाव्यैव गोत्वप्रकारकशाब्दबुद्धौ तस्य तथात्वाद् उक्तरीत्या व्यक्तेरवाच्यतोपपत्तेः,

न चैवं व्यक्त्यंशे शक्तिज्ञानस्यापेक्षिततया तदंशे शक्तेः कुब्ज-

---

यद्विषयकत्वेनेति । यत्पर्याप्तावच्छेदकताकविषयत्वनिष्ठावच्छेदकताकशाब्दत्वावच्छिन्न शक्तिज्ञानत्वावच्छिन्नजनकतानिरूपितजन्यत्वमित्यर्थं, तेन जातित्वादिना गोत्वादेन गवादिपदवाच्यता, तथेति । वाच्यत्वव्यवहारनियामकमित्यर्थं, तथा च शक्तिज्ञानत्वावच्छिन्नजनकताकशाब्दत्वावच्छिन्नजन्यतानिरूपितविषयत्वनिष्ठावच्छेदकताकावच्छेदकतापर्याप्त्यधिकरणत्वं वाच्यताव्यवहारनियामकमिति तु पर्यवसितार्थं, एतेनेति । शाब्दधीजनकताया यद्विषयकत्वविशिष्टज्ञानविषयकत्वावच्छिन्नत्वनिवेशेन शाब्दधीनिष्ठशक्तिज्ञानजन्यतायाञ्च यद्विषयकत्वावच्छिन्नत्वनिवेशने चेत्यर्थः, अस्य च पराऽस्तमित्यनेनान्वय, ज्ञानत्वेनेति । ज्ञानविषयकशाब्दत्वावच्छिन्नं प्रति ज्ञानपदशक्तिज्ञानत्वेन कारणतया ज्ञानत्वज्ञानस्य च सामान्यतो ज्ञानविषयकत्वेन तद्विषयकत्वेन तद्विषयकशाब्दधीजनकत्वमित्यत्र तत्पदेन ज्ञानत्वज्ञानस्यापि धर्तुं शक्यत्वादिति भाव,

एवञ्च=व्यक्त्यंशे कुब्जशाक्त्याकारे, व्यक्तिविषयतामनन्तर्भाव्येति ।

न च गोत्वधर्मिताऽवच्छेदककशक्तिज्ञानत्वेन हेतुत्वं धर्मितारूपगवादिविषयताया अपि तदवच्छेदकत्वेन पुरस्तस्य तदनन्तर्भाव

स्यानुपपत्तिरिति वाच्यम् ?

कार्यकारणभावावच्छेदककोटौ व्यक्त्यनन्तर्भावस्यैव तदंशे कुब्जताव्यवहारनिर्वाहकत्वात् अत एव सामान्यलक्षणापूर्वपक्षे मणिकृतां समानप्रकारकत्वेन शक्तिज्ञानशाब्दबोधयोर्हेतुहेतुमद्भावाभिधानमपि न विरुध्यते,

न च शक्यांशे गोत्वादिप्रकारकज्ञानस्य गवांशे गोत्वप्रकारकशाब्दबोधहेतुत्वेऽपि कार्यकारणयोः समानप्रकारकत्वस्याक्षतत्वात्तस्यानुभवविरोध इति वाच्यम् ?

शक्यांशे गोत्वादिप्रकारतामादाय समानप्रकारकत्वस्याभिप्रेतत्वे "ऽपूर्वं यक्ष्यत" इत्यस्यासङ्गत्यापत्तेः,

अपूर्ववादे समानप्रकारकात् लिङ्पदस्य कार्यत्वेन घटादिरूपकार्ये शक्तिज्ञानात् कार्यत्वेनापूर्वविषयकशाब्दबोध इत्येवाभिधानात् शक्यांशे शाब्दधीप्रकारकज्ञानस्य हेतुतायास्तत्रानुक्तेः,

न चैवं जात्यंशे सा ज्ञाता; व्यक्त्यंशे च स्वरूपसती हेतुर्लाघवादिति कुब्जशक्तिवाद इत्यादिचिन्तामणिग्रन्थविरोध इति वाच्यम् ?

मतभेदेनोभयसङ्गतेः,

वस्तुतस्तु—जातिधर्म्मिताऽवच्छेदककशक्तिज्ञानस्य हेतुत्वे व्यक्तेर्विषयताऽपि कारणताऽवच्छेदककोटौ निविशते, विशेष्यताऽवच्छेदकत्वेनैव धर्म्मिताऽवच्छेदकीयाविषयताविशेषस्य विशेषणीयत्वात्, अवच्छेदकतानिरूपकविशेष्यताया व्यक्तिविषयतारूपत्वात्,

एवञ्च व्यक्तेरवाच्यताव्यवहारस्य कथञ्चिदुपपादनेऽपि शक्तिवाच्यम् ?

एतस्य स्वयमेवाग्रे वक्ष्यमाणत्वात्, अत एवेति । व्यक्त्यंशेऽपि शक्तिज्ञानस्य कारणत्वादित्यर्थः, शक्यांश इति । निरूपितत्वसम्बन्धेनेति शेषः, विषयतासम्बन्धेन शक्तिविशेषणज्ञानांशे चेत्यर्थः, तथा च गोपदं गोत्ववाचकमित्याकारकज्ञानस्यैव हेतुतया तत्सम्बन्धमानेऽपि न तद्भ्रमविरोधः,

मतभेदेनेति । कुब्जशक्तिवादिनां मतभेदेनेत्यर्थः, एवमिति । अवच्छे-

क्यंशे जातिप्रकारकज्ञानहेतुतामतापेक्षया गौरवं दुर्व्वारमेव, कारणताऽवच्छेदकेऽधिकविषयतानिवेशाद्,

एवं द्रव्यत्वादिधर्मिताऽवच्छेदककप्रमाऽऽत्मकगवादिपदप्रकारकशक्तिज्ञानाद् द्रव्यत्वादिप्रकारकशाब्दबोधवारणाय शक्यंशे धर्मिताऽवच्छेदकावच्छिन्नत्वावगाहित्वस्याप्यधिकस्य निवेशनीयतया गौरवमिति व्यक्तौ कुब्जशक्तिवादिनामपि शक्यंशे जातिप्रकारकज्ञानहेतुतामतमेव साधीयः,

वस्तुतस्तु—सर्व्वलाक्षणिकस्थलेऽप्यन्वयबोधस्यानुभाविकत्वेन दुरपह्नवतया लाक्षणिकस्याप्यनुभावकत्वं दुर्व्वारमेवेति तस्य लक्ष्यार्थे कुब्जिकाशक्तिप्रसङ्ग इति नानुभवजननसामार्थ्यमीश्वरसङ्केतो वा वृत्तिरूपा शक्तिरपि तु पदार्थान्तरमेव,

सा च जातावेव कल्प्यते न तु व्यक्त्यादाविति न तत्र कुब्जशक्तिरपीति तत्त्वम् ,

अथ व्यक्तेर्गवादिपदवाच्यत्वे गवादिपदाद्व्यक्तेः स्मरणमनुभवश्च न स्याद्;

न च पदावाच्यस्याप्यन्वयस्येव व्यक्तेर्भानं शाब्दबोधे नानुपपन्नमिति वाच्यम् ?

तद्धर्म्मप्रकारकशाब्दबोधे तद्धर्म्मप्रकारकपदार्थोपस्थितेर्हेतुतया गोत्वप्रकारकशाब्दबुद्धौ गोत्वादिप्रकारकस्मरणस्यापेक्षणीयतया सम्बन्धग्रहाविषयतया व्यक्तेरस्मरणे व्यक्तेः शाब्दानुभवाविषयताया दुरुपपादत्वाद् अन्वयस्य च संसर्गविधयैव भानात् , शाब्दधियो-

दकत्वांशे विशेषणतया धर्मिताऽऽत्मकव्यक्तिविषयताया अवच्छेदकत्वे चेत्यर्थः, कथञ्चिदुपपादनेऽपि यद्विशेषितविषयतायाः शाब्दधिय. शक्तिधीजन्यत्वं, शक्तिधियः शाब्दधीजनकत्वं वा तत्त्वं शक्यत्वव्यवहारप्रयोजकमिति प्रकारेणेत्यर्थ., अनुभवजननसामर्थ्यमिति। यथा वह्नौ दाहानुकूलसामर्थ्यरूपा शक्तिस्तद्वद् पदनिष्ठानुभवजनिकाऽतिरिक्ता मीमांसकविशेषाभिमतेत्यर्थ , ईश्वरसङ्केतइति । नैयायिकाभिप्रेतेश्वरेच्छारूप',

ऽन्वयांशे निष्प्रकारकतया तदुपस्थित्यनपेक्षणेन वाच्यत्वानुपयोगादिति चेद् ?

अत्र भट्टाः–पदान्न व्यक्तेः स्मरणमनुभवो वा किन्त्वाक्षेपादेव व्यक्तिधीः, आक्षेपिका च जातिरेव, आक्षेपश्चानुमानमर्थापत्तिर्वा,

न च जातिव्यक्त्योर्वैयधिकरण्यादाक्षेपासम्भवः, तादात्म्यसम्बन्धेन जातेराधेयतासम्बन्धेन व्यक्त्याक्षेपकतायामविरोधाद्,

वस्तुतस्तु–गामानयेत्यादौ स्वाश्रयवृत्तित्वादिरूपपरम्परासम्बन्धेनानयनकर्मत्वादौ गोत्वादिजातेरन्वयः शाब्दस्तेन सम्बन्धेन गोत्वादिमत्त्वस्य चाधेयतासम्बन्धेन गवादिसत्त्वविरहेऽनुपपद्यमानत्वाचानयनकर्म्मत्वादावाधेयतासम्बन्धेन गवादिव्यक्तिप्रकारिका धीः, आक्षेपात् पूर्व्वंसंसर्गघटकतया शाब्दबोधे व्यक्तिभानेऽपि

भट्टमतमुपन्यस्यति—अत्र भट्टा इति । आक्षेपादेव व्यक्तिधीरिति । आक्षिप्तैव व्यक्तिः शाब्दबोधे भासत इति भावः, आक्षेपिका, आक्षेपप्रयोजिका । अर्थापत्तिरिति । सा चानुपपद्यमानत्वज्ञानं, तच्च तत्र तदभावप्रयोज्यसत्त्वभाववत्त्वम्, अभावप्रतियोगिसत्त्वप्रकारकज्ञानं तत्र तद्व्यञ्जकम्, एतच्च तन्मते प्रमाणान्तरं यथा पीनो देवदत्तो दिवा न भुङ्क्त इत्यादौ दिवाऽधिकरणकभोजनकर्त्तृत्वाभाववान् पीनो देवदत्त इति प्रथमं शाब्दबोधः, पश्चाद् दिवाभोजनाभाववतो देवदत्तस्य रात्रिभोजनं विना पीनत्वमनुपपन्नमित्यर्थापत्तितो रात्रिभोजनवान् पीनो देवदत्त इत्यर्थापत्तिरिति तु भट्टानुयायिनः,

केचित्तु–तादृशशाब्दबोधानन्तरं तादृशदेवदत्तो दिवाभोजनकर्त्तृत्वौपादानिको बोधो जायते, शाब्दसामग्रीसहकारेणानुपपत्तिज्ञानाज्जन्यते यज्ज्ञानं स एव औपादानिक इति वदन्ति,

तादात्म्यसम्बन्धेनेति । तथा च गोत्वं गवाश्रितं व्यक्त्याश्रितं वा गोत्वाद् जातेर्या यन्नैवं तन्नैवमित्यनुमान, व्यक्त्याश्रितत्वं विना जात्याऽनुपपन्नमित्याद्यर्थापत्तिरिति भाव,

एतद्ग्रन्थस्तु–अनुमानमात्रपरं वा, एतादृशानुमानस्य वक्ष्यमाणदोषग्रस्तत्वादाह—वस्तुतस्त्विति । तेन सम्बन्धेनेत्यादिग्रन्थस्तु कर्मत्वघ-

कर्म्मत्वांशे गोत्वाद्यवच्छिन्नव्यक्तेः प्रकारतया भानानुरोधेनाक्षेपादरः, गोत्वं गवाश्रितं गोनिष्ठभेदप्रतियोगिताऽनवच्छेदकधर्म्मत्वात्, किञ्चिदाश्रितं वा; जातित्वादित्यनुमानतो व्यक्तिलाभस्तु न सार्व्वत्रिकः, तादृशहेतूपस्थितेरसार्व्वत्रिकत्वाद्, गवादिपदात्तादृशरूपेण गोत्वादेरनुपस्थितेः,

अथ गवादिपदाद् व्यक्तेरस्मरणे गोत्वादिस्मरणमेव कथमुपपद्यते ?

गोत्वप्रकारकस्मरणे व्यक्तेर्विशेष्यतया भाननियमात्, तद्विशेष्यकस्मरणे च व्यक्तिघटितगोत्वत्वादेः प्रकारतया भाननियमाद्, व्यक्त्यघटितप्रकारस्य सम्भवेऽपि स्वरूपत एव जातेः शक्यतया धर्मान्तरविशेष्यतया तत्स्मरणासम्भवाद् धर्म्मान्तरप्रकारेण स्मरणे गोत्वाद्यंशे निष्प्रकारकशाब्दज्ञानासम्भवेन तादृशस्मृतेरनुपयोगित्वाच्चेति चेद् ?

न-पदादालोचनरूपस्यैव स्मरणस्योपगमात् किञ्चिद्धर्मावच्छिन्नसम्बन्ध्युपरक्तसम्बन्धज्ञानाधीनतत्सम्बन्धिस्मृतेः सप्रकारकत्वनियमेऽपि निर्व्विशेषणकसम्बन्ध्युपरक्तसम्बन्धज्ञानान्निर्व्विकल्पकांशस्मरणे बाधकाभावाद्, निर्व्विकल्पकस्य संस्काराजनकत्वेऽपि विशिष्टज्ञानाहितविशिष्टगोचरसंस्काराद्विशेष्यांशानुद्बोधदशायां केवलविशेषणांशस्मरणे न विरोध इति वदन्ति,

---

र्मिकाधेयतासम्बन्धावच्छिन्नगवाभावव्यापकीभूताभावप्रतियोगिगोत्वकर्म्मतात्यादित्यनुमानपरस्तादृशार्थापत्तिपरश्च, तद्विशेष्यकस्मरण इति । गोत्वविशेष्यकस्मरण इत्यर्थः, व्यक्तिघटितेति । गोत्वत्वघटकगवेतरावृत्तित्वघटकत्वाद् गवादेरिति भावः, व्यक्त्यघटितेति । जातित्वादिप्रकारस्येत्यर्थः, स्वरूपतो गोत्वादिशक्तिज्ञानस्य कथञ्चित् किञ्चित्प्रकारेण स्मरणप्रयोजकत्वकल्पनेऽप्याह—धर्म्मान्तरेति । आलोचनरूपस्यैवेति । निर्विशेष्यकनिष्प्रकारकस्येत्यर्थः, संस्काराजनकत्वेऽपीति ।

तदसद्–गवादिपदात् स्वरूपतो गोत्वादिज्ञानेऽपि व्याप्यताऽवच्छेदकप्रकारेण तद्ग्रहासम्भवात्, ततो व्यक्त्याक्षेपासम्भवाद्,

न च परम्परासम्बन्धेन शाब्दधीविषयेण गोत्वादिविशेषितकर्म्मत्वादिहेतुनाऽऽनयनादौ गवादिकर्म्मत्वमनुमेयमिति वाच्यम् ?

विशिष्टसाध्यस्य प्रागप्रतीतेः,

एवं गौरानीयतामित्यादौ स्वरूपत उपस्थितस्य गोत्वादेरेव विशेष्यतया भानोपगमे निर्धर्म्मिताऽवच्छेदकशाब्दधीस्वीकारापत्तेः,

एवं गवादावानयनकर्म्मत्वं सामानाधिकरण्यसम्बन्धेनानयनकर्म्मत्वविशेषितगोत्वादिना हेतुनाऽनुमेयं; तच्च न सम्भवति–तादृशगोत्वादेरानयनकर्म्मत्वादिशून्यगवादिसाधारण्येन व्यभिचारात्, सामानाधिकरण्यसम्बन्धेनानयनकर्म्मत्वादिविशिष्टस्य विशेषणाव्यभिचारित्वेऽपि साध्यस्य पक्षे सन्देहदशायां साध्यहेत्वोः पक्षे दुर्निश्चयत्वाद्; अतो व्यक्तेः शाब्दबोधे विशेष्यविधया भानमावश्यकमित्यपि बोध्यम्,

---

ननु निर्विकल्पकस्य संस्कारजनकत्वे का क्षतिरिति चेद् ?

न–तस्य संस्कारजनकत्वे संस्कारस्यापि तथात्वेन तज्जन्यस्मृतेरपि निर्विकल्पकत्वेनातीन्द्रियतया तत्कल्पकाभावात्, शाब्दबोधस्थले तु तदनुपपत्त्या कल्पनीयस्य निर्विकल्पकस्मरणस्य निर्विकल्पकस्मरणं विनाऽप्युपपादनादित्याशयः,

व्याप्यताऽवच्छेदकप्रकारेणेति । आधेयतासम्बन्धेन गवादिव्याप्यताऽवच्छेदकगोत्वत्वादिप्रकारेणेत्यर्थः, विशिष्टसाध्यस्य–गोकर्म्मताकत्वस्य, प्रागप्रतीतेरिति । अनुमितेः पूर्व्वं तद्ग्राहकाभावेन तद्ग्रहासम्भवादिति भावः,

ननु शब्देन गोत्वेन कर्म्मत्वज्ञानेऽपि गवाद्युपस्थितिसहकारेण मनसैव गोकर्म्मत्वग्रहसम्भवादाह—एवमिति ।

ननु गौरानीयतामित्यादौ शाब्दिकमते शाब्दस्य धात्वर्थमुख्यविशेष्यकत्वेनानयनादौ स्वरूपतो गोत्वभानसम्भवाल्लक्षणया गोत्वत्वेन गोत्वविशेष्यकत्वसम्भवाद्दोषान्तरमाह—एवं गवादाविति । गौरानीयतामित्यादिवाक्यानन्तरं गवादावानयनकर्म्मत्वबोध आवश्यक, अन्यथाऽऽनयनकर्म्मत्वादिना गवादौ प्रवृत्तिर्न स्यादिति, साध्यहेत्वोरिति । तथा च

एतेन जातिवाचकपदाज्जातिबोधः शाब्दः व्यक्तिबोधस्त्वौपादानिक एवेति श्रीकरमतमनुपादेयम्,

उपादानस्यार्थापत्तिरूपत्वेन भट्टमताविशेषाद्,

न च जातिरेव व्यक्तिबोधिका जातिकरणत्वमेवौपादानिकत्वं बोधस्येति वाच्यम्?

जातेः प्रमाणान्तरत्वकल्पनापेक्षया व्यक्तिशक्तिकल्पनाया एवोचितत्वाद्,

एवं जातेर्नित्यतया सर्व्वदैव तदुपादानकव्यक्तिधीवारणाय जातिहेतुकव्यक्तिबोधे जातिशक्तिज्ञानघटिततच्छाब्दसामग्र्याः सहकारित्वमवश्यमभ्युपगन्तव्यमिति; तथा च तादृशसामग्र्या एव व्यक्तिज्ञानप्रयोजकतासम्भवेन जातेः करणत्वकल्पनमनर्थकम्,

न च जातिनिरपेक्षजातिभासकशाब्दसामग्र्या व्यक्तिज्ञानप्रयोजकत्वे व्यक्त्यंशेऽपि शाब्दत्वमावश्यकं; तथा सति च वृत्तिज्ञानजन्यव्यक्तिस्मृतेरप्यपेक्षा स्याद्; जातेः करणत्वे च व्यक्त्यंश औपा-

---

सामानाधिकरण्यसम्बन्धेन साध्यविशिष्टहेतोरपि निश्चयासम्भव इति भावः,

एतेनेति। अस्यानुपादेयमित्यनेनान्वयः, पूर्व्वोक्तदोषेणेत्यर्थः,

ननूक्तदोषा भट्टमत एव दत्ता; ते चौपादानिकबोधाङ्गीकर्त्तृमते कुतः सम्भवन्तीत्यत आह—उपादानस्येत्यादि। अर्थापत्तिरूपत्वेन=शाब्दसामग्रीसहकृतानुपपत्तिज्ञानरूपत्वेनेत्यर्थः, भट्टमताविशेषादिति। तथा चोक्तदोषा जाग्रत्येवेति भावः,

एवोचितत्वादिति। जातेः प्रमाणान्तरताकल्पने प्रमित्यन्तरमपि कल्पनीयं स्याद् गौरवेणेति भावः,

अनुभवश्चेत् फलानुरोधेन गौरवमपि न दोषावहमित्यत आह-एवं जातेरित्यादि।

शाब्दत्वमावश्यकमिति। ज्ञाने यद्विषयित्वमितरप्रमाणाप्रयोज्यत्वे सति शाब्दसामग्रीप्रयोज्यं ज्ञाने तच्छाब्दत्वमिति नियमादिति, व्यक्तिस्मृतेरिति। व्यक्तिविषयताभिन्नशाब्दीयविषयताया वृत्तिज्ञानजन्योपस्थितिप्रयोज्यत्वनियमादिति भावः, औपादानिकत्वमेवेति। एतन्मते शाब्दत्वमौपादा-

दानिकत्वमेव न तु शाब्दत्वमिति न तदपेक्षेति वाच्यम् ?

व्यक्तिज्ञानांशे जातेः करणत्वे तदंशेऽशाब्दत्वोपगमसम्भवेन तदकरणत्वेऽपि तत्सम्भवाद्, जातेरकरणत्वे व्यक्त्यंशे कीदृशाकारणस्य जन्यताऽवच्छेदकधर्मवत्त्वमिति चेत् ?

न कस्यापि; तावता क्षतिविरहात्,

व्यक्तेरपि बोधः शब्दादेव न त्वाक्षेपादितो, व्यक्तिशाब्दबोधे शक्तिविरहो नानुपपत्तिं प्रयोजयति; लक्षणात एव तदुपपत्तेरिति मण्डनाचार्य्यमतम्—

तदुक्तं—

"जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति।

नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे" इति,

अस्तित्वनास्तित्वे उत्पादविनाशौ, लक्षणा च जातिप्रकारेणैव बोधयति न तु व्यक्तित्वादिनेति नानुभवविरोधः, नीलादिपदस्य शक्यनीलादिगुणपुरस्कारेण लक्षणया बोधकत्ववत् शक्यजातिपुरस्कारेण लक्षणाया गवादिपदस्य व्यक्तिबोधकत्वेऽविरोधात्,

---

निकत्वञ्च हे एकज्ञान एव विषयतावच्छेदकभेदेन तिष्ठत', ते च जातौ अखण्डोपाधी चेत्यन्यदेतत्, तदपेक्षेतीति । वृत्तिज्ञानजन्यव्यक्तिस्मृत्यपेक्षेतीत्यर्थः,

तत्सम्भवादिति । अशाब्दत्वसम्भवादित्यर्थः, तथा च जातिकरणत्वं कल्पयित्वा तत्र शाब्दत्वाभावप्रयोजकत्वकल्पनाऽपेक्षया वृत्तिज्ञानजन्योपस्थितौ तत्प्रयोजकत्वकल्पनौचित्यादिति भावः,

मण्डनाचार्य्यमतमुत्थापयति—व्यक्तेरपीति । अस्तित्वनास्तित्वे इति । अस्तिनास्तिशब्दावव्यये ताभ्यां भावे त्वप्रत्ययेऽस्तित्वनास्तित्वे, विशेषणे इति । विवक्षतीत्यनेनान्वयः, अस्तित्वनास्तित्वशब्दयोर्यथाश्रुतसत्त्वासत्त्वमात्रार्थकत्वे जातावपि विवक्षासम्भवादाह—उत्पादविनाशाविति । गौरुत्पन्नो गौर्नष्ट इत्यादित उत्पत्त्याश्रयत्वेन विनाशप्रतियोगित्वादिना व्यक्तिरेव विषयत्वे, गोत्वादौ तदभावादतो व्यक्तिबोध आवश्यकः, स च लक्षणयैवेति भावः,

"स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा"—
इत्यत्र स्वार्थपदस्य शक्यताऽवच्छेदकपरत्वात्,

अत्रेदं चिन्त्यं—गवादिपदाल्लक्षणया गोत्वादिप्रकारकबोधोपगमे जातिशक्तिरन्वयबोधे नापेक्ष्यते; लक्ष्यताऽवच्छेदकताया एव जातिभानप्रयोजकत्वसम्भवात्,

न च शक्तिं विना व्यक्तौ शक्यसम्बन्धरूपलक्षणैव न निर्व्वहतीति शक्तेरुपयोगितेति वाच्यम् ?

लक्षणानिर्व्वाहार्थं शक्तिकल्पने गवादिपदस्य द्रव्यत्वादावपि विनिगमनाविरहेण शक्तिकल्पनप्रसङ्गात्, द्रव्यत्वादिसम्बन्धेनापि गवादौ लक्षणासम्भवात्,

प्रयोगविरहस्य द्रव्यत्वादाविव स्वातन्त्र्येण गोत्वादावप्यविशिष्टत्वात् लक्षणाघटकतया शक्तेरुपयोगितायां तस्या वृत्तित्वानुपपत्तेः स्वातन्त्र्येणातथात्वात्,

अथाकृतिविशिष्टायामेव व्यक्तौ लक्षणा, आकृतिप्रकारेण व्यक्तिबोधस्य नैयायिकानामप्यनुमतत्वात्; तत्र शक्त्युपस्थापितजातेरन्वय उपगम्यते,

---

"स्वार्थादन्येन रूपेण"त्यादिकारिकास्थस्वार्थपदस्य शक्यपरत्वे गोत्वादीनां शक्यतया लक्षणया गोत्वादेना व्यक्तिबोधे विरोधः स्यादत आह—स्वार्थपदस्येति ।

शक्यसम्बन्धरूपेति । शक्यानुयोगिकसम्बन्धरूपेत्यर्थः, विनिगमनाविरहेण गवि गोत्वसम्बन्धद्रव्यत्वसम्बन्धयोः गोत्वद्रव्यत्वयोश्च तुल्यशरीरत्वादिति भावः,

द्रव्यत्वादिसम्बन्धेनापीति । अत्र तृतीयाऽर्थोऽभेदस्तस्य च लक्षणायामन्वयः,

नन्वस्तु विनिगमनाविरहः किन्तु प्रयोगतद्विरहाभ्यां शक्तितद्विरहौ कल्प्येते इत्यत आह—प्रयोगविरहस्येति । तस्या इति । शक्तेरित्यर्थः, वृत्तित्वानुपपत्तेरिति । उपस्थितिद्वारा यत्सम्बन्धज्ञानं साक्षात् शाब्दबोधजनकं तस्यैव वृत्तिपदार्थत्वादिति, स्वातन्त्र्येणेति । लक्षणाद्वारैवेत्यर्थः, अतथात्वादिति । शाब्दबोधाजनकत्वादित्यर्थः,

न चाकृतावेव शक्तिर्जातिविशिष्टे लक्षणेति वैपरीत्यमेव किं न स्यादिति वाच्यम् ?

आकृतेरवयवसंयोगरूपाया आनन्त्यात् तदपेक्षया लघीयस्यां जातावेव शक्तिकल्पनौचित्याद्,

न चावयवसंयोगनिष्ठजातिरेव शक्याऽस्तु व्यक्तौ तदन्वयश्च स्वाश्रयघटितपरम्परासम्बन्धेन स्वीक्रियतामिति वाच्यम् ?

आकृतिप्रकारकबोधस्यानुभविकत्वाद्, लक्ष्यार्थान्यतात्पर्यकतायां केवलजातौ प्रयोगविरहश्च न शक्यभावसाधकोऽप्रयोजकत्वात्,

तत्राप्रयोगमात्रस्यैव तदशक्यत्वबीजत्वात् जातावप्रयोगस्यासिद्धत्वात् तात्पर्यसत्त्वे च वृत्तिद्वयाधीनबोधोपगमे क्षतिविरहः,

न चैवं केवलं मुख्यार्थतात्पर्येण गवि नित्यत्वमिति स्वारसिकप्रयोगापत्तिरिति वाच्यम् ?

शक्त्या स्वरूपत उपस्थितायाः जातेः समानपदोपात्तधर्मिण्येवाश्रयतासम्बन्धेनान्वयस्य व्युत्पन्नत्वाद्,

न चान्वयिताऽवच्छेदकरूपेणानुपस्थिताया जातेरन्वयो विरुध्यते; व्युत्पत्तिवैचित्र्येण प्रकारतया स्वरूपत उपस्थिताया जातेरन्वयस्वीकारे क्षतिविरहादिति रीत्या चेद् मतमेतत् परिष्क्रियते ?

आनुभविकत्वादिति । तथा चावयवसंयोगनिष्ठजातौ शक्तिकल्पने आकृतिप्रकारकबोधानुपपत्तिरेव बाधिकेति हृदयम्, न शक्यभावसाधक इति । गोत्वं न गोपदशक्यं वृत्त्यन्तराप्रयोज्यत्वनियतगोपदजन्यशाब्दबोधविषयत्वाभावाद् घटादिवदित्यनुमानाच्छक्तिविरहसिद्धिरिति, अप्रयोजकत्वादिति । अनुकूलतर्कविरहात् तथा चानुकूलतर्काभावेन शाब्दव्याप्तिनिर्णयो न भवतीति भावः,

नन्वेवं गवादिपदस्य घटत्वादौ शक्तिः स्यादित्यत आह—तत्राप्रयोगेति । अनादिप्रयोगविरहमात्रस्यैवेत्यर्थः, मात्रपदेन शाब्दानुमानव्यवच्छेदः,

समानपदोपात्तेति । एकपदोपस्थितधर्मिण्येवेत्यर्थः,

मतमेतदिति । मण्डनाचार्यीयमतमित्यर्थः,

तथाऽपि स्वरूपतो गोत्वान्वयबोधस्यापि लक्ष्यार्थे गवादौ स्वीकारे तादृशान्वयबोधं प्रति योग्यताज्ञानादीनां कारणताकल्पनाऽऽधिक्याद् गोत्वादिविशिष्टव्यक्तिशाब्दसामग्रीप्रतिबन्धकतायां जातिव्यक्तिविषयकोपस्थितिद्वयस्य निवेशनीयतया प्रतिबन्धकताऽवच्छेदकशरीरगौरवाच्च जात्याकृतिविशिष्टव्यक्तिशक्तिपक्ष एव साधीयान्।

प्राभाकरास्तु–जातिशक्तिज्ञानादेव जातिप्रकारेण व्यक्तेः स्मरणं शाब्दबोधश्च; न तु निर्विकल्पकरूपं जातिस्मरणं निर्विकल्पकानभ्युपगमाद्,

व्यक्तिसम्बन्धज्ञानविरहेण तदंशानुद्बोधाद्व्यक्तिस्मरणासम्भव इति तु नाशङ्कनीयं, व्यक्तिमविषयीकृत्य स्वरूपतो गोत्वादिज्ञानासम्भवेन गोत्वाद्युद्बोधकस्यैव व्यक्त्युद्बोधकत्वादुद्बोधकस्य फलबलकल्प्यत्वात्,

सम्बन्धिताऽवच्छेदकहस्तित्वादौ सम्बन्धाग्रहेऽपि हस्त्यादिसम्बन्धिहस्तिपकादिज्ञानात्मकोद्बोधकबलाद् हस्त्यादिस्मरणे हस्तित्वादिप्रकारतया भानवद्व्यक्तिसम्बन्धज्ञानमन्तरेणापि जातिसम्बन्धिपदज्ञानाज् जातिस्मरणे व्यक्तेर्विशेष्यतया भाने विरोधविरहात्,

---

गवादाविति । अवयवसंस्थानविशिष्टव्यक्तावित्यर्थः, आयतत्व नादीनामिति । आकृतिविशिष्टो न गौरिति निश्चयाभाव, आकृतिविशिष्टो गौरित्यादिज्ञानं वा योग्यताज्ञानम्, आदिना पूर्वपुपस्थित्यादिपरिग्रहः ।

जातिशक्तिज्ञानादेवेति । गोपदं गोत्वे शक्तं, गोपदं गौरित्यादिज्ञानादेवेत्यर्थः, प्रथमे शक्यत्वे निरूपितत्वसम्बन्धेन द्वितीय पदार्थे शक्तिसम्बन्धेन गोत्वं प्रकारः,

ननु स्मरणे संस्कारस्य सहकारिसम्बन्धज्ञानमेवोद्बोधकं तत्र यदंशउद्बोधकं तदंशस्यैव स्मरणम्, अन्यथोदासीनस्यापि स्मरणापत्तिः,

एवञ्च तादृशोद्बोधकसम्बन्धज्ञाने व्यक्त्यंशाभानात् कुतो व्यक्तेः स्मृतिरित्याशङ्कते—व्यक्तिसम्बन्धेति ।

ननु सादृश्ये सादृश्यादिज्ञानस्याप्युद्बोधकतया गोत्वादिसादृश्ये ज्ञानेन गोत्वादिना गवादिस्मरणानुपपत्तेः अत्र गोत्वादिप्रकारक

तद्धर्म्मप्रकारकस्मृतौ तद्धर्म्मावच्छिन्नसम्बन्धितया गृहीतवस्तुज्ञानस्य हेतुतायामदृष्टादिरूपोद्बोधकजनितस्मृतौ व्यभिचारवारणाय कार्य्यताऽवच्छेदकसङ्कोचस्यावश्यकतया तत एव प्रकृते व्यभिचारानवकाशात्,

जातिशक्तिज्ञाने नियमतो जातिप्रकारेण व्यक्त्यभानात् तज्जन्यसंस्कारान्नियमतो व्यक्तिस्मरणासम्भव इति चेत् ?

का क्षतिः, व्यक्तिविषयकज्ञानान्तरस्यावश्यकतया तज्जनितसंस्कारादेव व्यक्तिस्मरणसम्भवात्,

अथ भवतु जातिशक्तपदज्ञानाज्जातिप्रकारेण व्यक्तिस्मरणं तथाऽपि तत्प्रकारकशाब्दबोधो न सम्भवति; तद्धर्म्मप्रकारकधर्म्मिविषयकशाब्दबोधे तद्धर्म्मप्रकारेण धर्म्मिणि गृहीतवृत्तिकपदज्ञानजन्यतद्धर्म्मप्रकारकोपस्थितेर्हेतुत्वात्, पदे गृहीतवृत्तिकत्वमात्रनिवेशे घटत्वादिगृहीतवृत्तिकपदाद् गोत्वाद्यवच्छिन्ननिरूपितसम्बन्धान्तरावगाहिज्ञानजन्यगोत्वादिप्रकारकस्मरणाद् गोत्वादिप्रकारकशाब्दबोधापत्तेः,

---

स्मृतिं प्रति गोत्वाद्यवच्छिन्ननिरूपितसम्बन्धज्ञानत्वेन सर्व्वसाधारणैकहेतुतायाः कल्पनेन कुतो गोत्वशक्तिज्ञानेन गोत्वादिना गवादेः स्मरणसम्भव इत्यत आह—अदृष्टादिरूपेति ।

अथ जातमात्रबालकस्य स्तनपानादाविष्टसाधनताज्ञानस्य प्रत्यक्षादिनोत्पत्त्यसम्भवात् स्मृत्यात्मकताया आवश्यकत्वेनागत्या तत्रैव क्वचित् स्वभावतो चादृष्टस्योद्बोधकत्वं कल्प्यते, न गवादिस्मरण इत्यत—आदीति । साहचर्य्यादीनां सम्बन्धत्वेनाभाने साहचर्य्यत्वादिना ज्ञानेन स्मरणजननात् तादृशतादृशविशेषधर्म्मेण ज्ञानस्य हेतुताया वक्तव्यतया; आदिना तत्तद्विशेषधर्म्मावच्छिन्नस्य परिग्रहः, कार्य्यताऽवच्छेदकसङ्कोचस्येति । तादृशतादृशकारणाव्यवहितोत्तरत्वघटिततत्त्वेन कार्य्यताऽवच्छेदकस्यासमग्रकार्य्यावृत्तित्वस्येत्यर्थः,

ज्ञानान्तरस्येति । प्रत्यक्षाद्यात्मकस्येत्यर्थः, आवश्यकतयेति । अन्यथा व्यवहारादिना शक्तिग्रह एव नोत्पत्तुमर्हतीति भावः,

पदे गृहीतेति । पदविशेष्यकवृत्तिप्रकारकज्ञानत्वेन गोत्वेन गोविषयकशाब्दं प्रति हेतुत्व इत्यर्थः, गोत्वाद्यवच्छिन्नेति । घटत्ववृत्तिमत्पदं गोत्व

तद्धर्म्मगृहीतवृत्तिकत्वनिवेशे पशुत्वादिधर्म्मगृहीतशक्तिकविशिष्टवाचकपश्वादिपदात् पशुत्वादिविशिष्टविषयकशाब्दबोधस्य गुरूणामप्यननुमतस्यापत्तेः,

न च प्रकारीभूतधर्म्मभेदेन कार्य्यकारणभावभेदस्य यत्त्वत्त्वाननुगमेनावश्यकत्वाज्जातिविशिष्टविषयकशाब्दबोध एव जातिरूपधर्म्ममात्रगृहीतवृत्तिकपदज्ञानजन्यस्मरणस्य हेतुत्वमङ्गीकार्य्यम्, उपाधिविशिष्टविषयकशाब्दबोधे तु विशिष्टगृहीतवृत्तिकपदज्ञानजन्यस्मृतेरेवेति वाच्यम् ?

एवमपि जातिमल्लाक्षणिकपदज्ञानाज्जातिप्रकारकशाब्दबोधानुपपत्तेर्दुर्व्वारत्वाद् लक्षणाज्ञानाधीनपदार्थोपस्थितेर्हेतुत्वान्तरकल्पने च गौरवाद्,

न च तन्मतेऽध्याहृतार्थस्याप्यन्वयबोधविषयतया पदजन्यपदार्थोपस्थितित्वेन हेतुतैव नास्ति कथमुक्तानुपपत्त्यवकाश इति वाच्यम् ?

त्वाच्छिन्नसमानकालानमित्यादिजन्यगोस्मरणादित्यर्थ, तद्धर्म्मगृहीतेति । तद्धर्म्मनिष्ठनिरूपितत्वसम्बन्धावच्छिन्नवृत्तिनिष्ठप्रकारताकपदत्वावच्छिन्नविशेष्यताशालिज्ञानत्वेन तद्धर्म्मप्रकारेण धर्म्मिविषयकशाब्दं प्रति हेतुत्व इति यावत्,

जातिमल्लाक्षणिकेति । द्रव्यपद सुवर्णत्वावच्छिन्नसम्बन्धिनि शक्तमित्यादिज्ञानादित्यर्थं, एतच्च शाब्दबोधौपयिकसम्बन्धत्वरूपवृत्तित्वेन शक्तिलक्षणाज्ञानसाधारणैकहेतुत्वाभिमानेनाभिहितम्,

अध्याहृतार्थस्येति । द्वारम् आनयेत्याद्युक्ते द्वारकर्म्मकत्वानयनकार्य्यत्वानुपस्थितौ तत्सम्बन्धज्ञानेन पिधानकार्य्यत्वगोकर्म्मत्वादिरूपार्थाः स्मर्य्यन्ते तदन्तर तेनैव पिधेहीत्यादिपदज्ञानं विनाऽप्युपस्थितानामर्थानामन्वयबोधो भवतीति प्राभाकराणामाशय ।

नैयायिकानान्तु-द्वारम् आनयेत्यादिपदज्ञानानन्तर पिधेहीत्यादिपदान्यध्याहर्य्यन्ते, ततस्तेभ्यः पदेभ्यस्तावत्पदार्थोपस्थितौ वाक्यार्थबोध, "शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यते" इति न्यायादिति हृदयम् ।

एवञ्च प्राभाकरमते पदाध्याहृतान्यपदार्थोपस्थितेः शाब्दबोधे-

सर्व्वार्थाध्याहारस्थलेऽन्वयबोधवारणाय तन्मतेऽपि तादृशहेतुताया व्यवस्थापितत्वाद्,

न च तथाऽपि पदज्ञानजन्यपदार्थोपस्थितित्वघटितकारणताऽवच्छेदकेन व्यक्तिलाक्षणिकपदजन्यव्यक्त्युपस्थितेरसंग्रहो न दोषाय, अध्याहाररूपार्थोपस्थितेर्येन रूपेण हेतुता व्यवस्थापिता; लक्षणार्थोपस्थितेरपि तद्रूपाक्रान्ततयोपपत्तेः; शक्तपदस्यैवानुभावकतेति सिद्धान्तात् सर्व्वलाक्षणिकस्थलेऽन्वयबोधानुपगमात् तद्स्थलीयसामग्रीवत्वात् सर्व्वार्थाध्याहारस्थलेऽप्यन्वयबोधापत्तेरिति शङ्काऽनवकाशादिति वाच्यम् ।

यत्र लाक्षणिकपश्वादिपदाद् गोत्वादिप्रकारकोपस्थितिस्तदव्यवहितोत्तरद्वितीयाऽऽदिविभक्तितः शक्त्या कर्म्मत्वाद्युपस्थितिस्ततः कर्म्मत्वादिविशेषको गोत्वाद्यवच्छिन्नप्रकारकः शाब्दबोधस्तत्स्थलीयसामग्रीलक्षणाऽधीनपदार्थोपस्थितेरध्याहारात्मकोपस्थितिसाधारणरूपमात्रेण हेतुतामते कर्म्मत्वाद्युपस्थापकविभक्तिप्रकृतिभूतपश्वादिपदाद्यत्र न गोत्वाद्यवच्छिन्नोपस्थितिरपि तु निराकाङ्क्षपदान्तरादनुमानादितो वा तत्राप्यक्षतैवेति तादृशशाब्दबोधस्य सत्त्वापत्तेर्दुर्व्वारत्वाद्,

अथाध्याहारमतेऽपि यत्र साकाङ्क्षपदद्वयान्न प्रकृतान्वयार्थघटकस्याप्यर्थद्वयस्योपस्थितिस्तत्र शाब्दबोधापत्तेरनिष्टत्वादिति चेद् ।

तुत्वमसम्भवीति भावः,

सर्व्वार्थाध्याहारस्थल इति । पदज्ञानं विना यत्र सम्बन्धान्तरज्ञानाद् निराकाङ्क्षाणां घटः कर्म्मत्वम् आनयनमित्यादिपदानां ज्ञानाद्वा पदार्थानामुपस्थित्या शाब्दबोधवारणायेत्यर्थः, लक्षणार्थोपस्थितेरपीति । शक्तपदज्ञानस्यैव तादृशार्थोपस्थितिसहकारेण लक्ष्यार्थान्वितस्वार्थानुभावकत्वादिति भावः, शाब्दबोध इति । तथा च पशुमिति गोपरपश्वादिपदघटितवाक्यात् कर्म्मत्वं गवीयमित्यादिबोधोत्पत्तये गोत्वेन गोस्मरणसहकृतद्वितीयाजन्यकर्म्मत्वोपस्थितेरेव कारणत्वं वक्तव्यमिति भावः, तादृशशाब्दबोधस्येति । कर्म्मत्वं गवीयमित्यादिशाब्दबोधस्येत्यर्थः, साकाङ्क्षपदद्वयेति । यथा द्वारमित्यादिवाक्याद् द्वारकर्म्मत्वा-

न शक्तिलक्षणासाधारणस्यानतिप्रसक्तवृत्तित्वस्य दुर्वचतया शक्तित्वशक्यसम्बन्धत्वाभ्यामेव तयोर्निवेशनीयतया शक्तिलक्षणाऽधीनपदार्थोपस्थित्योः कारणताभेदस्य व्यक्तिशक्तिवादिनामप्यावश्यकतया शक्त्यधीनपदार्थोपस्थितेस्तद्धर्म्मगृहीतशक्तिकपदज्ञानजन्यतद्धर्मप्रकारकोपस्थितित्वेनैव तद्धर्म्मप्रकारकशाब्दबोधहेतुतायाः कल्पयितुमुचितत्वात्,

न च तद्धर्म्मावच्छिन्नविषयतानिरूपितशक्तिविषयतानिरूपितविषयताशालिज्ञानत्वेन व्यक्तौ शक्तिलक्षणाग्रहाय व्यक्तिशक्तिवादिमतेऽनुगमः सम्भवति गोसम्बन्धिशक्तं पदमित्याकारके पदशक्यसम्बन्धिनी गौरित्याकारके वा लक्षणाग्रहेऽपि गोत्वावच्छिन्नविषयताया निरूप्यनिरूपकभावसत्त्वादिति वाच्यम् ?

साक्षान्निरूपितत्वपरम्परानिरूपितत्वयोरनुगमकरूपाभावात्,

यत्तु वृत्तिसंसर्गकपदप्रकारकज्ञानमेव शाब्दबोधोपयोगि,

एवञ्च शक्तिसंसर्गतानिरूपकपदप्रकारतानिरूपिततद्धर्म्मावच्छिन्नविशेष्यताशालिज्ञानत्वेन तद्धर्म्मावच्छिन्नविशेष्यकशक्तिलक्षणाज्ञानयोरनुगमः सम्भवत्येव शक्यसम्बन्धेनार्थांशे पदप्रकारग्रहस्यापि तथात्वात् संसर्गताऽवच्छेदकीयविषयतायामपि संसर्गतात्वसत्त्वादिति—

देरनुस्थितिरपि च प्रकारान्तरेण द्वारकमेत्वपिधानादेरुपस्थितिस्तत्रार्थाध्याहारवादिनाऽपि शाब्दबोधो नाङ्गीक्रियते किञ्चित् साकाङ्क्षपदजन्यपदार्थोपस्थितिसहकारेणैवेति भाव, दुर्वचतयेति ।

ननु शाब्दबोधप्रयोजकसम्बन्धत्वं शाब्दबोधजनकोपस्थितिजनकज्ञानविषयसम्बन्धत्वं वृत्तित्वं सुवचमिति चेद् ?

न—शक्तिग्रहे लक्षणाग्रहे च प्रत्येकं शाब्दबोधजनकत्वं विना तादृशधर्म्मस्य दुर्ग्रहतया प्रत्येकजनकतयैवोपपत्तौ तादृशजनकत्वे मानाभावात्, संसर्गतात्वसत्त्वादिति । संसर्गानवच्छिन्नविषयतामात्रवृत्तिसंसर्गत्वमतिरिक्तपदार्थ इति, तथा चैतन्मते शक्तिसम्बन्धेन स्वशक्यसम्बन्धेन च गोर्गोपदवान् इत्याकारकं ज्ञानं हेतुस्तदुभयत्रापि पदत्वावच्छिन्नप्रकारताया शक्तिनिष्ठसांसर्गिकविषयतानिरूपितत्वमस्ति,

तदसत्–शक्तिकालीनत्वादिसम्बन्धावगाहिज्ञानवारणाय पदप्रकारत्वार्थविशेष्यत्वोभयनिरूपितशक्तिनिष्ठसांसर्गिकविषयताया निवेशस्यावश्यकतया शक्तिसंसर्गज्ञानसङ्ग्राहकेण रूपेण लक्षणाग्रहासम्भवात्।

अथ धर्मशक्तपदस्य धर्मिस्मरणशाब्दबोधजनकत्वे लोमाद्यात्मकोपाध्यवच्छिन्नबोधकपश्वादिपदस्यापि धर्मिशक्तिर्विलीयतां युक्तेः साम्यात्;

न च निर्विकल्पकरूपस्य स्मरणस्य शाब्दबोधस्य चानभ्युपगमाज्जातिवाचकपदाद्व्यक्त्यविषयकस्मरणाद्यसम्भवेन तस्य व्यक्तिस्मरणादिजनकत्वं धर्म्यविषयकस्यापि लोमत्वाद्यवच्छिन्नविषयकस्मरणादेः सम्भवात्, पश्वादिपदस्य लोमत्वाद्यवच्छिन्नमात्रवाचकत्वोपगमे न धर्मिधीः सम्भवतीति न तस्य धर्मवाचकत्वेति वाच्यम्?

उपाधेर्धर्मिविनिर्मोकेण भानसम्भवरूपस्य जात्यपेक्षया विशेषस्य सत्त्वेऽपि जातिशक्तपदज्ञानस्य जातिप्रकारिकायामिवोपाधिशक्तिज्ञानस्याप्युपाधिप्रकारकधर्मिविषयकबुद्धौ कारणताकल्पने बाधकाभावादुपाधिमात्रशक्तादपि धर्मिग्रहसम्भवादिति चेद्?

न–लोमत्वाद्यवच्छिन्नसम्बन्धान्तरवत्तया गृहीतात् पश्वादिपदाल्लोमत्वादिना लोमादिमुख्यविशेष्यकस्यैव स्मरणस्य बाधकान्तरविरहदशायामुत्पादवत् तत्तद्रूपावच्छिन्नशक्तत्वेन गृहीतात् पदादपि तत्तद्रूपावच्छिन्नमुख्यविशेष्यकस्मरणोत्पादस्यानुभविकत्वात्, ततस्तद्धर्मावच्छिन्नप्रकारकस्मरणस्य नियमतः स्वीकारासम्भवा-

अत्र उभयज्ञानमेकरूपेण तत्र हेतुरिति; प्रथमे संसर्गताऽवच्छेदकतानिरूपितत्वं, द्वितीये तदवच्छेदकताऽऽत्मकसांसर्गिकविषयतानिरूपितत्वमिति विशेषः, प्रकारत्वमिति। पदनिष्ठप्रकारतानिरूपितशक्तिनिष्ठसांसर्गिकविषयतानिरूपितार्थनिष्ठविशेष्यताशालिज्ञानत्वेन तद्धर्मप्रकारकप्रत्यक्षत्वेन कार्यकारणभाव इति, लक्षणाग्रहासम्भवादिति। लक्षणाग्रहे तादृशरूपाभावादित्यर्थः, सम्बन्धान्तरवत्तयेति। स्पष्ट।

त्लोमादिपदशक्यत्वेन गृहीतपदान्नियमतस्तत्प्रकारकशाब्दबोधस्यानिर्वाहात् अविशेषितगोत्वादेः सम्बन्धान्तरज्ञानादपि तत्प्रकारकधर्म्मिस्मरणस्यैवोपगमादेतादृशशक्तिसम्बन्धज्ञानान्नियमतस्तत्प्रकारकधर्म्मिस्मरणोपगमेऽनुभवविरोधविरहात्,

अथ गवादिपदस्य समवायेन गोत्वादिविशिष्टवाचकत्वोपगमे तज्जन्यबोधे गोत्वादे समवाय एव संसर्गतया भासते न तु सम्बन्धान्तरमित्यत्र किं नियामकम्?

वाच्यानन्तर्भावस्य समवायसाधारण्येन सम्बन्धान्तराभानप्रयोजकत्वासम्भवात्, न हि जातिर्व्यक्तिं विना न भासत इतिवत्, समवायं विनाऽपि न भासत इत्यपि नियमो; येन जातिशक्तिज्ञानजन्यबोधे समवायभानस्याप्यावश्यकता न तु सम्बन्धान्तरभानस्येति स्यात्; तदादिपदात् समवायमविषयीकृत्यापि सम्बन्धान्तरेण गोत्वादिविषयकबोधोदयादिति चेत्?

एवं सति ज्ञानशक्तिरेवादरणीया; तथा च गवादिपदस्य समवायेन गोत्वादिप्रकारकज्ञान एव शक्तेरुपगमात्, ततो नाभ्रान्तानां सम्बन्धान्तरेण तत्प्रकारकधीस्तत्सम्बन्धेन तत्प्रकारकशक्तिग्रहस्यैव तादृशबोधहेतुत्वादिति ।

इति श्रीमहामहोपाध्यायगदाधरभट्टाचार्य्य-
विरचितः शक्तिवादः समाप्तः ।

नकालीनत्वादिसम्बन्धं दर्शयति भाव, जातिवाचकगवादिपदे वैलक्षण्यं दर्शयति—अविशेषितेति । किञ्चिद्धर्मप्रकारताऽनापन्नेत्यर्थः, एतादृशशक्तिसम्बन्धेति । गोत्वादिशक्तिसम्बन्धज्ञानादित्यर्थः, तदादिपदादिति । काले गौः स ज्ञायते इत्यादौ तच्छब्देन कालिकसम्बन्धेन गोत्वविशिष्टकालपरामर्शादित्यत्र विवरण ।

इति श्रीमहामहोपाध्यायगोलोकनाथन्यायरत्नभट्टाचार्यात्मजश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचिता शक्तिवादविवृतिः समाप्ता ।

शुभमस्तु ।